४१०. दसमे **बहून**न्ति दुब्बलताय अरञ्ञादिसेवाय चित्तं समाहितं कातुं असक्कोन्तानं। दुक्खस्सन्तकिरियाय तस्मिं अत्तभावे बुद्धवचनग्गहणधारणादिसङ्खातं ब्यञ्जनपदमेव परमं अस्स, न मग्गलाभोति **पदपरमो। अभिसम्भुणित्वा**ति निप्फादेत्वा। धम्मतो अपेतं **उद्धम्मं। पटिक्खित्तमेवा**ति ''न, भिक्खवे, असेनासनिकेन वस्सं उपगन्तब्ब''न्ति (महाव० २०४) वचनतो वुत्तं, इदमेव वचनं सन्धाय पाळियम्पि **''अट्ठ मासे''**तिआदि (पारा० ४०९) वुत्तं।

तीहि कोटीहीति असुद्धमूलेहि। एत्थ च भिक्खूनं चतूसु कुलेसु पक्कपिण्डियालोपभोजननिस्सितताय, मच्छमंसभोजनविरहितस्स च कुलस्स दुल्लभताय तत्थ लद्धेसु भत्तब्यञ्जनेसु मच्छमंससंसग्गसङ्काय, दुन्निवारणताय च भिक्खूनं सरीरयापनम्पि न सियाति भगवता मच्छमंसं सब्बथा अप्पटिक्खिपित्वा तीहि कोटीहि अपरिसुद्धमेव पटिक्खित्तं। यदि हि तं भगवा सब्बथा पटिक्खिपेय्य, भिक्खू मरमानापि मच्छादिसंसग्गसङ्कितं भत्तं न भुञ्जेय्युं, ततो तण्डुलधञ्ञादिं पटिग्गहेत्वा निदहित्वा सयं पचित्वा भुञ्जितुं तदुपकरणभूतं दासिदासं, उदुक्खलमुसलादिकञ्च भिक्खूनं पत्तादि विय अवस्सं गहेतुं अनुजानितब्बं सियाति तित्थियानं विय गहट्ठावासो एव सिया, न भिक्खुआवासोति वेदितब्बं। **जालं** मच्छबन्धनं। **वागुरा** मिगबन्धनी। **कप्पती**ति यदि तेसं वचनेन सङ्का न वत्तति, वट्टति, न तं वचनं लेसकप्पं कातुं वट्टति। तेनेव वक्खति ''यत्थ च निब्बेमतिको होति, तं सब्बं कप्पती''ति।

पवत्तमंसन्ति आपणादीसु पवत्तं विक्कायिकं मतमंसं। **भिक्खूनंयेव अत्थाय अकत**न्ति एत्थ अट्ठानप्पयुत्तो एव-सद्दो, भिक्खूनं अत्थाय अकतमेवाति सम्बन्धितब्बं, तस्मा भिक्खूनञ्च मङ्गलादीनञ्चाति मिस्सेत्वा कतम्पि न वट्टतीति वेदितब्बं। केचि पन यथाठितवसेन अवधारणं गहेत्वा ''वट्टती''ति वदन्ति, तं न सुन्दरं। **''वत्त''**न्ति इमिना आपत्ति नत्थीति दस्सेति।

कप्पन्ति असङ्ख्येय्यकप्पं, ''आयुकप्प''न्तिपि (सारत्थ० टी० २.४१०) केचि। महाकप्पस्स हि चतुत्थभागो असङ्ख्येय्यकप्पो, ततो वीसतिमो भागो सङ्घभेदकस्स आयुकप्पन्ति वदन्ति, तं अट्ठकथासु कप्पट्ठकथाय न समेति ''कप्पविनासे एव मुच्चती''तिआदि (विभ० अट्ठ० ८०९) वचनतो। **ब्रह्मं पुञ्ञ**न्ति सेट्ठं पुञ्ञं। **कप्पं सग्गम्ही**ति एत्थ पटिसन्धिपरम्पराय कप्पट्ठता वेदितब्बा।

४११. **लद्धिनानासंवासकेना**ति उक्खित्तानुवत्तकभावेन भावप्पधानत्ता निद्देसस्स। **कम्मनानासंवासकेना**ति उक्खित्तभावेन। ''भेदाय परक्कमेय्या''ति विसुं वुत्तत्ता भेदनसंवत्तनिकस्स अधिकरणस्स समादाय पग्गण्हनतो पुब्बेपि पक्खपरियेसनादिवसेन सङ्घभेदाय परक्कमन्तस्स समनुभासनकम्मं कातुं वट्टतीति वेदितब्बं। योपि चायं सङ्घभेदो होतीति सम्बन्धो।

कम्मेनाति अपलोकनादिना। **उद्देसेना**ति पातिमोक्खुद्देसेन। **वोहारेना**ति ताहि ताहि उपपत्तीहि ''अधम्मं धम्मो''तिआदिना (अ० नि० ३.१०-३९, ४२; चूळव० ३५२) वोहारेन, परेसं पञ्ञापनेनाति अत्थो। **अनुसावनाया**ति अत्तनो लद्धिया गहणत्थमेव अनु पुनप्पुनं कण्णमूले मन्तसावनाय, कथनेनाति अत्थो। **सलाकग्गाहेना**ति एवं अनुसावनाय तेसं चित्तं उपत्थम्भेत्वा अत्तनो पक्खे पविट्ठभावस्स सञ्ञाणत्थं ''गण्हथ इमं सलाक''न्ति सलाकग्गाहेन। एत्थ च कम्ममेव, उद्देसो वा सङ्घभेदे पधानं कारणं, वोहारादयो पन सङ्घभेदस्स पुब्बभागाति वेदितब्बा। **अब्भुस्सित**न्ति अब्भुग्गतं। **अच्छेय्या**ति विहरेय्य।

''लज्जी रक्खिस्सती''ति (विसुद्धि० १.४२; पारा० अट्ठ० १.४५) वचनतो आपत्तिभयेन आरोचनं लज्जीनं एव भारोति आह **''लज्जीहि भिक्खूही''**ति, अलज्जिस्सपि अनारोचेन्तस्स आपत्तियेव। **अप्पटिनिस्सज्जतो दुक्कट**न्ति विसुं विसुं वदन्तानं गणनाय दुक्कटं। **पहोन्तेना**ति गन्तुं समत्थेन, इच्छन्तेनाति अत्थो। आपत्ति पन अड्ढयोजनब्भन्तरेनेव अगिलानस्स वसेन वेदितब्बा।

४१६. ञत्तियादीहि दुक्कटादिसब्भावं सन्धाय **''सङ्घादिसेसेन अनापत्ती''**ति वुत्तं। **अस्सा**ति देवदत्तस्स। अपञ्ञत्ते सिक्खापदे समनुभासनकम्मस्सेव अभावतो **''न हि पञ्ञत्तं सिक्खापदं वीतिक्कमन्तस्सा''**ति वुत्तं। सिक्खापदं पञ्ञपेन्तेनेव हि समनुभासनकम्मं अनुञ्ञातं। **उद्दिस्स अनुञ्ञातत्ता**ति ''अनुजानामि, भिक्खवे, रोमन्थकस्स रोमन्थन''न्तिआदिं (चूळव० २७३) उद्दिस्सानुञ्ञातं सन्धाय वदति। **अनापत्तिय**न्ति अनापत्तिवारे। **आपत्तिं रोपेतब्बो**ति समनुभासनाय पाचित्तियआपत्तिं रोपेतब्बो। **आपत्तियेव न जाता**ति सङ्घादिसेसापत्ति न जाता एव।

''न पटिनिस्सज्जामी''ति सञ्ञाय अभावेन मुच्चनतो **सञ्ञाविमोक्खं। सचित्तक**न्ति ''न पटिनिस्सज्जामी''ति जाननचित्तेन सचित्तकं। यो विसञ्ञी वा भीतो वा विक्खित्तो वा ''पटिनिस्सज्जितब्ब''न्तिपि, ''कम्मं करिस्सती''ति वा न जानाति, तस्स अनापत्ति। भेदाय परक्कमनं, धम्मकम्मेन समनुभासनं, कम्मवाचापरियोसानं, न पटिनिस्सज्जामीति चित्तेन अप्पटिनिस्सज्जनन्ति इमानेत्थ चत्तारि अङ्गानि।

पठमसङ्घभेदसिक्खापदवण्णना निट्ठिता।

११. दुतियसङ्घभेदसिक्खापदवण्णना

४१८. एकादसमे यस्मा उब्बाहिकादिसम्मुतिकम्मं बहूनम्पि कातुं वट्टति, तस्मा **''न हि सङ्घो सङ्घस्स कम्मं करोती''**ति इदं निग्गहवसेन कत्तब्बकम्मं सन्धाय वुत्तन्ति वेदितब्बं। अङ्गानि पनेत्थ भेदाय परक्कमनं पहाय अनुवत्तनं पक्खिपित्वा हेट्ठा वुत्तसदिसानेव गहेतब्बानि।

दुतियसङ्घभेदसिक्खापदवण्णना निट्ठिता।

१२. दुब्बचसिक्खापदवण्णना

४२४. द्वादसमे **वम्भनवचन**न्ति गरहवचनं। सट-सद्दो पतितसद्देन समानत्थो, तस्स च विसेसनस्स परनिपातोति आह **''तत्थ तत्थ पतितं तिणकट्ठपण्ण''**न्ति। **केनापी**ति वातादिसदिसेन उपज्झायादिना।

४२६. चित्तपरियोनाहो दळ्हकोधोव **उपनाहो**। ततोपि बलवतरो दुम्मोचनीयो **कोधाभिसङ्गो। चोदकं पटिप्फरणता**ति चोदकस्स पटिविरुद्धो हुत्वा अवट्ठानं। **चोदकं अपसादना**ति वाचाय घट्टना। **पच्चारोपना**ति ''त्वम्पि सापत्तिको''ति चोदकस्स आपत्तिआरोपना। **पटिचरणता**ति पटिच्छादनता। **अपदानेना**ति अत्तनो चरियाय। **न सम्पायनता**ति ''यं त्वं चोदको वदेसि 'मया एस आपत्तिं आपन्नो दिट्ठो'ति, त्वं तस्मिं समये किं करोसि, अयं किं करोति, कत्थ च त्वं अहोसि, कत्थ अय''न्तिआदिना नयेन चरियं पुट्ठेन सम्पादेत्वा अकथनं।

''यस्स सिया आपत्ती''ति (महाव॰ १३४) इमिना निदानवचनेन सब्बापि आपत्तियो सङ्गहिताति आह **''यस्स सिया''**तिआदि। अङ्गानि चेत्थ पठमसङ्घभेदसदिसानि, अयं पन विसेसो यथा तत्थ भेदाय परक्कमनं, इध अवचनीयकरणता दट्ठब्बा।

दुब्बचसिक्खापदवण्णना निट्ठिता।

१३. कुलदूसकसिक्खापदवण्णना

४३१. तेरसमे **कीटागिरी**ति तस्स निगमस्स नामं। तञ्हि सन्धाय परतो ''न अस्सजिपुनब्बसुकेहि भिक्खूहि कीटागिरिस्मिं वत्थब्ब''न्ति वुत्तं, गामनिगमतो च पब्बाजनं, न जनपदतो। तेन पन योगतो जनपदोपि ''कीटागिरि''इच्चेव सङ्ख्यं गतोति आह **''एवंनामके जनपदे''**ति।

तत्राति सावत्थियं। **धुरट्ठाने**ति अभिमुखट्ठाने, जेतवनद्वारसमीपेति अत्थो। **द्वीहि मेघेही**ति वस्सिकेन, हेमन्तिकेन चाति द्वीहि मेघेहि। गणाचरियेहि छहि अधिकताय **''समधिक''**न्ति वुत्तं।

उदकस्साति अकप्पियउदकस्स ''कप्पियउदकसिञ्चन''न्ति विसुं वक्खमानत्ता, तञ्च ''आरामादिअत्थाय रुक्खरोपने अकप्पियवोहारेसुपि कप्पियउदकसिञ्चनादि वट्टती''ति वक्खमानत्ता इधापि विभागं कत्वा कप्पियउदकसिञ्चनादि विसुं दस्सितं। यथा कोट्टनखणनादिकायिककिरियापि अकप्पियवोहारे सङ्गहिता, एवं मातिकाउजुकरणादिकप्पियवोहारेपीति आह **''सुक्खमातिकाय उजुकरण''**न्ति। एत्थ पुराणपण्णादिहरणम्पि सङ्गय्हति। महापच्चरियवादोव पमाणत्ता पच्छा वुत्तो। अकप्पियवोहारेपि एकच्चं वट्टतीति दस्सेतुं **''न केवलञ्च सेस''**न्तिआदिमाह। **यंकिञ्चि मातिक**न्ति सुक्खं वा असुक्खं वा। **तत्था**ति आरामादिअत्थाय रुक्खरोपने। **तथा**ति कप्पियवोहारपरियायादीहि गन्थापनं सन्धाय वुत्तं। इमिना च कुलसङ्गहत्थाय गन्थापनादिपि न वट्टतीति दस्सेति।

वत्थुपूजनत्थाय सयं गन्थनं कस्मा न वट्टतीति चोदेन्तो **''ननु चा''**तिआदिमाह। यथा आरामादिअत्थं कप्पियपथवियं सयं रोपेतुम्पि वट्टति, तथा वत्थुपूजनत्थाय सयं गन्थनम्पि कस्मा न वट्टतीति चोदकस्स अधिप्पायो। **वुत्त**न्तिआदि परिहारो। अथ **''न पन महाअट्ठकथाय''**न्ति कस्मा वदति? महापच्चरिआदीसु वुत्तम्पि हि पमाणमेवाति नायं विरोधो, महाअट्ठकथायं अवुत्तस्स सयं रोपनस्स तत्थेव वुत्तेन उदकसिञ्चनेन सह संसन्दननयदस्सनमुखेन पमाणमेवाति पतिट्ठापेतुं वुत्तत्ता। ''मञ्ञेय्यासी''ति पदं ''तं कथ''न्ति इमिना सम्बन्धितब्बं। तत्रायं अधिप्पायो – किञ्चापि महाअट्ठकथायं सयं रोपनं न वुत्तं, कप्पियउदकस्स सयं आसिञ्चनं वुत्तमेव, तस्मा यथा आरामादिअत्थाय कप्पियउदकं सयं सिञ्चितुम्पि वट्टति, तथा वत्थुपूजनत्थाय गन्थनम्पि कस्मा न वट्टतीति। **तम्पि न विरुज्झती**ति यदेतं वत्थुपूजनत्थायपि गन्थनादिं पटिक्खिपित्वा आरामादिअत्थाय सयं रोपनसिञ्चनं वुत्तं, तम्पि पाळिया संसन्दनतो पुब्बापरं न विरुज्झति।

तं कथं न विरुज्झतीति आह **''तत्र ही''**तिआदि। **तत्रा**ति रोपनसिञ्चनविसये। पुप्फादीहि कुलसङ्गहप्पसङ्गे ''मालावच्छ''न्ति विसेसितत्ता कुलसङ्गहत्थमेव रोपनं अधिप्पेतन्ति विञ्ञायतीति आह **''मालावच्छन्ति वदन्तो''**तिआदि। **एतं वुत्त**न्ति ''मालावच्छं रोपेन्तिपि रोपापेन्तिपि, सिञ्चन्तिपि सिञ्चापेन्तिपी''ति एतं वुत्तं। **अञ्ञत्र पना**ति आरामादिअत्थाय मालावच्छादीनं रोपने पन। **परियायो**ति सयंकरणकारापनसङ्खातो परियायो वोहारो अत्थविसेसोति अत्थो **अत्थि** उपलब्भति, कुलसङ्गहत्थत्ताभावाति अधिप्पायो। एवमेत्थ परियायसद्दस्स करणकारापनवसेन अत्थे गय्हमाने ''गन्थेन्तिपि गन्थापेन्तिपी''ति पाळियं पटिक्खित्तगन्थनगन्थापनं ठपेत्वा यं परतो ''एवं जान, एवं कते सोभेय्या''तिआदिकप्पियवचनेहि गन्थापनं वुत्तं, तत्थ दोसाभावो समत्थितो होति, ''गन्थेही''ति आणत्तिया कारापनस्सेव गन्थापनन्ति अधिप्पेतत्ता। **तत्थ परियायं इध च परियायाभावं ञत्वा**ति तत्थ ''मालावच्छं रोपेन्ती''तिआदीसु ''मालावच्छ''न्ति कुलसङ्गहत्थतासूचनकस्स विसेसनस्स सब्भावतो करणकारापनसङ्खातपरियायसब्भावं। इध ''गन्थेन्ती''तिआदीसु तथाविधविसेसवचनाभावतो तस्स परियायस्स अभावञ्च ञत्वा। तं सुवुत्तमेवाति वेदितब्बन्ति योजना।

सब्बं वुत्तनयेनेव वेदितब्बन्ति अट्ठकथासु आगतनयेनेव रोपनादि, गन्थापनादि च सब्बं वेदितब्बं। न हेत्थ सन्देहो कातब्बोति निगमेति।

हरणादीसूति वत्थुपूजनत्थाय हरणादीसु। **कुलित्थिआदीनं अत्थाय हरणतो**ति कुलित्थिआदीनं हरणस्सेव विसेसेत्वा पटिक्खित्तत्ताति अधिप्पायो। तेनाह **''हरणाधिकारे ही''**तिआदि। **मञ्जरी**ति पुप्फगोच्छं। **वटंसको**ति कण्णस्स उपरि पिळन्धनत्थं कतपुप्फविकति, सो च ''वटंसो''ति वुच्चति। **कण्णिका**ति बहूनं पुप्फानं वा मालानं वा एकतो बन्धितस्स नामं, ''कण्णाभरण''न्तिपि वदन्ति। **हारसदिस**न्ति मुत्ताहारसदिसं।

कप्पियेनाति कप्पियउदकेन। **तेसंयेव द्विन्न**न्ति कुलदूसनपरिभोगानं द्विन्नं। **दुक्कट**न्ति कुलसङ्गहत्थाय सयं सिञ्चने, कप्पियवोहारेन वा अकप्पियवोहारेन वा सिञ्चापने च दुक्कटं, परिभोगत्थाय पन सयं सिञ्चने, अकप्पियवोहारेन सिञ्चापने च दुक्कटं। **पयोगबहुलताया**ति सयं करणे, कायपयोगस्स कारापने च वचीपयोगस्स च बहुत्तेन।

गन्थेन निब्बत्तं दामं **गन्थिमं**। एसेव नयो सेसेसुपि। **न वट्टती**ति वत्थुपूजनत्थायपि न वट्टति, दुक्कटन्ति अत्थो। **वट्टती**ति वत्थुपूजनत्थाय वट्टति, कुलसङ्गहत्थाय पन कप्पियवोहारेन कारापेन्तस्सापि दुक्कटमेव।

नीपपुप्फं नाम कदम्बपुप्फं। **पुरिमनयेनेवा**ति ''भिक्खुस्स वा''तिआदिना वुत्तनयेन।

कदलिक्खन्धम्हीतिआदिना वुत्तं सब्बमेव सन्धाय **''तं अतिओळारिकमेवा''**ति वुत्तं, सब्बत्थ करणे, अकप्पियवचनेन कारापने च दुक्कटमेवाति अत्थो। **''पुप्फविज्झनत्थं कण्टकं बन्धितुम्पि न वट्टती''**ति इमस्स उपलक्खणत्ता पुप्फदामोलम्बनादिअत्थाय रज्जुबन्धनादिपि न वट्टतीति केचि वदन्ति, अञ्ञे पन ''पुप्फविज्झनत्थं कण्टकन्ति विसेसितत्ता तदत्थं कण्टकमेव बन्धितुं न वट्टति, तञ्च अट्ठकथापमाणेना''ति वदन्ति, वीमंसित्वा गहेतब्बं। **पुप्फपटिच्छकं** नाम दण्डादीहि कतं पुप्फाधानं, एतम्पि नागदन्तकम्पि सछिद्दकमेव गहेतब्बं। **असोकपिण्डिया**ति असोकसाखानं, पुप्फानं वा समूहे।

धम्मरज्जु नाम चेतियादीनि परिक्खिपित्वा तेसञ्च रज्जुया च अन्तरा पुप्फप्पवेसनत्थाय बन्धरज्जु। ''सिथिलवट्टिता वा रज्जुवट्टिअन्तरे पुप्फप्पवेसनत्थाय एवं बन्धा''तिपि वदन्ति।

मत्थकदामन्ति धम्मासनादिमत्थकलम्बकदामं। **तेसंयेवा**ति उप्पलादीनं एव। **वाकेन वा दण्डकेन वा**ति पुप्फनाळं फालेत्वा पुप्फेन एकाबद्धं ठितवाकेन, दण्डकेन च एकबन्धनेनेव, एतेन पुप्फं बीजगामे सङ्गहं न गच्छति पञ्चसु बीजेसु अप्पविट्ठत्ता पण्णं विय, तस्मा कप्पियं अकारापेत्वापि कोपने दोसो नत्थि। यञ्च छिन्नस्सापि मकुळस्स विकसनं, तम्पि अतितरुणस्स अभावा वुड्ढिलक्खणं न होति, परिणतस्स पन मकुळस्स पत्तानं सिनेहे परियादानं गते विसुंभावो एव विकासो, तेनेव छिन्नमकुळविकासो अच्छिन्नमकुळविकासतो परिहीनो, मिलातयुत्तो वा दिस्सति। यञ्च मिलातस्स उदकसञ्ञोगे अमिलानतापज्जनं, तम्पि तम्बुलपण्णादीसु समानन्ति वुड्ढिलक्खणं न होति, पाळिअट्ठकथादीसु च न कत्थचि पुप्फानं कप्पियकरणं आगतं, तस्मा पुप्फं सब्बथा अबीजमेवाति विञ्ञायति, वीमंसित्वा गहेतब्बं। ''**पसिब्बके विया**''ति वुत्तत्ता पुप्फपसिब्बके वा पसिब्बकसदिसबन्धे वा यत्थ कत्थचि चीवरे वा पक्खिपितुं वट्टतीति सिद्धं। **बन्धितुं न वट्टती**ति रज्जुआदीहि बन्धनं सन्धाय वुत्तं, पुप्फस्सेव पन अच्छिन्नदण्डवाकेहि बन्धितुं वट्टति एव।

पुप्फपटे च दट्ठब्बन्ति पुप्फपटं करोन्तस्स दीघतो पुप्फदामस्स हरणपच्चाहरणवसेन पूरणं सन्धाय वुत्तं, तिरियतो हरणं पन वायिमं नाम होति, न पूरिमं। ''**पुरिमट्ठानं अतिक्कामेती**''ति सामञ्ञतो वुत्तत्ता पुरिमं पुप्फकोटिं फुसापेत्वा वा अफुसापेत्वा वा परिक्खिपनवसेन पन अतिक्कमन्तस्स आपत्तियेव। **बन्धितुं वट्टती**ति पुप्फरहिताय सुत्तवाककोटिया बन्धितुं वट्टति। ''**एकवारं हरित्वा वा परिक्खिपित्वा वा**''ति इदं पुब्बे वुत्तचेतियादिपरिक्खेपं, पुप्फपटकरणञ्च सन्धाय वुत्तं।

परेहि पूरितन्ति दीघतो पसारितं। **वायितु**न्ति तिरियतो हरितुं, तं पन एकवारम्पि न लब्भति। **पुप्फानि ठपेन्तेना**ति अगन्थितपुप्फानि अञ्ञमञ्ञं फुसापेत्वापि ठपेन्तेन। **घटिकदामओलम्बको**ति हेट्ठाभागे घटिकाकारयुत्तो, दारुघटिकाकारो वा ओलम्बको। सुत्तमयं **गेण्डुकं** नाम। **सब्बत्था**ति गन्थिमादीसु सब्बत्थ।

रेचकन्ति अभिनयं, ''एवं नच्चाही''ति नटनाकारदस्सनन्ति अत्थो, ''चक्कं विय अत्तानं भमापन''न्तिपि केचि। **आकासेयेव कीळन्ती**ति ''अयं सारी असुकपदं मया नीता''ति एवं मुखेनेव उभोपि वदन्ता कीळन्ति। **जूतफलके**ति जूतमण्डले। **पासककीळाया**ति द्विन्नं तिवङ्गुलप्पमाणानं दारुदन्तादिमयानं पासकानं चतूसु पस्सेसु एककादिवसेन बिन्दूनि कत्वा फलके खिपित्वा उपरिभागे दिट्ठबिन्दूनं वसेन सारियो अपनेत्वा कीळनकजूतकीळाय।

मञ्जट्ठि नाम मञ्जट्ठरुक्खसारकसावं। **सलाकहत्थ**न्ति नाळिकेरहीरादीनं कलापस्सेतं नामं। पाळियं **थरुस्मि**न्ति खग्गे। **उस्सेळेन्ती**ति मुखेन उस्सेळनसद्दं पमुञ्चन्ति, महन्तं अब्यत्तसद्दं पवत्तेन्तीति अत्थो। **अप्फोटेन्ती**ति द्विगुणितवामहत्थे दक्खिणहत्थेन ताळेत्वा सद्दं करोन्ति। **मुखडिण्डिम**न्ति मुखभेरी।

४३२. **तेस**न्ति समासे गुणीभूतानि पब्बानिपि परामसति। **बोन्दो**ति लोलो, मन्दधातुकोति अत्थो। **भकुटिं कत्वा**ति भमुकभेदं कत्वा। **नेला**ति निद्दोसा।

४३३. पाळियं ''**सारिपुत्ता**''ति इदं एकसेसनयेन सारिपुत्तमोग्गल्लानानं उभिन्नं आलपनं, तेनेव बहुवचननिद्देसो कतो।

४३५. **अट्ठारस वत्तानी**ति ''न उपसम्पादेतब्ब''न्तिआदीनि ''न भिक्खूहि सम्पयोजेतब्ब''न्ति परियोसानानि **कम्मक्खन्धके** (चूळव॰ ७) आगतानि अट्ठारस वत्तानि। **न पन्नलोमा**ति न पतितमानलोमा, अननुकूलवत्तिनोति अत्थो।

४३७. **परसन्तकं देति दुक्कटमेवा**ति विस्सासगाहेन दानं सन्धाय वुत्तं। **थुल्लच्चय**न्ति एत्थ भण्डदेय्यम्पि होति एव।

तञ्च खो वत्थुपूजनत्थायाति मातापितूनम्पि पुप्फं देन्तेन वत्थुपूजनत्थायेव दातब्बन्ति दस्सेति। **मण्डनत्थाय पन सिवलिङ्गादिपूजनत्थाया**ति एत्तकमेव वुत्तत्ता ''इमं विक्किणित्वा जीविस्सन्ती''ति मातापितूनं दातुं वट्टति, सेसञातीनं पन तावकालिकमेव दातुं वट्टति। **जातिसामणेरेहेवा**ति तेसं गिहिकम्मपरिमोचनत्थं वुत्तं। **इतरे**ति अञ्ञातका, तेहिपि सामणेरेहि आचरियुपज्झायानं वत्तसीसेन हरितब्बं। **चूळक**न्ति उपड्ढभागतोपि उपड्ढं।

सामणेरा...पे॰... ठपेन्तीति अरक्खितागोपितं सन्धाय वुत्तं। **तत्थ तत्था**ति मग्गे वा चेतियङ्गणे वा। ''**सामणेरेहि दापेतुं न लभन्ती**''ति इदं सामणेरेहि गिहीनं कम्मं कारितं विय होतीति वुत्तं, न पन पुप्फदानं होतीति सामणेरानम्पि न वट्टनतो। वुत्तञ्च ''**सयमेवा**''तिआदि। ''**अविसेसेन वुत्त**''न्ति इमिना सब्बेसम्पि न वट्टतीति दस्सेति।

खीणपरिब्बयानन्ति आगन्तुके सन्धाय वुत्तं। परिच्छिन्नेसुपि रुक्खेसु ''**इध फलानि सुन्दरानी**''तिआदिं वदन्तेन कुलसङ्गहो कतो नाम होतीति आह ''**एवं पन न वत्तब्ब**''न्ति।

रुक्खच्छल्लीति रुक्खत्तचो। अभाजनीयत्ता **गरुभण्डं** वुत्तं। **वुत्तनयेना**ति पण्णदानम्पि **पुप्फफलादीसु** वुत्तनयेन कुलसङ्गहो होतीति दस्सेति।

पुब्बे वुत्तप्पकारन्ति मम वचनेन भगवतो पादे वन्दथातिआदिना **वुत्तप्पकारसिक्खापदे** पठमं वुत्तं। ''पक्कमतायस्मा''ति इदं पब्बाजनीयकम्मवसेन वुत्तं। पुन ''पक्कमतायस्मा''ति इदम्पि पब्बाजनीयकम्मकतस्स वत्तवसेन वुत्तं। एत्थ च अस्सजिपुनब्बसुकेहि आचरियेसु अनेकविधेसु अनाचारेसु पञ्ञपेतब्बा आपत्तियो सिक्खापदन्तरेसु पञ्ञत्ता एवाति ता इध अपञ्ञपेत्वा कुलदूसकानं पब्बाजनीयकम्मवसेन निग्गहं कातुं तत्थेव सम्मा अवत्तित्वा कारकसङ्घं छन्दगामितादीहि पापेन्तानं समनुभासनाय सङ्घादिसेसं आरोपितञ्च इदं सिक्खापदं पञ्ञत्तन्ति वेदितब्बं। **पठमसङ्घभेदसदिसानेवा**ति एत्थ अङ्गेसुपि यथा तत्थ परक्कमनं, एवमिध छन्दादीहि पापनं दट्ठब्बं। सेसं तादिसमेवाति।

कुलदूसकसिक्खापदवण्णना निट्ठिता।

निगमनवण्णना

४४२. इतरे पन यावततियकाति वेदितब्बाति सम्बन्धो। यो हि जरो एकस्मिं दिवसे आगन्त्वापि गतो अनन्तरेसु द्वीसु दिवसेसु अनुप्पज्जित्वा ततिये दिवसे उप्पज्जति, सो **ततियको**। यो पन ततियेपि अनुप्पज्जित्वा चतुत्थे एव दिवसे उप्पज्जति, सो **चतुत्थको** चाति वुच्चति। तं सन्धायाह ''**यथा ततिये**''तिआदि। ''**अकामेन अवसेना**''ति इमिना अप्पटिकम्मकरणं नाम यस्मा अलज्जिलक्खणं, सग्गमोक्खावरणञ्च, तस्मा आपन्नो पुग्गलो ''पच्छा परिवसिस्सामी''ति विक्खिपितुं न लभति, सङ्घेन च अनिच्छन्तस्सेव परिवासो दातब्बोति दस्सेति। पाळियं **चिण्णमानत्तो भिक्खु...पे॰... अब्भेतब्बो**ति एत्थ यो भिक्खु चिण्णमानत्तो, सो भिक्खु अब्भेतब्बोति एवं भिक्खुसद्दद्वयस्स योजना वेदितब्बा। **ते च भिक्खू गारय्हा**ति ऊनभावं ञत्वा अब्भेन्ति, दुक्कटापज्जनेन गरहितब्बा। **सामीची**ति वत्तं।

इति समन्तपासादिकाय विनयट्ठकथाय विमतिविनोदनियं

तेरसकवण्णनानयो निट्ठितो।

३. अनियतकण्डो

१. पठमअनियतसिक्खापदवण्णना

४४३. पुत्तसद्देन सामञ्ञनिद्देसतो, एकसेसनयेन वा पुत्तीपि गहिताति आह **''बहू धीतरो चा''**ति। **तदनन्तर**न्ति भिक्खूनं भोजनानन्तरं।

४४४-५. **तं कम्म**न्ति तं मेथुनादिअज्झाचारकम्मं। पाळियं **''सोतस्स रहो''**ति इदं अत्थुद्धारवसेन वुत्तं, उपरि सिक्खापदे ''न हेव खो पन पटिच्छन्न''न्तिआदिना (पारा० ४५४) एतस्स सिक्खापदस्स विसयं पटिक्खिपित्वा ''अलञ्च खो होति मातुगामं दुट्ठुल्लाहि वाचाहि ओभासितु''न्ति विसयन्तरभूतसोतरहस्स विसुं वक्खमानत्ता, इध पन चक्खुरहोव अधिप्पेतो ''पटिच्छन्ने आसने''तिआदिवचनतो, ''सक्का होति मेथुनं धम्मं पटिसेवितु''न्ति वुत्तत्ता च। तेनाह **''किञ्चापी''**तिआदि। **परिच्छेदो**ति रहोनिसज्जापत्तिया ववत्थानं।

इदानि चक्खुरहेनेव आपत्तिं परिच्छिन्दित्वा दस्सेन्तो **''सचेपि ही''**तिआदिमाह। **''पिहितकवाटस्सा''**ति इमिना पटिच्छन्नभावतो चक्खुस्स रहोव अधिप्पेतो, न सोतस्स रहोति दस्सेति। तेनाह **''अपिहितकवाटस्स...पे०... अनापत्ती''**न्ति। न हि कवाटपिदहनेन सोतस्स रहो विगच्छति, चक्खुस्स रहो एव पन विगच्छति। **''अन्तोद्वादसहत्थेपी''**ति इदं दुतियसिक्खापदे आगतसोतस्स रहेन आपज्जितब्बदुट्ठुल्लवाचापत्तिया सब्बथा अनापत्तिभावं दस्सेतुं वुत्तं। द्वादसहत्थतो बहि निसिन्नो हि तत्थ सोतस्स रहसब्भावतो दुट्ठुल्लवाचापत्तिया अनापत्तिं न करोति, तथा च ''अनापत्तिं न करोती''ति सामञ्ञतो न वत्तब्बं सिया, ''मेथुनकायसंसग्गापत्तीहि अनापत्तिं करोती''ति विसेसेत्वा वत्तब्बं भवेय्य। तस्मा तथा तं अवत्वा सब्बथा अनापत्तिं दस्सेतुमेव ''द्वादसहत्थे''ति वुत्तन्ति गहेतब्बं। यदि हि चक्खुस्सेव रहभावं सन्धाय वदेय्य, ''अन्तोद्वादसहत्थे''ति न वदेय्य अप्पटिच्छन्ने ततो दूरे निसिन्नेपि चक्खुस्स रहासम्भवतो। यस्मा निसीदित्वा निद्दायन्तो कपिमिद्धपरेतो किञ्चि कालं चक्खूनि उम्मीलेति, किञ्चि कालं निम्मीलेति। तस्मा **''निद्दायन्तोपि अनापत्तिं करोती''**ति वुत्तं।

पटिलद्धसोतापत्तिफलाति अन्तिमपरिच्छेदतो वुत्तं। **निसज्जं पटिजानमानो**ति मेथुनकायसंसग्गादिवसेन रहो निसज्जं पटिजानमानोति अत्थो। तेनाह **''पाराजिकेन वा''**तिआदि। **न अप्पटिजानमानो**ति अलज्जीपि अप्पटिजानमानो आपत्तिया न कारेतब्बोव। सो हि याव दोसं न पटिजानाति, ताव ''नेव सुद्धो, नासुद्धो''ति वा वत्तब्बो, वत्तानुसन्धिना पन कारेतब्बो। वुत्तञ्हेतं –

> ''पटिञ्ञा लज्जीसु कता, अलज्जीसु एवं न विज्जति।
> बहुम्पि अलज्जी भासेय्य, वत्तानुसन्धितेन कारये''ति॥ (परि० ३५९)।

निसज्जादीसु...पे०... पटिजानमानोव तेन सो भिक्खु कारेतब्बोति एत्थ **पटिजानमानो**ति पाळियं अनागतम्पि अधिकारतो आगतमेवाति कत्वा वुत्तं।

वदापेथाति तस्स इद्धिया विगतासङ्कोपि तं ओवदन्तो आह, अनुपपरिक्खित्वा अदेसे निसिन्ना ''मातुगामेन सद्धिं एकासने थेरो रहो निसिन्नो''ति एवं मादिसेहिपि तुम्हे तुम्हाकं अवण्णं वदापेथ कथापयित्थ, मा पुन एवं करित्थाति अधिप्पायो। **एवमकासि**न्ति निगूहितब्बम्पि इमं विसेसाधिगमं पकासेन्तो तं सद्धापेतुमेव एवमकासिन्ति अत्थो। **रक्खेय्यासिम**न्ति इमं उत्तरिमनुस्सधम्मं अञ्ञेसं मा पकासयि।

४५१. **निसज्जाय पाचित्तिय**न्ति रहोनिसज्जस्सादे वत्तमाने पाचित्तियं। सचे पन सो रहोनिसज्जस्सादं पटिविनोदेत्वा कम्मट्ठानमनसिकारादिना अञ्ञविहितो, निद्दूपगतो वा अनापत्ति एव। तेनाह **''अस्सादे उप्पन्ने''**ति। **''निसिन्नाय इत्थिया''**ति इमिना निसीदनक्खणे अस्सादाभावं दस्सेति। यदि हि निसीदनक्खणे अस्सादो उप्पज्जेय्य, तेन उट्ठातब्बं। इतरथा आपत्ति एव इत्थिया उट्ठायुट्ठाय पुनप्पुनं निसीदने विय, तत्थापि भिक्खुस्स उट्ठहतो अनापत्ति, तेन रहोनिसज्जापत्ति अकिरियसमुट्ठानापि होतीति वदन्ति। इदं पन अनियतसिक्खापदं, अनन्तरञ्चाति द्वेपि विसुं आपत्तिपञ्ञापनवसेन पञ्ञत्तानि न होन्ति रहोनिसज्जादीसु आपत्तिया सिक्खापदन्तरेसु पञ्ञत्तत्ता। पाराजिकादिआपत्तीहि पन केनचि चोदितस्स अनुविज्जकेहि विनिच्छयकारणनयदस्सनत्थं एवं वत्थुवसेन द्विधा विभजित्वा पञ्ञत्तानि, इमानेव च यस्मा भिक्खुनीनम्पि विनिच्छयनयग्गहणाय अलं, तस्मा तासं विसुं न वुत्तानीति वेदितब्बं। यं पन आपत्तिं पटिजानाति, तस्स वसेनेत्थ अङ्गभेदो वेदितब्बो। तेनेव ''अयं धम्मो अनियतो''ति वुत्तं।

इध अनियतवसेन वुत्तानं पाराजिकसङ्घादिसेसपाचित्तियानं तिण्णम्पि अञ्ञमञ्ञं सदिससमुट्ठानादिताय वुत्तं **''समुट्ठानादीनि पठमपाराजिकसदिसानेवा''**ति।

पठमअनियतसिक्खापदवण्णना निट्ठिता।

२. दुतियअनियतसिक्खापदवण्णना

४५२. ''न लभति मातुगामेन सद्धिं एको एकाय...पे०... निसज्जं कप्पेतु''न्ति अवत्वा ''पटिक्खित्तं मातुगामेना''तिआदिना वुत्तत्ता ''एको''ति पच्चत्तपदं पटिक्खित्तपदेन न समेति, ''एकस्सा''ति वत्तब्बोति साधेन्तो आह **''इतरथा ही''**तिआदि।

४५३. **परिवेणङ्गणादी**ति परिवेणस्स माळकं। **आदि**-सद्देन पाकारादिपरिक्खित्तं चेतियमाळकादिं सङ्गण्हाति। **अन्तोगध**न्ति अप्पटिच्छन्नट्ठाने एव परियापन्नं। इध इत्थीपि अनापत्तिं करोतीति सम्बन्धो। कस्मा पन इत्थी इधेव अनापत्तिं करोति, न पुरिमसिक्खापदेति? इमस्स सिक्खापदस्स मेथुनं विना दुट्ठुल्लवाचाय वसेन आगतत्ता। मेथुनमेव हि इत्थियो अञ्ञमञ्ञं पटिच्छादेन्ति महावने द्वारं विवरित्वा **निद्दूपगतम्हि भिक्खुम्हि** विय। दुट्ठुल्लं पन न पटिच्छादेन्ति, तेनेव दुट्ठुल्लवाचासिक्खापदे ''या ता इत्थियो हिरिमना, ता निक्खमित्वा भिक्खू उज्झापेसु''न्ति (पारा० २८३) वुत्तं, तस्मा **''इत्थीपि अनापत्तिं करोती''**ति वुत्तं, ''अप्पटिच्छन्नट्ठानत्ता''तिपि कारणं वदन्ति।

कायेनापि दुट्ठुल्लोभाससम्भवतो इमस्मिं सिक्खापदे चक्खुस्स रहो, सोतस्स रहो च अधिप्पेतोति आह **''अनन्धो अबधिरो''**तिआदि। केचि पन **विभङ्गे** ''नालं कम्मनियन्ति न सक्का होति मेथुनं धम्मं पटिसेवितु''न्ति (पारा० ४५४) एत्तकमेव वत्वा 'न सक्का होति कायसंसग्गं समापज्जितु'न्ति अवुत्तत्ता अप्पटिच्छन्नेपि ठाने रहो अञ्ञेसं अभावं दिस्वा एकाय इत्थिया कायसंसग्गोपि सक्का आपज्जितुन्ति अन्तोद्वादसहत्थे सवनूपचारे ठितो अबधिरोपि अन्धो कायसंसग्गस्सापि सब्भावाभावं न जानातीति कायेन दुट्ठुल्लोभासनसब्भावं अमनसिकत्वापि कायसंसग्गापत्तियापि परिहाराय अनन्धो अबधिरोतिआदि वुत्त''न्ति वदन्ति। यं पन **सारत्थदीपनियं** ''कायसंसग्गवसेन अनन्धो वुत्तो''ति (सारत्थ० टी० २.४५३) वुत्तं, तं पन कायेन दुट्ठुल्लोभासनसम्भवं अमनसिकत्वा वुत्तं, कायसंसग्गवसेनापीति गहेतब्बं। तेनेव ''इमस्मिं सिक्खापदे सोतस्स रहो एव अधिप्पेतो...पे०... केनचि पन 'द्वेपि रहा इध अधिप्पेता'ति वुत्तं, तं न गहेतब्ब''न्ति वुत्तं। यं पन चक्खुस्स रहाभावसाधनत्थं ''न हि अप्पटिच्छन्ने ओकासे चक्खुस्स रहो सम्भवती''तिआदि वुत्तं, तं न युत्तं अतिदूरतरे ठितस्स कायेन ओभासनम्पि हत्थग्गाहादीनिपि सल्लक्खेतुं असक्कुणेय्यत्ता। तेनेव पाळियं ''चक्खुस्स रहो''ति वुत्तं, अट्ठकथायं अप्पटिक्खित्तं। न केवलञ्च अप्पटिक्खित्तं, अथ खो ''अनन्धो बधिरोति च अन्धो वा अबधिरोपि न करोती''ति च वुत्तं, तस्मा द्वेपि रहा इध गहेतब्बा। **''अन्तोद्वादसहत्थे''**तिइमिना सोतस्स रहो द्वादसहत्थेन परिच्छिन्नोति इदं दस्सेति। चक्खुस्स रहो पन यत्थ ठितस्स कायविकारादयो न पञ्ञायन्ति, तेन परिच्छिन्दितब्बोति दट्ठब्बं। **बधिरो पन चक्खुमापी**ति दुट्ठुल्लवाचासङ्घादिसेसं सन्धाय वुत्तं। **दुट्ठुल्लापत्ति वुत्ता**ति पुरिमसिक्खापदे वुत्तेहि अधिकवसेन दुट्ठुल्लापत्ति च वुत्ताति एवमत्थो गहेतब्बो, न पन दुट्ठुल्लापत्ति एवाति कायसंसग्गस्सापि इध गहेतब्बतो। तेनेव **''पाराजिकापत्तिञ्च परिहापेत्वा''**ति एत्तकमेव वुत्तं, इतरथा ''कायसंसग्गञ्चा''ति वत्तब्बं भवेय्य।

तिसमुट्ठानन्तिआदि पन पुरिमसिक्खापदे आगतेहि अधिकस्स दुट्ठुल्लवाचासङ्घादिसेसस्स वसेन वुत्तं कायसंसग्गादीनम्पि पुरिमसिक्खापदे एव वुत्तत्ता, इध पन न वुत्तन्तिपि वदन्ति, वीमंसित्वा गहेतब्बं।

दुतियअनियतसिक्खापदवण्णना निट्ठिता।

निट्ठितो अनियतवण्णनानयो।

४. निस्सग्गियकण्डो

१. चीवरवग्गो

१. पठमकथिनसिक्खापदवण्णना

४५९. **समिताविना**ति समितपापेन। **गोतमकचेतियं** नाम गोतमयक्खस्स चेतियट्ठाने कतविहारो वुच्चति।

४६१. **नवमं वा दसमं वा**ति भुम्मत्थे उपयोगवचनं। **सचे भवेय्या**ति सचे कस्सचि कङ्खा भवेय्य। **वुत्तसदिस**न्ति दसमं वाति वुत्तसदिसं परिच्छेदसदिसं, ''वुत्तसदिसमेवा''तिपि लिखन्ति। **धारेतु**न्ति एत्थ आहाति पाठसेसो दट्ठब्बो।

४६३. **सूचिया पटिसामन**न्ति सूचिघरे संगोपनं, इदञ्च सूचिकम्मस्स सब्बस्स परिनिट्ठितभावदस्सनत्थं वुत्तं। **एत**न्ति नट्ठचीवरं। **एतेसम्पी**ति नट्ठचीवरादीनि परामसति, तेन चीवरपलिबोधाभावं दस्सेति। **दुतियस्स पलिबोधस्सा**ति आवासपलिबोधस्स। एत्थ च निट्ठितचीवरस्मिं, उब्भतस्मिं कथिनेति द्वीहि पदेहि द्विन्नं पलिबोधानं अभावदस्सनेन अत्थतकथिनस्स पञ्चमासब्भन्तरे याव चीवरपलिबोधआवासपलिबोधेसु अञ्ञतरं न उपच्छिज्जति, ताव अतिरेकचीवरं धारेतुं वट्टतीति दीपेति। पक्कमनं अन्तो अस्साति **पक्कमनन्तिका,** एवं सेसापि वेदितब्बा। वित्थारो पनेत्थ आगतट्ठाने आवि भविस्सति।

दसाहपरमं कालन्ति अच्चन्तसंयोगवचनं। **इदञ्हि वुत्तं होति...पे०... दसाहपरमभावो**ति इदं दसाहपरमतापदस्स अत्थमत्तदस्सनं, दसाहपरमभावोति इदञ्हि वुत्तं होतीति एवमेत्थ योजना वेदितब्बा। अयमत्थोतिआदि दसाहपरमपदस्सेव अधिप्पेतत्थदस्सनवसेन वुत्तं। तत्थ **एत्तको कालो**ति ''दसाहपरमता''ति वुत्तो यो कालो, सो एत्तको कालोति अत्थो।

खोमन्ति खोमसुत्तेहि वायितं खोमपटचीवरं, तं वाकमयन्ति वदन्ति। कप्पाससुत्तेहि वायितं **कप्पासिकं,** एवं सेसानिपि। **कम्बल**न्ति एळकादीनं लोममयसुत्तेन वायितपटं। **भङ्ग**न्ति खोमसुत्तादीनि सब्बानि, एकच्चानि वा मिस्सेत्वा वायितं चीवरं। भङ्गम्पि वाकमयमेवाति केचि। दुकूलं पत्तुण्णं सोमारपटं चीनपटं इद्धिजं देवदिन्नन्ति इमानि पन छ चीवरानि एतेसञ्ञेव अनुलोमानीति विसुं न वुत्तानि। **दुकूल**ञ्हि साणस्स अनुलोमं वाकमयत्ता। **''पत्तुण्णं** कोसेय्यविसेसो''ति **अभिधानकोसे** वुत्तं। सोमारदेसे, चीनदेसे च जातवत्थानि **सोमारचीनपटानि।** पत्तुण्णादीनि तीणि कोसेय्यस्स अनुलोमानि पाणकेहि कतसुत्तमयत्ता। **इद्धिज**न्ति एहिभिक्खूनं पुञ्ञिद्धिया निब्बत्तचीवरं। कप्परुक्खे निब्बत्तं, **देवदिन्न**ञ्च खोमादीनं अञ्ञतरं होतीति तेसं सब्बेसं अनुलोमानि। मनुस्सानं पकतिविदत्थिं सन्धाय **''द्वे विदत्थियो''**तिआदि वुत्तं। इमिना दीघतो वड्ढकीहत्थप्पमाणं वित्थारतो ततो उपड्ढप्पमाणं विकप्पनुपगन्ति दस्सेति। तथा हि ''सुगतविदत्थि नाम इदानि मज्झिमस्स पुरिसस्स तिस्सो विदत्थियो, वड्ढकीहत्थेन दियड्ढो हत्थो होती''ति (पारा० अट्ठ० २.३४८-३४९) **कुटिकारसिक्खापदट्ठकथायं** वुत्तं, तस्मा सुगतङ्गुलेन द्वादसङ्गुला सुगतविदत्थि वड्ढकीहत्थेन दियड्ढो हत्थोति सिद्धं। एवञ्च कत्वा ''सुगतङ्गुलेन अट्ठङ्गुलं वड्ढकीहत्थप्पमाण''न्ति आगतट्ठानेहि च समेति।

तं अतिक्कामयतोति एत्थ **तं**न्ति चीवरं, कालं वा परामसति। **तस्स यो अरुणो**ति चीवरुप्पाददिवसस्स यो अतिक्कन्तो अरुणो। **चीवरुप्पाददिवसेन सद्धि**न्ति चीवरुप्पाददिवसस्स आदिभूतेन अतिक्कन्तअरुणेन सद्धिन्ति अत्थो, इदञ्च भगवता ''दसाहपरम''न्ति वत्वा पुन ''एकादसे अरुणुग्गमने''ति वुत्तत्ता पुब्बापरसंसन्दनत्थं सद्दतो गम्ममानम्पि ''चीवरुप्पाददिवसेन सद्धि''न्ति एवं वुत्तं। ''दसमे अरुणे''ति वुत्ते एव हि दसाहपरमेन सद्धिं समेति। दिवसपरियोसानस्स अवधिभूतअनागतारुणवसेन हि दिवसं अतिक्कन्तं नाम होति, न पन दिवसस्स आदिभूतारुणवसेन परिवासादीसु तथा अग्गहणतो, इध पन भगवता दिवसस्स आदिअन्तपरिच्छेददस्सनवसेन **''एकादसे अरुणुग्गमने''**ति वुत्तं, तस्मा **अट्ठकथायं** दिवसस्स आदिभूतं तंदिवसनिस्सितम्पि अरुणं गहेत्वा ''एकादसे अरुणुग्गमने निस्सग्गियं होती''ति वुत्तं। **अरुणो**ति चेत्थ सूरियुग्गमनस्स पुरेचरो वड्ढनघनरत्तो पभाविसेसोति दट्ठब्बो।

वचनीयोति सङ्घापेक्खो। **वचनभेदो**ति ''ञत्तियं द्वे आपत्तियो सरती''तिआदिना वत्तब्बन्ति अधिप्पायो।

४६८. **''न इध सञ्ञा रक्खती''**ति इदं वेमतिकञ्च अनतिक्कन्तसञ्ञञ्च सन्धाय वुत्तं। **योपि एवंसञ्ञी तस्सपी**ति यो अनतिक्कन्तसञ्ञी, वेमतिको वा, तस्सपीति अत्थो। अनट्ठतो अविलुत्तस्स विसेसमाह **''पसय्हावहारवसेना''**ति। थेय्यावहारवसेन गहितम्पि इध नट्ठं।

अनापत्ति अञ्ञेन कतं पटिलभित्वातिआदि निसीदनसन्थतं सन्धाय वुत्तं। येन हि पुराणसन्थतस्स सामन्ता सुगतविदत्थिं अनादियित्वा नवं निसीदनसन्थतं कतं, तस्स तं निस्सग्गियम्पि ततो अञ्ञस्स पटिलभित्वा परिभुञ्जन्तस्स अनापत्तिकरन्ति सिज्झनतो अयमत्थो सब्बनिस्सग्गियेसुपि सिज्झति।

४६९. **तिचीवरं अधिट्ठातु**न्ति सङ्घाटिआदिनामेन अधिट्ठातुं। **''न विकप्पेतु''**न्ति इमिना नामेन न विकप्पेतुं, एतेन विकप्पिततिचीवरो तेचीवरिको न होति। तस्स तस्मिं अधिट्ठिततिचीवरे विय अविप्पवासादिना कत्तब्बविधि न कातब्बोति दस्सेति, न पन विकप्पने दोसोति। **ततो पर**न्ति चतुमासतो परं विकप्पेत्वा परिभुञ्जितुं अनुञ्ञातन्ति केचि वदन्ति, अञ्ञे पन ''विकप्पेत्वा याव आगामिवस्सानं, ताव ठपेतुमेव वट्टती''ति वदन्ति, अपरे पन ''विकप्पने न दोसो, तथा विकप्पितं परिक्खारादिनामेन अधिट्ठहित्वा परिभुञ्जितब्ब''न्ति वदन्ति।

मुट्ठिपञ्चकन्ति मुट्ठिया उपलक्खितं पञ्चकं, चतुहत्थे मिनित्वा पञ्चमं हत्थं मुट्ठिं कत्वा मिनितब्बन्ति अधिप्पायो। केचि पन ''मुट्ठिहत्थानं पञ्चकं मुट्ठिपञ्चकं, तस्मा पञ्चपि हत्थे मुट्ठिं कत्वाव मिनितब्बा''ति वदन्ति। **मुट्ठित्तिक**न्ति एत्थापि एसेव नयो। द्विहत्थेन अन्तरवासकेन तिमण्डलं पटिच्छादेतुं सक्काति आह **''पारुपनेना''**तिआदि। **अतिरेक**न्ति सुगतचीवरप्पमाणतो अधिकं। **ऊनक**न्ति मुट्ठिपञ्चकादितो ऊनकं, तेन च तेसु तिचीवराधिट्ठानं न रुहतीति दस्सेति।

इमं सङ्घाटिं पच्चुद्धरामीति इमं सङ्घाटिअधिट्ठानं उक्खिपामि परिच्चजामीति अत्थो। **कायविकारं करोन्तेना**ति हत्थेन चीवरं परामसन्तेन, चालेन्तेन वा। **वाचाय अधिट्ठातब्बा**ति एत्थ कायेनपि चालेत्वा वाचम्पि भिन्दित्वा कायवाचाहि अधिट्ठानम्पि सङ्गहितन्ति वेदितब्बं ''कायेन अफुसित्वा''ति वुत्तत्ता। **दुविध**न्ति अहत्थपासहत्थपासवसेन दुविधं। तत्थ **हत्थपासो** नाम अड्ढतेय्यहत्थो वुच्चति। द्वादसहत्थन्ति केचि वदन्ति, तं इध न समेति। **''सामन्तविहारे''**ति इदं ठपितट्ठानसल्लक्खणयोग्गे ठितं सन्धाय वुत्तं। ततो दूरे ठितम्पि ठपितट्ठानं सल्लक्खेन्तेन अधिट्ठातब्बमेव। तत्थापि चीवरस्स ठपितभावसल्लक्खणमेव पमाणं। न हि सक्का सब्बथा ठानं सल्लक्खेतुं। एकस्मिं विहारे ठपेत्वा ततो अञ्ञस्मिं ठपितन्ति अधिट्ठातुं न वट्टति। केचि पन ''तथापि अधिट्ठिते न दोसो''ति वदन्ति, तं अट्ठकथाय न समेति, वीमंसितब्बं। **अधिट्ठहित्वा ठपितवत्थेही**ति परिक्खारचोळनामेन अधिट्ठहित्वा ठपितवत्थेहि, तेनेव ''इमं पच्चुद्धरामी''ति परिक्खारचोळस्स पच्चुद्धारं दस्सेति। एतेन च तेचीवरधुतङ्गं परिहरन्तेन पंसुकूलादिवसेन लद्धं वत्थं दसाहब्भन्तरे कत्वा रजित्वा पारुपितुं असक्कोन्तेन परिक्खारचोळवसेन अधिट्ठहित्वाव दसाहं अतिक्कमेतब्बं, इतरथा निस्सग्गियं होतीति दस्सेति। तेनेव ''रजितकालतो पन पट्ठाय निक्खिपितुं न वट्टति, धुतङ्गचोरो नाम होती''ति (विसुद्धि० १.२५) **विसुद्धिमग्गे** वुत्तं। **''पुन अधिट्ठातब्बानी''**ति इदञ्च सङ्घाटिआदितिचीवरनामेन अधिट्ठहित्वा परिभुञ्जितुकामस्स वसेन वुत्तं, इतरस्स पन पुरिमाधिट्ठानमेव अलन्ति वेदितब्बं। **''पुन अधिट्ठातब्ब''**न्ति इमिना कप्पबिन्दुपि दातब्बन्ति दस्सेति।

बद्धसीमायं अविप्पवाससीमासम्मुतिसम्भवतो न तत्थ दुप्परिहारताति आह **''अबद्धसीमायं दुप्परिहार''**न्ति।

अतिरित्तप्पमाणाय छेदनकं पाचित्तियन्ति आह **''अनतिरित्तप्पमाणा''**ति। **ततो परं पच्चुद्धरित्वा विकप्पेतब्बा**ति वस्सिकमासतो परं अधिट्ठानं पच्चुद्धरित्वा विकप्पेतब्बा, इमिना चतुन्नं वस्सिकमासानं उपरि अधिट्ठानं तिट्ठतीति विञ्ञायति ततो पच्चुद्धरायोगा। यञ्च **मातिकाट्ठकथायं** ''वस्सिकसाटिका वस्सानमासातिक्कमेनापि, कण्डुपटिच्छादि आबाधवूपसमेनापि अधिट्ठानं विजहती''ति (कङ्खा० अट्ठ० कथिनसिक्खापदवण्णना) वुत्तं, तं **समन्तपासादिकायं** नत्थि। **परिवारट्ठकथायञ्च** ''अत्थापत्ति हेमन्ते आपज्जति, नो गिम्हे''ति एत्थ इदं वुत्तं ''कत्तिकपुण्णमासिया पच्छिमे पाटिपददिवसे

विकप्पेत्वा ठपितं वस्सिकसाटिकं निवासेन्तो हेमन्ते आपज्जति, कुरुन्दियं पन 'कत्तिकपुण्णमदिवसे अपच्चुद्धरित्वा हेमन्ते आपज्जती'ति वुत्तं, तम्पि सुवुत्तं, 'चतुमासं अधिट्ठातुं ततो परं विकप्पेतु'न्ति हि वुत्त''न्ति (परि० अट्ठ० ३२३)। तत्थ **महाअट्ठकथायं** निवासनपच्चया दुक्कटं वुत्तं, **कुरुन्दट्ठकथायं** पन अपच्चुद्धारपच्चया, तस्मा कुरुन्दियं वुत्तनयेनापि वस्सिकसाटिका वस्सानमासातिक्कमेपि अधिट्ठानं न विजहतीति पञ्ञायति। अधिट्ठानविजहनेसु च वस्सानमासआबाधानं विगमेन विजहनं **मातिकाट्ठकथायम्पि** न उद्धटं, तस्मा **समन्तपासादिकायं** आगतनयेन याव पच्चुद्धारा अधिट्ठानं तिट्ठतीति गहेतब्बं। नहानत्थाय अनुञ्ञातत्ता **''वण्णभेदमत्तरत्तापि चेसा वट्टती''**ति वुत्तं। **''द्वे पन न वट्टन्ती''**ति इमिना सङ्घाटिआदीसु विय दुतिये अधिट्ठानं न रुहति, अतिरेकचीवरं होतीति दस्सेति। **महापच्चरियं** चीवरवसेन परिभोगकिच्चस्स अभावं सन्धाय अनापत्ति वुत्ता सेनासनपरिक्खारत्थाय दिन्नपच्चत्थरणे विय। यं पन ''पच्चत्थरणम्पि अधिट्ठातब्ब''न्ति वुत्तं, तं सेनासनत्थायेवाति नियमितं न होति नवसु चीवरेसु गहितत्ता, तस्मा अत्तनो नामेन अधिट्ठहित्वा निदहित्वा परिक्खारचोळं विय यथा तथा विनियुज्जितब्बमेवाति गहेतब्बं। **पावारो कोजवो**ति इमेसम्पि पच्चत्थरणादीनं लोकेपि वोहरणतो सेनासनपरिक्खारत्थाय दिन्नपच्चत्थरणतो विसुं गहणं कतं।

''हीनायावत्तनेना''ति इदं अन्तिमवत्थुं अज्झापज्जित्वा भिक्खुपटिञ्ञाय ठितस्स चेव तित्थियपक्कन्तस्स च भिक्खुनिया च भिक्खुनिभावे निरपेक्खताय गिहिलिङ्गतित्थियलिङ्गग्गहणं सन्धाय वुत्तं। सिक्खं अपच्चक्खाय गिहिभावूपगमनं सन्धाय वुत्तन्ति केचि वदन्ति, तं न युत्तं तदापिस्स उपसम्पन्नत्ता, चीवरस्स च तस्स सन्तकत्ताविजहनतो। **पमाणचीवरस्सा**ति पच्छिमप्पमाणं सन्धाय वुत्तं। **द्वे चीवरानि पारुपन्तस्सा**ति गामप्पवेसे दिगुणं कत्वा सङ्घाटियो पारुपनं सन्धाय वुत्तं। **''एस नयो''**ति इमिना पमाणयुत्तेसु यत्थ कत्थचि छिद्दं अधिट्ठानं विजहतीतिआदिअत्थं सङ्गण्हाति।

अञ्ञं पच्छिमप्पमाणं नाम नत्थीति सुत्ते आगतं नत्थीति अधिप्पायो। इदानि तमेव विभावेतुं **''यञ्ही''**तिआदि वुत्तं, तं न समेति, सङ्घाटिआदीनं मुट्ठिपञ्चकादिहेट्ठिमप्पमाणस्स सुत्ते अनागतत्ताति अधिप्पायो।

महन्तं वा खुद्दकं करोतीति एत्थ अतिमहन्तं चीवरं मुट्ठिपञ्चकादिपच्छिमप्पमाणयुत्तं कत्वा समन्ततो छिन्दनेनापि विच्छिन्दनकाले छिज्जमानट्ठानं छिद्दसङ्ख्यं न गच्छति अधिट्ठानं न विजहति एवाति सिज्झति, ''घटेत्वा छिन्दति, न भिज्जती''ति वचनेन च समेति। परिक्खारचोळं पन विकप्पनुपगपच्छिमप्पमाणतो ऊनं कत्वा छिन्नं अधिट्ठानं विजहति अधिट्ठानस्स अनिस्सयत्ता। तानि पुन बद्धानि घटितानि अधिट्ठातब्बमेवाति वेदितब्बं। केचि पन ''वस्सिकसाटिकचीवरे द्विधा छिन्ने यदिपि एकेकं खण्डं पच्छिमपच्छिमप्पमाणं पहोति, एकस्मिंयेव खण्डे अधिट्ठानं तिट्ठति, न इतरे, ''द्वे पन न वट्टन्ती''ति वुत्तत्ता। निसीदनकण्डुप्पटिच्छादीसुपि एसेव नयोति वदन्ति।

सम्मुखे पवत्ता **सम्मुखा**ति पच्चत्तवचनं, तञ्च विकप्पनविसेसनं, तस्मा ''सम्मुखे''ति भुम्मत्थे निस्सक्कवचनं कत्वापि अत्थं वदन्ति, अभिमुखेति अत्थो। अथ वा सम्मुखेन अत्तनो वाचाय एव विकप्पना **सम्मुखाविकप्पना**। परम्मुखेन विकप्पना **परम्मुखाविकप्पना**ति करणत्थेनापि अत्थो दट्ठब्बो, अयमेव पाळिया समेति। **सन्निहितासन्निहितभाव**न्ति आसन्नदूरभावं। **एत्तावता निधेतुं वट्टती**ति एत्तकेनेव विकप्पनाकिच्चस्स निट्ठितत्ता, अतिरेकचीवरं न होतीति दसाहातिक्कमे न निस्सग्गियं जनेतीति अधिप्पायो। **परिभुञ्जितुं...पे०... न वट्टती**ति सयं अपच्चुद्धरणं परिभुञ्जने पाचित्तियं, अधिट्ठाने परेसं विस्सज्जने दुक्कटञ्च सन्धाय वुत्तं।

परिभोगादयोपि वट्टन्तीति परिभोगविस्सज्जनअधिट्ठानानिपि। **अपि**-सद्देन निधेतुम्पि वट्टतीति अत्थो, एतेन च पच्चुद्धारेपि कते चीवरम्पि विकप्पितचीवरमेव होति, न अतिरेकचीवरं। तं पन तिचीवरादिनामेन अधिट्ठातुकामेन अधिट्ठहितब्बं, इतरेन विकप्पितचीवरमेव कत्वा परिभुञ्जितब्बन्ति दस्सेति। केचि पन ''यं विकप्पितचीवरं, तं याव अपरिभोगकाला अपच्चुद्धरापेत्वाव निदहितब्बं, परिभोगकाले पन सम्पत्ते पच्चुद्धरापेत्वा अधिट्ठहित्वा परिभुञ्जितब्बं। यदि हि ततो पुरेपि पच्चुद्धरापेय्य, पच्चुद्धारेनेव विकप्पनाय विगतत्ता अतिरेकचीवरं नाम होति, दसाहातिक्कमे च निस्सग्गियं पाचित्तियं। तस्मा यं अपरिभुञ्जित्वाव ठपेतब्बं, तदेव विकप्पेतब्बं, पच्चुद्धारे च कते अन्तोदसाहेयेव अधिट्ठातब्बं। यञ्च अट्ठकथायं 'ततो पभुति परिभोगादयोपि वट्टन्ती'तिआदि वुत्तं, तं पाळिया विरुज्झती''ति वदन्ति, तं तेसं मतिमत्तमेव। पाळियञ्हि ''अन्तोदसाहं अधिट्ठेति, विकप्पेती''ति (पारा० ४६९) च ''सामं चीवरं विकप्पेत्वा अपच्चुद्धारणं परिभुञ्जेय्य पाचित्तिय''न्ति (पाचि० ३७३) च ''अनापत्ति सो वा देति, तस्स वा विस्सासन्तो परिभुञ्जती''ति (पाचि० ३७४) च सामञ्ञतो वुत्तत्ता, अट्ठकथायञ्च ''इमं चीवरं वा विकप्पनं वा पच्चुद्धरामी''तिआदिना पच्चुद्धारं अदस्सेत्वा ''मय्हं सन्तकं परिभुञ्ज वा विस्सज्जेहि वा''ति एवं अत्तनो सन्तकत्तं अमोचेत्वाव परिभोगादिवसेनेव पच्चुद्धारस्स वुत्तत्ता, ''ततो पभुति परिभोगादयोपि वट्टन्ती''ति अधिट्ठानं विनापि विसुं परिभोगस्स, निदहनस्स च वुत्तत्ता विकप्पनानन्तरमेव पच्चुद्धरापेत्वा अनधिट्ठहित्वा एव तिचीवरविरहितं विकप्पनारहं चीवरं परिभुञ्जितुं, निदहितुञ्च इदं पाटेक्कं विनयकम्मन्ति खायति। अपिच बहूनं पत्तानं विकप्पेतुं, पच्चुद्धारेतुञ्च वुत्तत्ता पच्चुद्धारेन तेसं अतिरेकपत्तता दस्सिताति सिज्झति तेसु एकस्सेव अधिट्ठातब्बतो। तस्मा अट्ठकथायं आगतनयेनेव गहेतब्बं।

पञ्ञत्तिकोविदो न होतीति एवं विकप्पिते ''अनन्तरमेव एवं पच्चुद्धरितब्ब''न्ति विनयकम्मं न जानाति। तेनाह **''न जानाति पच्चुद्धरितु''**न्ति, इमिनापि चेतं वेदितब्बं ''विकप्पनानन्तरमेव पच्चुद्धारो कातब्बो''ति।

अविसेसेन वुत्तवचनन्ति तिचीवरादीनं साधारणवचनेन वुत्तवचनं। यं पनेत्थ ''विरुद्धं विय दिस्सती''ति वत्वा तं विरोधासङ्कं निवत्तेतुं **''तिचीवरसङ्केपेन...पे०... विकप्पनाय ओकासो दिन्नो होती''**ति वुत्तं, तं ''अधिट्ठेति विकप्पेती''ति सामञ्ञतो वुत्तेपि तिचीवरम्पि विकप्पेतीति अयमत्थो न सिज्झति, ''तिचीवरं अधिट्ठातुं न विकप्पेतु''न्ति (महाव० ३५८) विसेसेत्वा वुत्तत्ता। यं पन अधिट्ठातब्बं, तं अधिट्ठाति। यं तिचीवरविरहितं, तं विकप्पेतब्बं, तं विकप्पेतीति एवमत्थो सिज्झतीति। तस्मा एत्थ पुब्बापरविरोधो न दिस्सति सामञ्ञवचनस्स वुत्तावसेसेयेव अवतिट्ठनतो। यं पनेत्थ तिचीवरस्सापि विकप्पनविधिं दस्सेतुं **''तिचीवरं तिचीवरसङ्केपेना''**तिआदि वुत्तं। तत्थ तिचीवरसङ्केपेन परिहरियमानेसु एकम्पि पच्चुद्धरित्वा विकप्पेतुं न वट्टति, तिचीवरतो पन एकं वा सकलमेव वा अपनेत्वा अपरं तिचीवरं तिचीवरसङ्केपेन परिहरितुकामस्स वा तिचीवराधिट्ठानं मुञ्चित्वा परिक्खारचोळवसेनेव सब्बचीवरं परिभुञ्जितुकामस्स वा पुरिमं अधिट्ठितचीवरं पच्चुद्धरित्वा विकप्पेतुं वट्टतीति एवमधिप्पायेन **''तिचीवरे एकेन चीवरेन विप्पवसितुकामो होती''**तिआदि वुत्तं सिया, इच्चेतं पाळिया सद्धिं समेति। अथ पुनपि तदेव तिचीवराधिट्ठानेन अधिट्ठातुकामो हुत्वा विप्पवाससुखत्थं पच्चुद्धरित्वा विकप्पेतीति इमिना अधिप्पायेन वुत्तं सिया, तं ''तिचीवरं अधिट्ठातुं न विकप्पेतु''न्ति (महाव० ३५८) इमिना वचनेन न समेति। यदि हि सेसचीवरानि विय तिचीवरम्पि पच्चुद्धरित्वा विकप्पेतब्बं सिया, ''तिचीवरं अधिट्ठातुं न विकप्पेतु''न्ति इदं वचनमेव निरत्थकं सिया सेसचीवरेहि तिचीवरस्स विसेसाभावा। तस्मा ''विकप्पेती''ति इदं तिचीवरविरहितमेव सन्धाय वुत्तं। तिचीवरं पन विकप्पेतुं न वट्टतीति विञ्ञायति, तेनेव दुतियकथिनसिक्खापदस्स अनापत्तिवारे ''विकप्पेती''ति इदं न वुत्तं, वीमंसित्वा यथा पाळिया सद्धिं न विरुज्झति, तथा एत्थ अधिप्पायो गहेतब्बो।

तुय्हं देमीतिआदीसु परिच्चत्तत्ता मनसा असम्पटिच्छन्तोपि सम्पदानभूतस्सेव सन्तकं होति, सो इच्छितक्खणे गहेतुं लभति। **इत्थन्नामस्सा**ति परम्मुखे ठितं सन्धाय वदति। **यस्स पन रुच्चती**तिआदि उभोहिपि परिच्चत्तताय अस्सामिकतं सन्धाय वुत्तं।

''तं न युज्जती''ति इदं अन्तोदसाहे एव विस्सासग्गहणं सन्धाय अनापत्तिवारस्स आगतत्ता, इध निस्सग्गियचीवरस्स कप्पियभावकरणत्थं लेसेन गहितत्ता च वुत्तं, केचि पन ''परेहि सभागेन अच्छिन्ने, विस्सासग्गहिते च पुन लद्धे दोसो न दिस्सती''ति वदन्ति। **अनधिट्ठानेना**ति कायवाचाहि कत्तब्बस्स अकरणेनाति अधिप्पायो। चीवरस्स अत्तनो सन्तकता, जातिपमाणयुत्तता, छिन्नपलिबोधभावो, अतिरेकचीवरता, दसाहातिक्कमोति इमानेत्थ पञ्च अङ्गानि।

पठमकथिनसिक्खापदवण्णना निट्ठिता।

२. उदोसितसिक्खापदवण्णना

४७३. दुतिये **अविप्पवासे**ति अविप्पवासे निप्फादेतब्बे, विप्पवासदोसाभावे साधेतब्बे कत्तब्बा सम्मुतीति अत्थो।

४७५. **पटिसिद्धपरियापन्नेना**ति विप्पवसितुं पटिसिद्धेसु तीसु चीवरेसु अन्तोगधेन, एकेन च अवयवे समुदायोपचारं दस्सेति।

४७८-९. **एत्तावता**ति ''परिक्खित्तो''ति इमिना। ''सभायेति लिङ्गब्यत्तयेन सभा वुत्ता''ति वत्वा पुन सयम्पि **''सभाये''**ति इमिना वोहरन्तो सभा-सद्दस्स परियायो सभाय-सद्दो नपुंसकलिङ्गयुत्तो अत्थीति दस्सेति। ''सभायन्ति लिङ्गब्यत्तयेन सभा वुत्ता''ति वा पाठो। लिङ्गब्यत्तयेन सभाति च लिङ्गन्तरयुत्तो सभासद्दपरियायो सभायसद्दोति अत्थो।

सभायं गच्छतीति सभं गच्छति। **वसितब्बं नत्थी**ति चीवरहत्थपासेयेव वसितब्बं नत्थीति अत्थो। **तस्मा**ति वीथिया। **सभायस्स च द्वारस्स च हत्थपासा न विजहितब्ब**न्ति एत्थ सभायद्वारानमन्तरे वीथि गेहापि गहिता एव होन्ति आदिपरियोसानानं गहितत्ता। एत्थ च द्वारवीथिघरेसु वसन्तेन गामप्पवेसनसहसेय्यादिदोसं परिहरित्वा सुपटिच्छन्नतादियुत्तेनेव भवितब्बं, सभा पन यदि सब्बेसं वसनत्थाय सालासदिसा कता, अन्तरारामे विय यथासुखं वसितुं वट्टतीति वेदितब्बं। परिक्खित्तताय च एकूपचारतं, अपरिक्खित्तताय नानूपचारतञ्च निवेसनादीसुपि अतिदिसन्तो आह **''एतेनेवूपायेना''**तिआदि। निवेसनादीनि बहिगामतो सन्निविट्ठानि गहितानि अन्तोगामे ठितानं गामग्गहणेनेव गहितत्ता। **सब्बत्था**ति गामनिगमनिवेसनादीसु पन्नरससु। **परिक्खेपादी**ति **आदि**-सद्देन अपरिक्खेपस्सेव गहणं, न एककुलादीनम्पि तेसं एकूपचारतानानूपचारतानिमित्तताभावा। एत्थ च सत्थस्स कतिपाहं कत्थचि निविट्ठस्सेव परिक्खेपो होति, न गच्छन्तस्स।

४८२-७. गामतो बहि इस्सरानं समुद्दतीरादीसु कतभण्डसाला उदोसितोति आह **''यानादीन''**न्तिआदि। **मुण्डच्छदनपासादो**ति नातिउच्चो चन्दिकङ्गणयुत्तो सिखरकूटमालादिविरहितो पासादो।

४८९. **परियादियित्वा**ति अज्झोत्थरित्वा। **नदीपरिहारो**ति विसुंगामादीनं विय नदीपरिहारस्स अवुत्तत्ता चीवरहत्थपासो एवाति वदन्ति, अञ्ञे पन ''इमिना अट्ठकथावचनेन नदीपरिहारोपि विसुं सिद्धो, नदिया हत्थपासो न विजहितब्बो''ति वदन्ति। **विहारसीम**न्ति अविप्पवाससीमं सन्धायाह। एत्थ च विहारस्स नानाकुलसन्तकभावेपि अविप्पवाससीमापरिच्छेदब्भन्तरे सब्बत्थ चीवरअविप्पवाससम्भवतो तस्सा पधानत्ता तत्थ सत्थपरिहारो न लब्भतीति **''विहारं गन्त्वा वसितब्ब''**न्ति वुत्तं। **''सत्थसमीपे''**ति इदं यथावुत्तं अब्भन्तरपरिच्छेदवसेन वुत्तं। पाळियं **नानाकुलस्स सत्थो होति, सत्थे चीवरं निक्खिपित्वा हत्थपासा न विजहितब्ब**न्ति एत्थ सत्थहत्थपासो गहितो।

४९०. **एककुलस्स खेत्ते**ति अपरिक्खित्तं सन्धाय वदति।

४९१-४. **विहारो** नाम उपचारसीमा। तत्थ **यस्मिं विहारे**ति तस्स अन्तोपरिवेणादिं सन्धाय वुत्तं, एककुलादिसन्तकता चेत्थ कारापकानं वसेन। **छायाय फुट्ठोकासस्सा**ति उजुकं अवक्खित्तलेड्डुपातब्भन्तरं सन्धाय वदति।

अगमनपथेति तदहेव गन्त्वा निवत्तेतुं न सक्कुणेय्यके समुद्दमज्झे ये दीपका, तेसूति योजना। **इतरस्मि**न्ति पुरत्थिमदिसाय चीवरे। **''उपोसथकाले...पे॰... वट्टती''**ति इमिना चीवरविप्पवाससत्तब्भन्तरतो समानसंवासाय सत्तब्भन्तरसीमाय अच्चन्तविसदिसतं दस्सेति। तथा हि बहूसु भिक्खूसु एकतो निसीदित्वा समन्ता सत्तब्भन्तरपरिच्छेदेसु यथासकं चीवरं ठपेत्वा परिहरन्तेसु एकेकस्स भिक्खुनो निसिन्नोकासतो पट्ठाय पच्चेकं सत्तब्भन्तरस्स परिच्छेदो अञ्ञमञ्ञविसदिसो अनेकविधो होति, न एको परिसपरियन्ततो पट्ठाय अनिमितब्बत्ता। तेनेव तत्थ परिसवसेन वुड्ढि, हानि वा न होति, न एवं सत्तब्भन्तरसीमाय। सा हि योजनिकायपि परिसपरियन्ततोव पट्ठाय समन्ता सत्तब्भन्तरपअच्छिन्ना एकाव होति। तेनेव सा परिसवसेन वड्ढति, हायति च, तस्मा अञ्ञाव सत्तब्भन्तरसीमा अञ्ञो सत्तब्भन्तरतो परिच्छिन्नो चीवरविप्पवासपरिहारो अब्भोकासोति वेदितब्बं। यञ्चेत्थ वत्तब्बं, तं **खन्धके सीमाकथाय**मेव (महाव॰ १४३) वक्खाम।

४९५. **नदिं ओतरती**ति हत्थपासं मुञ्चित्वा ओतरति। **बहिगामे ठपेत्वा**ति अपारुपितब्बताय वुत्तं। **विनयकम्मं कातब्ब**न्ति उत्तरासङ्गं च बहिगामे ठपितसङ्घाटियञ्च पठमं विनयकम्मं कत्वा पच्छा उत्तरासङ्गं निवासेत्वा अन्तरवासके कातब्बं। एत्थ च बहिगामे ठपितस्सापि विनयकम्मवचनतो परम्मुखापि ठितं विस्सज्जितुं, निस्सट्ठं दातुञ्च वट्टतीति वेदितब्बं। दहरानं गमने सउस्साहत्ता **''निस्सयो पन न पटिप्पस्सम्भती''**ति वुत्तं। **मुहुत्तं...पे॰... पटिप्पस्सम्भती**ति सउस्साहत्ते गमनस्स उपच्छिन्नत्ता वुत्तं। तेसं पन पुरारुणाव उट्ठहित्वा सउस्साहेन गच्छन्तानं अरुणे अन्तरा उट्ठितेपि न पटिप्पस्सम्भति **''याव अरुणुग्गमना सयन्ती''**ति वुत्तत्ता। तेनेव **''गामं पविसित्वा...पे॰... न पटिप्पस्सम्भती''**ति वुत्तं। **अञ्ञमञ्ञस्स वचनं अग्गहेत्वा**तिआदिम्हि सउस्साहत्ता गमनक्खणे पटिप्पस्सद्धि न वुत्ता। **धेनुभयेना**ति तरुणवच्छगावीनं अभिधावित्वा सिङ्गेन पहरणभयेन। **निस्सयो च पटिप्पस्सम्भती**ति एत्थ धेनुभयादीहि ठितानं याव भयवूपसमा ठातब्बतो ''अन्तोअरुणेयेव गमिस्सामी''ति नियमेतुं असक्कुणेय्यत्ता वुत्तं। यत्थ पन एवं नियमेतुं सक्का, तत्थ अन्तरारुणे उग्गतेपि निस्सयो न पटिप्पस्सम्भति भेसज्जत्थाय गामप्पविट्ठदहरानं विय। **अन्तोसीमायं गाम**न्ति अविप्पवाससीमासम्मुतितो पच्छा पतिट्ठापितगामं सन्धाय वदति गामञ्च गामूपचारञ्च ठपेत्वा सम्मन्नितब्बतो। **पविट्ठान**न्ति आचरियन्तेवासिकानं विसुं विसुं गतानं अविप्पवाससीमत्ता नेव चीवरानि निस्सग्गियानि होन्ति, सउस्साहताय निस्सयो न पटिप्पस्सम्भति। **अन्तरामग्गे**ति धम्मं सुत्वा आगच्छन्तानं अन्तरामग्गे।

''इध अपच्चुद्धरण''न्ति इमिना अधिट्ठानविकप्पनानि विय पच्चुद्धरणम्पि कायेन वा वाचाय वा कत्तब्बन्ति दस्सेति। कायवाचाहि कत्तब्बस्स अकरणतोति इदं कायवाचासमुट्ठानं वुत्तं। अधिट्ठितचीवरता, अनत्थतकथिनता, अलद्धसम्मुतिता, रत्तिविप्पवासोति इमानेत्थ चत्तारि अङ्गानि।

उदोसितसिक्खापदवण्णना निट्ठिता।

३. ततियकथिनसिक्खापदवण्णना

४९७. ततिये पाळियं **चीवरपच्चासा निक्खिपितु**न्ति चीवरपच्चासाय सतिया निक्खिपितुन्ति अत्थो। **निट्ठितचीवरस्मिं भिक्खुना**ति एत्थ दुतियकथिने विय सामिवसेनेव करणवचनस्स अत्थो वेदितब्बो।

४९९-५००. **तुय्हं दम्मीति दिन्न**न्ति ''तुय्हं, भन्ते, अकालचीवरं दम्मी''ति एवं दिन्नं, एतम्पि काले आदिस्स दिन्नं नाम होतीति अधिप्पायो। इदं पन अट्ठकथावचनं, पाळियं ''कालेपि आदिस्स दिन्न''न्ति इदञ्च ''अकालचीवर''न्ति वचनसामञ्ञतो लब्भमानं सब्बम्पि दस्सेतुं अत्थुद्धारवसेन वुत्तं पठमअनियते सोतस्स रहो विय। सङ्घस्स हि कालेपि आदिस्स दिन्नं अकाले उप्पन्नचीवरं विय सम्मुखीभूतेहि वुत्थवस्सेहि, अवुत्थवस्सेहि च सब्बेहिपि भाजेतब्बतासामञ्ञेन अकालचीवरं नाम होतीति दस्सनत्थं अत्थुद्धारवसेन पाळियं ''कालेपि आदिस्स दिन्न''न्ति वुत्तं, न पन ''ततो भाजेत्वा लद्धचीवरम्पि अकाले लद्धचीवरम्पि वुत्थवस्सानं एकमासपरिहारं, पञ्चमासपरिहारं वा न लभति, पच्चासाचीवरे असति दसाहपरिहारमेव लभती''ति दस्सनत्थं वुत्तं, अट्ठकथायम्पि ''आदिस्स दिन्न''न्ति वचनसामञ्ञतो लब्भमानं सब्बं अत्थुद्धारवसेन दस्सेतुं ''एकपुग्गलस्स वा इदं तुय्हं दम्मीति दिन्न''न्ति वुत्तं, न पन तथालद्धं वा अकाले लद्धं वा अनत्थतकथिनानं दसाहब्भन्तरे अधिट्ठातब्बन्ति दस्सेतुन्ति वेदितब्बं इतरथा पाळिअट्ठकथाहि विरुज्झनतो। तथा हि **अच्चेकचीवरसिक्खापदे** अकाले उप्पन्नम्पि अच्चेकचीवरं ''यावचीवरकालसमयं निक्खिपितब्ब''न्ति (पारा॰ ६४८) वुत्तं, तस्स अट्ठकथायञ्च ''पवारणमासस्स जुण्हपक्खपञ्चमियं उप्पन्नस्स अच्चेकचीवरस्स अनत्थते कथिने एकादसदिवसाधिको मासो, अत्थते कथिने एकादसदिवसाधिका पञ्च मासा च परिहारो वुत्तो, तमेव परिहारं सन्धाय 'छट्ठितो पट्ठाय पन उप्पन्नं अनच्चेकचीवरम्पि पच्चुद्धरित्वा ठपितचीवरम्पि एतं परिहारं लभतियेवा'ति (पारा॰ अट्ठ॰ २.६४६-६४९) वुत्तं। तस्मा कालेपि अकालेपि च यथातथा लद्धं अतिरेकचीवरं वुत्थवस्सानं एकमासं, पञ्चमासं वा यथारहं परिहारं लभति एवाति गहेतब्बं।

एवं पन अवत्वा पदभाजनं वुत्तन्ति सम्बन्धो। तत्थ **एव**न्ति यं अट्ठकथायं ''ततो चे उत्तरी''ति इमस्स मासपरमतो उत्तरीति अत्थो वुत्तो, तं परामसति। पदभाजनियं एवमत्थं अवत्वा अञ्ञथा अत्थो वुत्तोति अधिप्पायो। **ताव उप्पन्नं पच्चासाचीवर**न्ति पच्चत्तवचनं। **''मूलचीवर''**न्ति इदं उपयोगवचनं। **अत्तनो गतिकं करोती**ति अनन्तरा दुतियदिवसादीसु उप्पन्नं पच्चासाचीवरं मासपरमं मूलचीवरं ठपेतुं अदत्वा अत्तनो दसाहपरमताय एव पतिट्ठापेतीति अत्तनो गतिकं करोतीति। **ततो उद्धं मूलचीवर**न्ति एत्थ पन **मूलचीवर**न्ति पच्चत्तवचनं। तञ्हि वीसतिमदिवसतो उद्धं द्वावीसतिमदिवसादीसु उप्पन्नं पच्चासाचीवरं अत्तना सद्धिं एकतो सिब्बेत्वा घटितं दसाहपरमं गन्तुं अदत्वा नवाहपरमतादिवसेन अत्तनो गतिकं करोति, एकतो असिब्बेत्वा विसुं ठपितं पन पच्चासाचीवरं दसाहपरममेव।

पाळियं **दसाहा**ति दसाहेन। **एकादसे उप्पन्ने**तिआदीसु एकादसाहे उप्पन्नेतिआदिना अत्थो, अयमेव वा पाठो गहेतब्बो। **एकवीसे उप्पन्ने...पे॰... नवाहा कारेतब्ब**न्तिआदि पच्चासाचीवरस्स उप्पन्नदिवसं ठपेत्वा वुत्तं। तेनेव **''तिंसे...पे॰... तदहेव अधिट्ठातब्ब''**न्ति वुत्तं। **''अञ्ञं पच्चासाचीवरं...पे॰... कारेतब्ब''**न्ति इदं सतिया एव पच्चासाय वुत्तं। सचे पन ''इतो पट्ठाय चीवरं न

लभिस्सामी''ति इच्छितट्ठानतो पच्चासाय उपच्छिन्नाय अञ्ञत्थापि येन केनचि उपायेन पच्चासं उप्पादेति, मूलचीवरं न अधिट्ठातब्बं, सब्बथा पच्चासाय उपच्छिन्नाय दसाहातिक्कन्तं मूलचीवरं तदहेव अधिट्ठातब्बं। **पच्चासाचीवरम्पि परिक्खारचोळं अधिट्ठातब्ब**न्ति पठमतरं उप्पन्नं विसभागं सन्धाय वदति। **अञ्ञमञ्ञ**न्ति अञ्ञं अञ्ञं, अयमेव वा पाठो। अङ्गं पनेत्थ पठमकथिने वुत्तसदिसमेव। केवलञ्हि तत्थ दसाहातिक्कमो, इध मासातिक्कमोति अयं विसेसो।

ततियकथिनसिक्खापदवण्णना निट्ठिता।

४. पुराणचीवरसिक्खापदवण्णना

५०३-५. चतुत्थे पाळियं **भत्तविस्सग्ग**न्ति भत्तस्स उदरे विस्सज्जनं, पवेसनं अज्झोहरणं भत्तकिच्चन्ति अत्थो, भोजनपरियोसानेन भत्तस्स विस्सज्जनन्तिपि वदन्ति। **तत्थ नाम त्व**न्ति सो नाम त्वं, ताय नाम त्वन्ति वा अत्थो। पिता च माता च पितरो, पितूनं पिता च माता च **पितामहा,** ते एव युगळट्ठेन **युगो,** तस्मा याव सत्तमा पितामहयुगा पितामहावट्टाति एवमेत्थ अत्थो दट्ठब्बो। एवञ्हि पितामहग्गहणेन मातामहो च पितामही मातामही च गहिताव होन्ति। सत्तमयुगतो परं ''अञ्ञातका''ति वेदितब्बं। **या**ति भिक्खुनी। पितु माता **पितामही,** मातु पिता **मातामहो**।

पयोगे पयोगे भिक्खुस्स दुक्कटन्ति ''धोवा''ति आणापनवाचाय एकाय एव तदनुगुणस्स सब्बस्सापि पयोगस्स आणत्तत्ता वुत्तं।

५०६. तदविनाभावतो धोवनस्स **''कायविकारं कत्वा''**ति च **''अन्तोद्वादसहत्थे''**ति च वुत्तत्ता कायेन धोवापेतुकामतं अप्पकासेत्वा दानखिपनपेसनादिं करोन्तस्स च द्वादसहत्थं उपचारं मुञ्चित्वा बहि ठत्वा कायवाचाहि आणापेत्वा खिपनपेसनादिं करोन्तस्स च अनापत्ति एव।

एकेन वत्थुनाति पठमकतेन। पञ्चसतानि पमाणं एतासन्ति **पञ्चसता**। भिक्खुभावतो परिवत्तलिङ्गापि भिक्खुनी भिक्खूनं सन्तिके एकतोउपसम्पन्ना एव।

५०७. **तावकालिकं गहेत्वा**ति अत्तना कतिपाहं पारुपनादिअत्थाय तावकालिकं याचित्वा। पुराणचीवरता, उपचारे ठत्वा अञ्ञातिकाय भिक्खुनिया आणापनं, तस्सा धोवापनादीनि चाति इमानेत्थ तीणि अङ्गानि।

पुराणचीवरसिक्खापदवण्णना निट्ठिता।

५. चीवरपटिग्गहणसिक्खापदवण्णना

५०८. पञ्चमे **अपञ्ञत्ते सिक्खापदे**ति **गणम्हा ओहीयनसिक्खापदे** (पाचि० ६९१-६९२) अपञ्ञत्ते। **कोट्ठाससम्पत्ती**ति केसादिपञ्चकोट्ठासानं कल्याणता। **हत्थतलेयेव दस्सेत्वा**ति हत्थतलतो सेसकायस्स अदस्सनं दीपेति।

५१०. **विहत्थताया**ति विहतताय, अमिस्सितताय अपटिसरणतायाति अत्थो। तेनाह **''समभितुन्नत्ता''**ति, ब्यधितत्ताति अत्थो। परिवत्तेतब्बं परिवत्तं, तदेव **पारिवत्तकं,** परिवत्तेत्वा दिय्यमानन्ति अत्थो।

पुरिमसिक्खापदे विय इध द्वादसहत्थो उपचारनियमो नत्थीति आह **''उपचारं मुञ्चित्वा''**ति। **अञ्ञत्र पारिवत्तका**ति यं अन्तमसो हरीटकखण्डम्पि दत्वा वा ''दस्सामी''ति आभोगं कत्वा वा परिवत्तकं गण्हाति, तं ठपेत्वा। **''तं अचित्तकभावेन न समेती''**ति इमिना ञातिभावाजाननादीसु विय भिक्खुनीभावाजाननादिवसेनापि अचित्तकतं पकासेति।

५१३-४. तिकञ्च तं पाचित्तियञ्चाति **तिकपाचित्तियं,** पाचित्तियतिकन्ति अत्थो। **पत्तत्थविकादी**ति अनधिट्ठानुपगं सन्धाय वदति। **को पन वादो पत्तत्थविकादीसू**ति महतियापि ताव भिसिच्छविया अनधिट्ठानुपगत्ता अनापत्ति, विकप्पनुपगपच्छिमप्पमाणविरहितताय अनधिट्ठातब्बेसु किमेव वत्तब्बन्ति दस्सेति। पत्तत्थविकादीनि पन विकप्पनुपगपच्छिमानि गण्हितुं न वट्टति एव। पटिग्गहणं **किरिया,** अपरिवत्तनं **अकिरिया**। विकप्पनुपगचीवरता, पारिवत्तकाभावो, अञ्ञातिकाय हत्थतो गहणन्ति इमानेत्थ तीणि अङ्गानि।

चीवरपटिग्गहणसिक्खापदवण्णना निट्ठिता।

६. अञ्ञातकविञ्ञत्तिसिक्खापदवण्णना

५१५. छट्ठे पटु एव **पट्टो**। पाळियं **धम्मनिमन्तना**ति समणेसु वत्तब्बाचारधम्ममत्तवसेन निमन्तना, दातुकामताय कतनिमन्तना न होतीति अत्थो। तेनेव **''विञ्ञापेस्सती''**ति वुत्तं। अञ्ञातकअप्पवारिततो हि विञ्ञत्ति नाम होति।

५१७. ''तिणेन वा पण्णेन वा पटिच्छादेत्वा आगन्तब्ब''न्ति इमिना भूतगामविकोपनं अनुञ्ञातन्ति आह **''नेव भूतगामपातब्यताया''**तिआदि। पठमं सुद्धचित्तेन लिङ्गं गहेत्वा पच्छा लद्धिं गण्हन्तोपि तित्थियपक्कन्तको एवाति आह **''निवासेत्वापि लद्धि न गहेतब्बा''**ति।

यं आवासं पठमं उपगच्छतीति एत्थापि विहारचीवरादिअत्थाय पविसन्तेनपि तिणादीहि पटिच्छादेत्वाव गन्तब्बं, न त्वेव नग्गेन आगन्तब्बन्ति सामञ्ञतो दुक्कटस्स वुत्तत्ता। **चिमिलिकाही**ति पटपिलोतिकाहि। **परिभोगेनेवा**ति अञ्ञं चीवरं अलभित्वा परिभुञ्जनेन। **परिभोगजिण्ण**न्ति यथा तं चीवरं परिभुञ्जियमानं ओभग्गविभग्गताय असारुप्पं होति, एवं जिण्णं।

५२१. **अञ्ञस्सत्थाया**ति एत्थापि ''ञातकानं पवारितान''न्ति इदं अनुवत्तति एवाति आह **''अत्तनो ञातकपवारिते''**तिआदि। इध पन अञ्ञस्स अच्छिन्ननट्ठचीवरस्स अत्थाय अञ्ञातकअप्पवारिते विञ्ञापेन्तस्स निस्सग्गियेन अनापत्तीति अत्थो गहेतब्बो, इतरथा ''ञातकानं पवारितान''न्ति इमिना विसेसो न भवेय्य। तेनेव अनन्तरसिक्खापदे वक्खति ''अट्ठकथासु पन ञातकपरिवातट्ठाने...पे०... पमाणमेव वट्टतीति वुत्तं, तं पाळिया न समेती''ति (पारा० अट्ठ० २.५२६) च ''यस्मा पनिदं सिक्खापदं अञ्ञस्सत्थाय विञ्ञापनवत्थुस्मिंयेव पञ्ञत्तं, तस्मा इध 'अञ्ञस्सत्थाया'ति न वुत्त''न्ति (पारा० अट्ठ० २.५२६) च। विकप्पनुपगचीवरता, समयाभावो, अञ्ञातकविञ्ञत्ति, ताय पटिलाभोति इमानेत्थ चत्तारि अङ्गानि।

अञ्ञातकविञ्ञत्तिसिक्खापदवण्णना निट्ठिता।

७. ततुत्तरिसिक्खापदवण्णना

५२२-५२४. सत्तमे पाळियं **पग्गाहिकसाल**न्ति दुस्सापणं। तञ्हि वाणिजकेहि दुस्सानि पग्गहेत्वा दस्सनट्ठानताय ''पग्गाहिकसाला''ति वुच्चति। **अस्स चीवरस्सा**ति सादितब्बचीवरस्स। **''तिचीवरिकेना''**ति इमिना अच्छिन्नतिचीवरतो अञ्ञस्स विहारादीसु निहितस्स चीवरस्स अभावं दस्सेति। यदि भवेय्य, विञ्ञापेतुं न वट्टेय्य। तावकालिकं निवासेत्वा अत्तनो चीवरं गाहेतब्बं, तावकालिकम्पि अलभन्तस्स भूतगामविकोपनं कत्वा तिणपण्णेहि छदनं विय विञ्ञापनम्पि वट्टति एव। **अञ्ञेना**ति अच्छिन्नअसब्बचीवरेन। **द्वे नट्ठानी**ति अधिकारतो वुत्तं **''द्वे सादितब्बानी''**ति।

५२६. **पाळिया न समेती**ति ''अनापत्ति ञातकानं पवारितान''न्ति इमाय पाळिया न समेति ततुत्तरिविञ्ञापनआपत्तिप्पसङ्गे एव वुत्तत्ता। **''अञ्ञस्सत्थायाति न वुत्त''**न्ति इदं अञ्ञस्सत्थाय ततुत्तरि

दसाहे अप्पहोन्ते चीवरकालं नातिक्कमेतब्बाति तेमासब्भन्तरे दसाहे अप्पहोन्ते नवाहानागताय कत्तिकतेमासिपुण्णमाय सत्तमितो पट्ठाय लद्धा, निट्ठिता च चीवरकालं नातिक्कमेतब्बाति अत्थो। तथा हि ''मासो सेसो गिम्हानन्ति भिक्खुना वस्सिकसाटिकचीवरं परियेसितब्ब''न्ति परियेसनक्खेत्तं वत्वा ''वस्सिकसाटिकं वस्सानं चातुमासं अधिट्ठातु''न्ति (महाव० ३५८) वुत्तत्ता कतायपि अकतायपि मासमत्तं अनधिट्ठातब्बता सिद्धा। यस्मा च अकता वस्सिकसाटिकसङ्ख्यं न गच्छति, अकरणञ्च केनचि वेकल्लेन, न अनादरेन, तस्मा चातुमासं अकतत्ता एव परिहारं लभति, कता पन अधिट्ठानक्खेत्ते, अकता च चीवरकाले दसाहपरमसिक्खापदेनेव परिहारं लभतीति अयमत्थो लब्भति। **कस्मा**ति अत्तनो मतिया कारणपुच्छा। **तस्मा**ति वस्सानेयेव वस्सिकसाटिकाय अधिट्ठातब्बतावचनतो। **''तिचीवरं अधिट्ठातु''**न्ति सुत्तं पनेत्थ सेसचीवरानं एवं कालनियमाभावं साधेतुं उद्धटं। न हि तेनेत्थ अञ्ञं पयोजनं अत्थि।

कदा अधिट्ठातब्बातिआदिकुरुन्दिवचनेनापि ''यदा वा तदा वा अधिट्ठातुं वट्टती''ति इदं पटिक्खिपित्वा दसाहब्भन्तरे एव कताय अधिट्ठातब्बतं दस्सेति।

पाळियं **अच्छिन्नचीवरस्सा**तिआदीसु अच्छिन्नसेसचीवरस्स नट्ठसेसचीवरस्स। एतेसञ्हि असमये परियेसननिवासनापत्तिया एव अनापत्ति वुत्ता। तेनेव **मातिकाट्ठकथायं** ''अच्छिन्नचीवरस्स वा नट्ठचीवरस्स वा अनिवत्थं चोरा हरन्तीति एवं आपदासु वा निवासयतो उम्मत्तकादीनञ्च अनापत्ती''ति (कङ्खा० अट्ठ० वस्सिकसाटिकसिक्खापदवण्णना) वुत्तं, इध पन समन्तपासादिकायं अयं निस्सग्गिया अनापत्ति पाळितो सयमेव सिज्झतीति इमं अदस्सेत्वा असिज्झमानं नग्गस्स न्हायतो दुक्कटापत्तिया एव अनापत्ति दस्सेतुं **''अच्छिन्नचीवरस्सा''**तिआदि वुत्तन्ति गहेतब्बं। न हि एसा अनापत्ति अवुत्ते सिज्झतीति। वस्सिकसाटिकाय अत्तुद्देसिकता, असमये परियेसनता, ताय च पटिलाभोति इमानि ताव परियेसनापत्तिया तीणि अङ्गानि। निवासनापत्तिया पन सचीवरता, आपदाभावो, वस्सिकसाटिकाय सकभावो, असमये निवासनन्ति चत्तारि अङ्गानि।

वस्सिकसाटिकसिक्खापदवण्णना निट्ठिता।

५. चीवरअच्छिन्दनसिक्खापदवण्णना

६३१. पञ्चमे **यम्पि...पे०... अच्छिन्दी**ति एत्थ यं ते अहं चीवरं अदासिं, तं ''मया सद्धिं पक्कमिस्सती''ति सञ्ञाय अदासिं, न अञ्ञथाति कुपितो अच्छिन्दीति एवं अज्झाहरित्वा योजेतब्बं।

६३३. **एकं दुक्कट**न्ति यदि आणत्तो अवस्सं अच्छिन्दति, आणत्तिक्खणे पाचित्तियमेव। यदि न अच्छिन्दति, तदा एव दुक्कटन्ति दट्ठब्बं। **एकवाचाय सम्बहुला आपत्तियो**ति यदि आणत्तो अनन्तरायेन अच्छिन्दति, आणत्तिक्खणेयेव वत्थुगणनाय पाचित्तियआपत्तियो पयोगकरणक्खणेयेव आपत्तिया आपज्जितब्बतो, चीवरं पन अच्छिन्नेयेव निस्सग्गियं होति। यदि सो न अच्छिन्दति, आणत्तिक्खणे एकमेव दुक्कटन्ति दट्ठब्बं। एवं अञ्ञत्थापि ईदिसेसु नयो ञातब्बो।

६३५. **उपज्झं गण्हिस्सती**ति सामणेरस्स दानं दीपेति, तेन च सामणेरकाले दत्वा उपसम्पन्नकाले अच्छिन्दतोपि पाचित्तियं दीपेति। ''भिक्खुस्स सामं चीवरं दत्वा''ति इदं उक्कट्ठवसेन वुत्तं। **आहरापेतुं पन वट्टती**ति कम्मे अकते भतिसदिसत्ता वुत्तं। विकप्पनुपगपच्छिमचीवरता, सामं दिन्नता, सकसञ्ञिता, उपसम्पन्नता, कोधवसेन अच्छिन्दनं वा अच्छिन्दापनं वाति इमानेत्थ पञ्च अङ्गानि।

चीवरअच्छिन्दनसिक्खापदवण्णना निट्ठिता।

६. सुत्तविञ्ञत्तिसिक्खापदवण्णना

६३६. छट्ठे वीतवीतट्ठानं यस्मिं चतुरस्सदारुम्हि पलिवेठेन्ति, तस्स **तुरी**ति नामं। वायन्ता तिरियं सुत्तं पवेसेत्वा येन आकोटेन्ता वत्थे घनभावं आपादेन्ति, तं **''वेम''**न्ति वुच्चति।

''इतरस्मिं तथेव दुक्कट''न्ति इमिना वायितुं आरद्धकालतो पट्ठाय यथावुत्तपरिच्छेदनिट्ठितेयेव दुक्कटम्पि होति, न ततो पुब्बे वायनपयोगेसूति दस्सेति।

तन्ते ठितंयेव अधिट्ठातब्बन्ति एत्थ एकवारं अधिट्ठिते पच्छा वीतं अधिट्ठितगतिकमेव होति, पुन अधिट्ठानकिच्चं नत्थि। सचे पन अन्तरन्तरा दसा ठपेत्वा विसुं विसुं सपरिच्छेदं वीतं होति, पच्चेकं अधिट्ठातब्बमेवाति दट्ठब्बं। एत्थ च कप्पियसुत्तं गहेत्वा अञ्ञातकअप्पवारितेनापि अकप्पियतन्तवायेन ''सुत्तमत्थि, वायन्तो नत्थी''तिआदिपरियायमुखेन वायापेन्तस्स अनापत्ति। तेनेव **मातिकाट्ठकथायं** (कङ्खा० अट्ठ० सुत्तविञ्ञत्तिसिक्खापदवण्णना) ''वायापेय्या''ति पदस्स ''चीवरं मे, आवुसो, वायथाति अकप्पियविञ्ञत्तिया वायापेय्या''ति अत्थो वुत्तो, एवं वदन्तो अकप्पियतन्तवायेन वायापेति नाम, नाञ्ञथा।

६४०. **अनापत्ति चीवरं सिब्बेतु**न्तिआदीसु इमिना सिक्खापदेनेव अनापत्ति, अकतविञ्ञत्तिपच्चया पन दुक्कटमेवाति वदन्ति। अकप्पियसुत्तता, अत्तुद्देसिकता, अकप्पियतन्तवायेन अकप्पियविञ्ञत्तिया वायापनन्ति इमानेत्थ तीणि अङ्गानि।

सुत्तविञ्ञत्तिसिक्खापदवण्णना निट्ठिता।

७. महापेसकारसिक्खापदवण्णना

६४२. सत्तमे **''किञ्चिमत्तं अनुपदज्जेय्या''**ति इदं पयोगभेददस्सनं, दानं पनेत्थ अङ्गं न होति। तेनेव तस्स **विभङ्गे** ''अन्तमसो धम्मम्पि भणती''ति वुत्तं। सेसमेत्थ उत्तानमेव। अञ्ञातकअप्पवारितानं तन्तवाये उपसङ्कमित्वा विकप्पमापज्जनता, चीवरस्स अत्तुद्देसिकता, तस्स वचनेन सुत्तवड्ढनं, चीवरपटिलाभोति इमानेत्थ चत्तारि अङ्गानि।

महापेसकारसिक्खापदवण्णना निट्ठिता।

८. अच्चेकचीवरसिक्खापदवण्णना

६४६. अट्ठमे छट्ठियं उप्पन्नचीवरस्स एकादसमारुणो चीवरकाले उट्ठातीति आह **''छट्ठितो पट्ठाया''**तिआदि, तेन च ''दसाहानागत''न्ति वुत्तत्ता पञ्चमितो पट्ठाय पुण्णमितो पुब्बे दससु अरुणेसु उट्ठितेसुपि चीवरं निस्सग्गियं न होति। पुण्णमिया सह एकादस दिवसा लब्भन्तीति एत्तकमेव इमिना सिक्खापदेन लद्धं, छट्ठितो पट्ठाय उप्पन्नं सब्बचीवरं पठमकथिनसिक्खापदवसेनेव याव चीवरकालं निस्सग्गियं न होतीति दस्सेति।

६५०. इदानि पठमकथिनादिसिक्खापदेहि तस्स तस्स चीवरस्स लब्भमानं परिहारं इधेव एकतो सम्पिण्डेत्वा दस्सेन्तो **''अतिरेकचीवरस्सा''**तिआदिमाह। ''अनत्थते कथिने एकादसदिवसाधिको मासो, अत्थते कथिने एकादसदिवसाधिका पञ्च मासा''ति अयमेव पाठो पाळिया समेति। केचि पन ''दसदिवसाधिको मासो, दसदिवसाधिका पञ्च मासाति पाठेन भवितब्ब''न्ति वदन्ति, तं न युत्तं, अञ्ञथा ''नवाहानागत''न्ति वत्तब्बतो। यं पनेत्थ **मातिकाट्ठकथाय**ञ्च ''कामञ्चेस 'दसाहपरमं अतिरेकचीवरं धारेतब्ब'न्ति इमिनाव सिद्धो, अट्ठुप्पत्तिवसेन पन अपुब्बं विय अत्थं दस्सेत्वा सिक्खापदं ठपित''न्ति (कङ्खा० अट्ठ० अच्चेकचीवरसिक्खापदवण्णना) लिखन्ति, तं पमादलिखितं ''पवारणमासस्स जुण्हपक्खपञ्चमितो पट्ठाय उप्पन्नस्स चीवरस्स निधानकालो दस्सितो होती''ति (कङ्खा० अट्ठ० अच्चेकचीवरसिक्खापदवण्णना) वुत्तत्ता। इममेव च पमादलिखितं गहेत्वा **भदन्तबुद्धदत्ताचरियेन** च ''परिहारेकमासोव, दसाहपरमो मतो''तिआदि वुत्तन्ति गहेतब्बं।

अच्चेकचीवरसदिसे अञ्ञस्मिन्ति पुब्बे अधिट्ठिते उप्पन्नकालाकारादि सादिसेन अच्चेकचीवरसदिसे अञ्ञस्मिं चीवरे अच्चेकचीवरसञ्ञाय चीवरकालं अतिक्कमेतीति अत्थो। तेनेवेत्थ दुक्कटं, अनापत्ति च वुत्ता, इतरथा तीसुपि पदेसु पाचित्तियस्सेव वत्तब्बतो। अनच्चेकचीवरम्पि हि चीवरकालं अतिक्कमयतो पाचित्तियमेव अच्चेकचीवरत्तिके वियाति दट्ठब्बं। विकप्पनुपगपच्छिमप्पमाणस्स अच्चेकचीवरस्स अत्तनो सन्तकता, दसाहानागताय कत्तिकतेमासिपुण्णमाय उप्पन्नभावो, अनधिट्ठितअविकप्पितता, चीवरकालातिक्कमोति इमानेत्थ चत्तारि अङ्गानि।

अच्चेकचीवरसिक्खापदवण्णना निट्ठिता।

९. सासङ्कसिक्खापदवण्णना

६५२-३. नवमे अन्तरन्तरा घरमेत्थाति **अन्तरघर**न्ति गामो वुत्तोति आह **''अन्तोगामे''**ति। ''पठमं झानं उपसम्पज्ज विहरती''ति (विभ० ६२४) इमस्स विभङ्गे ''उपसम्पज्ज''न्ति सानुसारं उद्धटं। तं सन्धायाह **''उपसम्पज्जन्तिआदीसु विया''**ति। **तस्सापी**ति ''वुत्थवस्सान''न्ति विभङ्गपदस्सपि। **वुत्थवस्सान**न्ति च निद्धारणे सामिवचनं, एतेन च पुरिमसिक्खापदे अनत्थतकथिनानं कथिनमासेपि असमादानचारो न लब्भतीति सिद्धं होति, इतरथा सिक्खापदस्सेव निरत्थकत्ताति दट्ठब्बं।

परिक्खेपारहट्ठानतोति एत्थ गामपरियन्ते ठितघरूपचारतो पट्ठाय एको लेड्डुपातो परिक्खेपारहट्ठानं नाम। **विसुद्धिमग्गे**पि ''अपरिक्खित्तस्स पठमलेड्डुपाततो पट्ठाया''ति (विसुद्धि० १.३१) वुत्तं। **त**न्ति तं पठमसेनासनादिं। **मज्झिमनिकायट्ठकथायं** पन विहारस्सपि गामस्सेव उपचारं नीहरित्वा उभिन्नं लेड्डुपातानं अन्तरा मिनितब्बन्ति वुत्तं।

''कोसम्बियं अञ्ञतरो भिक्खु गिलानो होती''ति आगतत्ता **''कोसम्बकसम्मुति अनुञ्ञाता''**ति वुत्तं। **''अयञ्च पच्छिमदिसं गतो होती''**ति इमिना अन्तरघरे चीवरं निक्खिपित्वा तस्मिं विहारे वसन्तस्स सकलम्पि चीवरमासं विप्पवसितुं वट्टति, ततो अञ्ञत्थ गमनकिच्चे सति विहारतो बहि छारत्तं विप्पवासो अनुञ्ञातोति दीपेति। तेनाह **''सेनासनं आगन्त्वा सत्तमं अरुणं उट्ठापेतु''**न्तिआदि। **वसित्वा**ति अरुणं उट्ठापेत्वा। **तत्थेवा**ति तस्मिञ्ञेव गतट्ठाने। अङ्गानि पनेत्थ अट्ठकथायमेव वुत्तानि।

सासङ्कसिक्खापदवण्णना निट्ठिता।

१०. परिणतसिक्खापदवण्णना

६६०. दसमे **रोपितमालवच्छतो**ति केनचि नियमेत्वा रोपितं सन्धाय वुत्तं। अनोचितं मिलायमानं ओचिनित्वा यत्थ कत्थचि पूजेतुं वट्टति। **ठितं दिस्वा**ति सेसकं गहेत्वा ठितं दिस्वा। **यत्थ इच्छथ, तत्थ देथा**ति एत्थ नियमेत्वा ''असुकस्स देही''ति वुत्तेपि दोसो नत्थि ''तुम्हाकं रुचिया''ति वुत्तत्ता। सङ्घे परिणतभावो, तं ञत्वा अत्तनो परिणामनं, पटिलाभोति इमानेत्थ तीणि अङ्गानि।

परिणतसिक्खापदवण्णना निट्ठिता।

निट्ठितो पत्तवग्गो ततियो।

इति समन्तपासादिकाय विनयट्ठकथाय विमतिविनोदनियं

तिंसकवण्णनानयो निट्ठितो।

पठमो भागो निट्ठितो।

॥ नमो तस्स भगवतो अरहतो सम्मासम्बुद्धस्स॥

विनयपिटके

विमतिविनोदनी-टीका (दुतियो भागो)

५. पाचित्तियकण्डं

१. मुसावादवग्गो

१. मुसावादसिक्खापदवण्णना

१. मुसावादवग्गस्स पठमसिक्खापदे **खुद्दकान**न्ति एत्थ **''खुद्दक**-सद्दो बहु-सद्दपरियायो''ति वदन्ति। **तत्था**ति तेसु वग्गेसु, खुद्दकेसु वा। ''जानितब्बतो''ति हेतुनो विपक्खेपि निब्बाने वत्तनतो अनेकन्तिकत्ते परेहि वुत्ते ''न मया अयं हेतु वुत्तो''ति तं कारणं पटिच्छादेतुं पुन ''जातिधम्मतोति मया वुत्त''न्तिआदीनि वदति। ''सम्पजान''न्ति वत्तब्बे अनुनासिकलोपेन निद्देसोति आह **''जानन्तो''**ति।

२. **सम्पजानमुसावादे**ति अत्तना वुच्चमानस्स अत्थस्स वितथभावं पुब्बेपि जानित्वा, वचनक्खणे च जानन्तस्स मुसावादभणने। तेनाह **''जानित्वा''**तिआदि। **मुसावादे**ति च निमित्तत्थे भुम्मं, तस्मा मुसाभणननिमित्तं पाचित्तियन्ति एवमेत्थ, इतो परेसुपि ईदिसेसु अत्थो वेदितब्बो।

३. वदन्ति एतायाति वाचाति आह **''मिच्छा''**तिआदि। ''धनुना विज्झती''तिआदीसु विय ''चक्खुना दिट्ठ''न्ति पाकटवसेन वुत्तन्ति आह **''ओळारिकेना''**ति।

११. **गतो भविस्सती**ति एत्थापि सन्निट्ठानतो वुत्तत्ता मुसावादो जातो। **आपत्ति**न्ति पाचित्तियापत्तिं, न दुब्भासितं। जातिआदीहि दसहि अक्कोसवत्थूहि परं दवा वदन्तस्स हि तं होति। **चारेसु**न्ति उपनेसुं। वत्थुविपरीतता, विसंवादनपुरेक्खारता, यमत्थं वत्थुकामो, तस्स पुग्गलस्स विञ्ञापनपयोगो चाति इमानेत्थ तीणि अङ्गानि। वत्थुविपरीतताय हि असति विसंवादनपुरेक्खारताय विञ्ञापितेपि मुसावादो न होति, दुक्कटमत्तमेव होति। तस्मा सापि अङ्गमेवाति गहेतब्बं। उत्तरिमनुस्सधम्मारोचनत्थं मुसा भणन्तस्स पाराजिकं, परियायेन थुल्लच्चयं, अमूलकेन पाराजिकेन अनुद्धंसनत्थं सङ्घादिसेसो, सङ्घादिसेसेनानुद्धंसनओमसवादादीसु पाचित्तियं, अनुपसम्पन्नेसु दुक्कटं, उक्कट्ठहीनजातिआदीहि दवा अक्कोसन्तस्स दुब्भासितं, केवलं मुसा भणन्तस्स इध पाचित्तियं वुत्तं।

मुसावादसिक्खापदवण्णना निट्ठिता।

२. ओमसवादसिक्खापदवण्णना

१३. दुतिये **पुब्बे पतिट्ठितारप्पदेसं पुन अरे पत्ते**ति पठमं भूमियं पतिट्ठितनेमिप्पदेसे परिवत्तेत्वा पुन भूमियं पतिट्ठितेति अत्थो।

१५. **पुब्बे**ति अट्ठुप्पत्तियं। **पुप्फछड्डका** नाम गब्भमलादिहारका। **तच्छककम्म**न्ति पासाणकोट्टनादिवड्ढकीकम्मं। **हत्थमुद्दागणना**ति अङ्गुलिसङ्कोचनेनेव गणना। **अच्छिद्दकगणना** नाम एकट्ठानदसट्ठानादीसु सारियो ठपेत्वा अनुक्कमेन गणना। **आदि**-सद्देन सङ्कलनपटउप्पादनवोक्लनभागहारादिवसेन पवत्ता पिण्डगणना गहिता। यस्स सा पगुणा, सो रुक्खम्पि दिस्वा ''एत्तकानि एत्थ पण्णानी''ति जानाति। **यभ**-मेथुनेति वचनतो आह **''य-कार-भ-कारे''**तिआदि।

१६. **न पुरिमेना**ति मुसावादसिक्खापदेन। **सोपि आपत्तिया**ति उपसग्गादिविसिट्ठेहिपि वदन्तो पाचित्तियापत्तियाव कारेतब्बो।

२६. **दुब्भासित**न्ति सामञ्ञतो वुत्तत्ता पाळियं अनागतेहिपि परम्मुखा वदन्तस्सपि दुब्भासितमेवाति आचरिया वदन्ति ततो लामकापत्तिया अभावा, अनापत्तियापेत्थ भवितुं अयुत्तत्ता। **सब्बसत्ता**ति एत्थ वचनत्थविदूहि तिरच्छानादयोपि गहिता।

३५. अनुसासनीपुरेक्खारताय वा पापगरहिताय वा वदन्तानं चित्तस्स लहुपरिवत्तिभावतो अन्तरन्तरा कोपे उप्पन्नेपि अनापत्ति। कायविकारमत्तेनपि ओमसनसम्भवतो **''तिसमुट्ठानं, कायकम्म''**न्ति च वुत्तं। **परिवारे** पन ''चतुत्थेन आपत्तिसमुट्ठानेन...पे०... दुब्भासितं आपज्जेय्याति। न हीति वत्तब्ब''न्तिआदिना (परि० २७६) इतरानि समुट्ठानानि पटिक्खिपित्वा पञ्चमस्सेव वुत्तत्ता आह **''दुब्भासितापत्ति पनेत्थ वाचाचित्ततो समुट्ठाती''**ति। दवकम्यताय हि कायवाचाचित्तेहि ओमसन्तस्सपि वाचाचित्तमेव आपत्तिया अङ्गं होति, न पन कायो विज्जमानोपि धम्मदेसनापत्ति विय केवलं कायविकारेनेव। ओमसन्तस्स पन किञ्चापि इध दुब्भासितापत्तिया अनापत्ति, अथ खो कायकीळापटिक्खेपसिक्खापदेन दुक्कटमेवाति दट्ठब्बं। उपसम्पन्नं जातिआदीहि अनञ्ञापदेसेन अक्कोसनं, तस्स जाननं, अत्थपुरेक्खारतादीनं अभावोति इमानेत्थ तीणि अङ्गानि।

ओमसवादसिक्खापदवण्णना निट्ठिता।

३. पेसुञ्ञसिक्खापदवण्णना

३६. ततिये भण्डनं जातं एतेसन्ति **भण्डनजाता**। पिसतीति पिसुणा, वाचा, समग्गे भिन्ने करोतीति अत्थो। ताय वाचाय समन्नागतो पिसुणो, तस्स कम्मं **पेसुञ्ञ**न्ति एवमेत्थ अत्थो वेदितब्बो।

इधापि जातिआदीहि दसहि वत्थूहि पेसुञ्ञं उपसंहरन्तस्सेव पाचित्तियं, इतरेहि अक्कोसवत्थूहि दुक्कटं। अनक्कोसवत्थूहि पन उपसंहरन्तस्स दुक्कटमेवाति वदन्ति। जातिआदीहि अनञ्ञापदेसेन अक्कोसन्तस्स भिक्खुनो सुत्वा भिक्खुस्स उपसंहरणं, पियकम्यताभेदाधिप्पायेसु अञ्ञतरता, तस्स विजाननाति इमानेत्थ तीणि अङ्गानि।

पेसुञ्ञसिक्खापदवण्णना निट्ठिता।

४. पदसोधम्मसिक्खापदवण्णना

४५. चतुत्थे **पुरिमब्यञ्जनेन सदिस**न्ति ''रूपं अनिच्च''न्ति एत्थ अनिच्च-सद्देन सदिसं ''वेदना अनिच्चा''ति एत्थ अनिच्च-सद्दं वदति। **अक्खरसमूहो**ति अविभत्तिको वुत्तो। **पद**न्ति विभत्तिअन्तं वुत्तं।

एकं पदन्ति गाथापदमेव सन्धाय वदति। **पदगणनाया**ति गाथापदगणनाय। **अपापुणित्वा**ति सद्धिं अकथेत्वा। एतेन गाथाय पच्छिमपादे वुच्चमाने सामणेरो पठमपादादिं वदति, आपत्तियेव, तस्मिं निस्सद्दे एव इतरेन वत्तब्बन्ति दस्सेति।

अट्ठकथानिस्सितोति सङ्गीतित्तयारुळ्हं पोराणट्ठकथं सन्धाय वदति। इदानिपि ''यथापि दीपिको नाम, निलीयित्वा गण्हते मिगे''ति (मि० प० ६.१.५; विसुद्धि० १.२१७; दी० नि० अट्ठ० २.३७४; म० नि० अट्ठ० १.१०७; पारा० अट्ठ० २.१६५; पटि० म० अट्ठ० २.१.१६३) एवमादिकं अट्ठकथावचनं अत्थेव, **बुद्धघोसाचरियादीहि** पोराणट्ठकथानयेन वुत्तम्पि इध सङ्गहेतब्बन्ति वदन्ति। **पाळिनिस्सितो**ति उदानवग्गसङ्गहादिको। **विवट्टूपनिस्सित**न्ति निब्बाननिस्सितं। **थेरस्सा**ति नागसेनत्थेरस्स। **मग्गकथा**दीनि पकरणानि।

४६. पाळियं **अक्खराया**तिआदि लिङ्गविपल्लासेन वुत्तं, अक्खरेनातिआदिना अत्थो गहेतब्बो।

४८. **उपचारं मुञ्चित्वा**ति परिसाय द्वादसहत्थं मुञ्चित्वा एकतो ठितस्स वा निसिन्नस्स वा अनुपसम्पन्नस्स अकथेत्वा अञ्ञे उद्दिस्स भणन्तस्सापि अनापत्ति। सचे पन दूरे निसिन्नम्पि उद्दिस्स भणति, आपत्ति एव। **ओपातेती**ति सद्धिं कथेति। अनुपसम्पन्नता, वुत्तलक्खणधम्मं पदसो वाचनता, एकतो भणनञ्चाति इमानेत्थ तीणि अङ्गानि।

पदसोधम्मसिक्खापदवण्णना निट्ठिता।

५. सहसेय्यसिक्खापदवण्णना

५०-५१. पञ्चमे तत्रिदं निदस्सनन्ति सेसो। **दिरत्ततिरत्त**न्ति एत्थ दिरत्तग्गहणं वचनालङ्कारत्थं, निरन्तरं तिस्सोव रत्तियो वसित्वा चतुत्थदिवसादीसु सयन्तस्सेव आपत्ति, न एकन्तरिकादिवसेन सयन्तस्साति दस्सनत्थम्पीति दट्ठब्बं। दिरत्तविसिट्ठञ्हि तिरत्तं वुच्चमानं, तेन अनन्तरिकमेव तिरत्तं दीपेतीति। **पञ्चहि छदनेही**ति इट्ठकसिलासुधातिणपण्णेहि। **वाचुग्गतवसेना**ति पगुणवसेन। **दियड्ढहत्थुब्बेधो** वड्ढकीहत्थेन गहेतब्बो। **एकूपचारो** एकेन मग्गेन पविसित्वा अब्भोकासं अनुक्कमित्वा सब्बत्थ अनुपरिगमनयोग्गो, एतं बहुद्वारम्पि एकूपचारोव। तत्थ पन कुट्टादीहि रुन्धित्वा विसुं द्वारं योजेन्ति, नानूपचारो होति। सचे पन रुन्धति एव, विसुं द्वारं न योजेन्ति, ''एतम्पि एकूपचारमेव मत्तिकादीहि पिहितद्वारो विय गब्भो''ति गहेतब्बं। अञ्ञथा गब्भे पविसित्वा पमुखादीसु निपन्नानुपसम्पन्नेहि सहसेय्यापरिमुत्तिया गब्भद्वारं मत्तिकादीहि पिदहापेत्वा उट्ठिते अरुणे विवरापेन्तस्सपि अनापत्ति भवेय्याति।

तेसं पयोगे पयोगे भिक्खुस्स आपत्तीति एत्थ केचि ''अनुट्ठहनेन अकिरियसमुट्ठाना आपत्ति वुत्ता तस्मिं खणे सयन्तस्स किरियाभावा। इदञ्हि सिक्खापदं सिया किरियाय समुट्ठाति, सिया अकिरियाय समुट्ठाति। किरियासमुट्ठानता चस्स तब्बहुलवसेन वुत्ताति वदति। यथा चेतं, एवं दिवासयनम्पि। अनुट्ठहनेन, हि द्वारासंवरणेन चेतं अकिरियसमउट्ठानम्पि होती''ति वदन्ति। इदञ्च युत्तं विय दिस्सति, वीमंसित्वा गहेतब्बं।

''**उपरिमतलेन सद्धिं असम्बद्धभित्तिकस्सा**''ति इदं सम्बद्धभित्तिके वत्तब्बमेव नत्थीति दस्सनत्थं वुत्तं। उपरिमतले सयितस्स सङ्का एव नत्थीति ''**हेट्ठापासादे**''तिआदि वुत्तं। **नानूपचारे**ति बहि निस्सेणिया आरोहणीये।

सभासङ्खेपेनाति सभाकारेन। ''**अड्ढकुट्टके**''ति इमिना सण्ठानं दस्सेति। यत्थ तीसु द्वीसु वा पस्सेसु भित्तियो बद्धा, छदनं वा असम्पत्ता अड्ढभित्ति, इदं अड्ढकुट्टकं नाम। **वाळसङ्घाटो** नाम परिक्खेपस्स अन्तो थम्भादीनं उपरि वाळरूपेहि कतसङ्घाटो। **परिक्खेपस्स बहिगते**ति एत्थ यस्मिं पस्से परिक्खेपो नत्थि, तत्थ सचे भूमितो वत्थु उच्चं होति, उभतो उच्चवत्थुतो हेट्ठा भूमियं निब्बकोसब्भन्तरेपि अनापत्ति एव तत्थ सेनासनवोहाराभावतो। अथ वत्थु नीचं भूमिसममेव सेनासनस्स हेट्ठिमतले तिट्ठति, तत्थ परिक्खेपरहितदिसाय निब्बकोसब्भन्तरे सब्बत्थ आपत्ति होति, परिच्छेदाभावतो परिक्खेपस्स बहि एव अनापत्तीति दट्ठब्बं। **परिमण्डलं वा**तिआदि मज्झे उदकपतनत्थाय आकासङ्गणवन्तं सेनासनं सन्धाय वुत्तं। तत्थ **अपरिच्छिन्नगब्भूपचारे**ति एकेकगब्भस्स द्वीसु पस्सेसु पमुखेन गमनं परिच्छिन्दित्वा दियड्ढहत्थुब्बेधतो अनूनं कुट्टं कत्वा आकासङ्गणेन पवेसं करोन्ति, एवं अकतोति अत्थो। **गब्भपरिक्खेपो**ति चतुरस्सपासादादीसु समन्ता ठितगब्भभित्तियो सन्धाय वुत्तं।

पाटेक्कसन्निवेसाति एकेकदिसाय गब्भपाळियो इतरदिसासु गब्भपाळीनं अभावेन, भावेपि वा अञ्ञमञ्ञभित्तिच्छदनेहि असम्बन्धताय पाटेक्कसन्निवेसा नाम वुच्चति। **तं...पे०... सन्धाय वुत्त**न्ति तत्थ पाचित्तियेन अनापत्तीति वुत्तं, न दुक्कटेन। तादिसाय हि गब्भपाळिया पमुखं तीसु दिसासु भित्तीनं अभावेन एकदिसाय गब्भभित्तिमत्तेन सब्बच्छन्नं चूळपरिच्छन्नं नाम होति। तस्मा दुक्कटमेव। यदि पन तस्स पमुखस्स इतरदिसासुपि एकिस्सं, सब्बासु वा भित्तिं करोन्ति, तदा सब्बच्छन्नउपड्ढपरिच्छन्नादिभावतो पाचित्तियमेव होतीति दट्ठब्बं। **भूमियं विना जगतिया पमुखं सन्धाया**ति एत्थ उच्चवत्थुं अकत्वा भूमियं कतगेहस्स पमुखं सन्धाय अपरिक्खित्ते पाचित्तियेन अनापत्तीति इदं कथितं। उच्चवत्थुकं चे पमुखं होति, तेन वत्थुना परिक्खित्तसङ्ख्यमेव पमुखं गच्छतीति अधिप्पायो। **तत्था**ति अन्धकट्ठकथायं। **जगतिया पमाणं वत्वा**ति पकतिभूमिया निपन्नो यथा जगतिया उपरि सयितं न पस्सति, एवं उच्चातिउच्चवत्थुस्स उब्बेधप्पमाणं वत्वा। एकदिसाय उजुकमेव दीघं कत्वा सन्निवेसितो पासादो **एकसालसन्निवेसो**। द्वीसु, तीसु वा चतूसुपि वा दिसासु सिङ्घाटकसण्ठानादिवसेन कता द्विसालादिसन्निवेसा वेदितब्बा। सालप्पभेददीपनमेव चेत्थ पुरिमतो विसेसोति। **परिक्खेपो विद्धस्तो**ति पमुखस्स परिक्खेपं सन्धाय वदति।

५३. उपड्ढच्छन्नउपड्ढपरिच्छन्नं सेनासनं दुक्कटस्स आदिं वत्वा पाळियं दस्सितत्ता ततो अधिकं सब्बच्छन्नउपड्ढपरिच्छन्नादिकम्पि सब्बं पाळियं अवुत्तम्पि पाचित्तियस्सेव वत्थुभावेन दस्सितं सिक्खापदस्स पण्णत्तिवज्जत्ता, गरुके ठातब्बतो चाति वेदितब्बं। **सत्त पाचित्तियानी**ति पाळियं वुत्तपाचित्तियद्वयं सामञ्ञतो एकत्तेन गहेत्वा वुत्तं।

५४. पाळियं ''ततियाय रत्तिया पुरारुणा निक्खमित्वा पुन वसती''ति इदं उक्कट्ठवसेन वुत्तं, अनिक्खमित्वा पन पुरारुणा उट्ठहित्वा अन्तोछदने निसिन्नस्सापि पुनदिवसे सहसेय्येन अनापत्ति एव। **सेनम्बमण्डपवण्णं होती**ति सीहळदीपे किर उच्चवत्थुको सब्बच्छन्नो सब्बअपरिच्छन्नो एवंनामको सन्निपातमण्डपो अत्थि, तं सन्धायेतं वुत्तं। एत्थ चतुत्थभागो **चूळकं,** द्वे भागा **उपड्ढं,** तीसु भागेसु द्वे भागा **येभुय्य**न्ति इमिना नयेन चूळकच्छन्नपरिच्छन्नतादीनि वेदितब्बानि। पाचित्तियवत्थुकसेनासनं, तत्थ अनुपसम्पन्नेन सह निपज्जनं, चतुत्थदिवसे सूरियत्थङ्गमनन्ति इमानेत्थ तीणि अङ्गानि।

सहसेय्यसिक्खापदवण्णना निट्ठिता।

६. दुतियसहसेय्यसिक्खापदवण्णना

५५. छट्ठे मातुगामेन सद्धिं चतुत्थदिवसे सयन्तस्सापि इमिना सिक्खापदेन एकाव आपत्ति। केचि पन पुरिमसिक्खापदेनापीति द्वे आपत्तियो वदन्ति, तं न युत्तं ''अनुपसम्पन्नेना''ति अनित्थिलिङ्गेन वुत्तत्ता नपुंसकेन पन चतुत्थदिवसे सयन्तस्स सदुक्कटपाचित्तियं वत्तुं युत्तं। किञ्चापेत्थ पाळियं पण्डकवसेनेव दुक्कटं वुत्तं, तदनुलोमिका पन पुरिसउभतोब्यञ्जनकेन सह सयन्तस्स इमिना दुक्कटं, पुरिमेन चतुत्थदिवसे सदुक्कटपाचित्तियं। इत्थिउभतोब्यञ्जनको इत्थिगतिकोवाति अयं अम्हाकं खन्ति। मतित्थिया अनापत्तीति वदन्ति। पाचित्तियवत्थुकसेनासनं, तत्थ मातुगामेन सद्धिं निपज्जनं, सूरियत्थङ्गमनन्ति इमानेत्थ तीणि अङ्गानि।

दुतियसहसेय्यसिक्खापदवण्णना निट्ठिता।

७. धम्मदेसनासिक्खापदवण्णना

६०. सत्तमे **न यक्खेना**तिआदीनं ''अञ्ञत्र विञ्ञुना''ति इमिना सम्बन्धो। अञ्ञत्र विञ्ञुना पुरिसविग्गहेन, न यक्खादिनापीति एवमत्थो गहेतब्बोति अधिप्पायो। तादिसेनपि हि सह ठिताय देसेतुं न वट्टति। तंतंदेसभासाय अत्थं यथारुचि वट्टति एव।

इरियापथापरिवत्तनं, पुरिसं वा द्वादसहत्थूपचारे अपक्कोसापनं एत्थ अकिरिया। वुत्तलक्खणस्स धम्मस्स छन्नं वाचानं उपरि देसना, वुत्तलक्खणो मातुगामो, इरियापथपअवत्तनाभावो, विञ्ञूपुरिसाभावो, अपञ्हविस्सज्जनाति इमानेत्थ पञ्च अङ्गानि।

धम्मदेसनासिक्खापदवण्णना निट्ठिता।

८. भूतारोचनसिक्खापदवण्णना

७७. अट्ठमे **अन्तरा**ति परिनिब्बानकालतो पुब्बेपि। **अतिकड्ढियमानेना**ति ''वदथ, भन्ते, किं तुम्हेहि अधिगत''न्ति एवं निप्पीळियमानेन अतिबद्धियमानेन। तथारूपे पच्चये सति वत्तब्बमेव। **सुतपरियत्तिसीलगुण**न्ति एत्थ अत्थकुसलता सुतगुणो, पाळिपाठकुसलता परियत्तिगुणोति दट्ठब्बं। ''**चित्तक्खेपस्स वा अभावा**''ति इमिना खित्तचित्तवेदनाट्टतापि अरियानं नत्थीति दस्सेति।

पुब्बे अवुत्तेहीति चतुत्थपाराजिके अवुत्तेहि। इदञ्च सिक्खापदं पण्णत्तिअजआननवसेन एकन्ततो अचित्तकसमुट्ठानमेव होति अरियानं पण्णत्तिवीतिक्कमाभावा। झानलाभीनञ्च सत्थु आणावीतिक्कमपटिघचित्तस्स झानपरिहानतो भूतारोचनं न सम्भवति। उत्तरिमनुस्सधम्मस्स भूतता, अनुपसम्पन्नस्स आरोचनं, तङ्खणविजानना, अनञ्ञापदेसोति इमानेत्थ चत्तारि अङ्गानि।

भूतारोचनसिक्खापदवण्णना निट्ठिता।

९. दुट्ठुल्लारोचनसिक्खापदवण्णना

७८. नवमे **तत्थ भवेय्या**ति तत्थ कस्सचि मति एवं भवेय्य। अट्ठकथावचनमेव उपपत्तितो दळ्हं कत्वा पतिट्ठपेन्तो ''**इमिनापि चेत**''न्तिआदिमाह।

८२. **आदितो पञ्च सिक्खापदानी**ति पाणातिपातादीनि पञ्च। **सेसानी**ति विकालभोजनादीनि। सुक्कविस्सट्ठिआदि अज्झाचारोव। अन्तिमवत्थुं अनज्झापन्नस्स भिक्खुनो सवत्थुको सङ्घादिसेसो, अनुपसम्पन्नस्स आरोचनं, भिक्खुसम्मुतिया अभावोति इमानेत्थ तीणि अङ्गानि।

दुट्ठुल्लारोचनसिक्खापदवण्णना निट्ठिता।

१०. पथवीखणनसिक्खापदवण्णना

८६. दसमे अप्पपंसुमत्तिकाय पथविया अनापत्तिवत्थुभावेन वुत्तत्ता उपड्ढपंसुमत्तिकायपि पाचित्तियमेवाति गहेतब्बं। न हेतं दुक्कटवत्थूति सक्का वत्तुं जाताजातविनिमुत्ताय ततियपथविया अभावतो।

वट्टतीति इमस्मिं ठाने पोक्खरणिं खणाति ओकासस्स अनियमितत्ता वट्टति। **इमं वल्लिं खणा**ति पथवीखणनं सन्धाय वुत्तत्ता इमिनाव सिक्खापदेन आपत्ति, न भूतगामसिक्खापदेन। उभयम्पि सन्धाय वुत्ते पन द्वेपि पाचित्तिया होन्ति। **उदकपप्पटको**ति उदके अन्तोभूमियं पविट्ठे तस्स उपरिभागं छादेत्वा तनुकपंसु वा मत्तिका वा पटलं हुत्वा पतमाना तिट्ठति, तस्मिं उदके सुक्खेपि तं पटलं वातेन चलमाना तिट्ठति, तं उदकपप्पटको नाम।

अकतपब्भारेति अवळञ्जनट्ठानदस्सनत्थं वुत्तं। तादिसे एव हि वम्मिकस्स सम्भवोति। **मूसिकुक्करं** नाम मूसिकाहि खनित्वा बहि कतपंसुरासि। **अच्छदनन्ति**आदिवुत्तत्ता उजुकं आकासतो पतितवस्सोदकेन ओवट्ठमेव जातपथवी होति, न छदनादीसु पतित्वा ततो पवत्तउदकेन तिन्तन्ति वेदितब्बं। **मण्डपत्थम्भन्ति** साखामण्डपत्थम्भं। **उच्चालेत्वा**ति उक्खिपित्वा। **ततो**ति पुराणसेनासनतो।

८८. **महामत्तिकन्ति** भित्तिलेपनं। जातपथविता, तथासञ्ञिता, खणनखणापनानं अञ्ञतरन्ति इमानेत्थ तीणि अङ्गानि।

पथवीखणनसिक्खापदवण्णना निट्ठिता।

निट्ठितो मुसावादवग्गो पठमो।

२. भूतगामवग्गो

१. भूतगामसिक्खापदवण्णना

८९. दुतियवग्गस्स पठमे **निग्गहेतुं असक्कोन्तो**ति साखट्ठकविमाने साखाय छिज्जमानाय छिज्जन्ते तत्थ अछेदनत्थाय देवताय उपनीतं पुत्तं दिस्वापि कुठारिनिक्खेपवेगं निवत्तेतुं असक्कोन्तोति अत्थो। **रुक्खधम्मे**ति रुक्खस्स पवत्तियं। रुक्खानं विय छेदनादीसु अकुप्पनञ्हि रुक्खधम्मो नाम।

उप्पतितन्ति उप्पन्नं। **भन्तन्ति** धावन्तं। **वारये**ति निग्गण्हेय्य। **इतरो**ति उप्पन्नं कोधं अनिग्गण्हन्तो राजउपराजादीनं रस्मिमत्तग्गाहकजनो विय न उत्तमसारथीति अत्थो। **विसटं सप्पविसन्ति** सरीरे दाठावणानुसारेन वित्थिण्णं ब्यापेत्वा ठितं कण्हसप्पविसं विय। **जहाति ओरपारन्ति** पञ्चोरम्भागियसञ्ञोजनानि ततियमग्गेन जहाति। ''ओरपार''न्ति हि ओरिमतीरं वुच्चति। अथ वा **सो**ति ततियमग्गेन कोधं विनेत्वा ठितो भिक्खु अरहत्तमग्गेन ओरपारं जहातीति अत्थो। तत्थ **ओरं** नाम सकत्तभावो, अज्झत्तिकानि वा आयतनानि। **पारं** नाम परअत्तभावो, बाहिरानि वा आयतनानि। तदुभये पन छन्दरागं जहन्तो ''जहाति ओरिमपार''न्ति वुच्चति।

९०. **भवन्ती**ति वड्ढन्ति। **अहुवुन्ती**ति बभूवु। तेनाह **''जाता वड्ढिता''**ति। **भूतानं गामो**ति महाभूतानं हरिततिणादिभावेन समग्गानं समूहो। तब्बिनिमुत्तस्स गामस्स अभावं दस्सेतुं **''भूता एव वा गामो''**ति वुत्तं। **पातब्य**-सद्दस्स **पा** पानेति धात्वत्थं सन्धायाह **''परिभुञ्जितब्बता''**ति। सा च पातब्यता छेदनादि एव होतीति आह **''तस्सा…पे०… भूतगामस्स जाता छेदनादिपच्चया''**ति।

९१. **जात**-सद्दो एत्थ विजातपरियायोति ''पुत्तं विजाता इत्थी''तिआदीसु विय पसूतवचनोति आह **''पसूतानी''**ति, निब्बत्तपण्णमूलानीति अत्थो।

तानि दस्सेन्तोति तानि बीजानि दस्सेन्तो। कारियदस्सनमुखेनेव कारणञ्च गहितन्ति आह **''बीजतो निब्बत्तेन बीजं दस्सित''**न्ति।

९२. **''बीजतो सम्भूतो भूतगामो बीज''**न्ति इमिना उत्तरपदलोपेन ''पदुमगच्छतो निब्बत्तं पुप्फं पदुम''न्तिआदीसु वियायं वोहारोति दस्सेति। **यं बीजं भूतगामो नाम होती**ति निब्बत्तपण्णमूलं सन्धाय वदति। **यथारुतन्ति** यथापाठं।

''सञ्चिच्चा''ति वुत्तत्ता सरीरे लग्गभावं ञत्वापि उद्धरति, ''तं उद्धरिस्सामी''तिसञ्ञाय अभावतो वट्टति। **अनन्तक**-ग्गहणेन सासपमत्तिका गहिता, नामञ्हेतं तस्सा सेवालजातिया। मूलपण्णानं अभावेन **''असम्पुण्णभूतगामो नामा''**ति वुत्तं। सो बीजगामेन सङ्गहितोति। अवड्ढमानेपि भूतगाममूलकत्ता वुत्तं **''अमूलकभूतगामे सङ्गहं गच्छती''**ति। नाळिकेरस्स आवेणिकं कत्वा वदति।

सेलेय्यकं नाम सिलाय सम्भूता एका गन्धजाति। **पुप्फितकालतो पट्ठाया**ति विकसितकालतो पभुति। **छत्तकं गण्हन्तो**ति विकसितं गण्हन्तो। मकुळं पन रुक्खत्तचं अकोपेन्तेनपि गहेतुं न वट्टति, फुल्लं वट्टति। **हत्थकुक्कुच्चेना**ति हत्थचापल्लेन।

''पानीयं न वासेतब्ब''न्ति इदं अत्तनो पिवनपानीयं सन्धाय वुत्तं, अञ्ञेसं पन वट्टति अनुग्गहितत्ता। तेनाह **''अत्तना खादितुकामेना''**ति। **येसं रुक्खानं साखा रुहती**ति मूलं अनोतारेत्वा पण्णमत्तनिग्गमनमत्तेनपि वड्ढति। तत्थ कप्पियम्पि अकरोन्तो छिन्ननाळिकेरवेळुदण्डादयो कोपेतुं वट्टति।

''चङ्कमितट्ठानं दस्सेस्सामी''ति वुत्तत्ता केवलं चङ्कमनाधिप्पायेन वा मग्गगमनाधिप्पायेन वा अक्कमन्तस्स, तिणानं उपरि निसीदनाधिप्पायेन निसीदन्तस्स च दोसो नत्थि।

समणकप्पेहीति समणानं कप्पियवोहारेहि, अबीजनिब्बट्टबीजानिपि कप्पियभावतो ''समणकप्पानी''ति वुत्तानि। **अबीजं** नाम तरुणअम्बफलादीनि। निब्बट्टेतब्बं वियोजेतब्बं बीजं यस्मिं, तं पनसादि **निब्बट्टबीजं** नाम। **कप्पियन्ति वत्वावा**ति पुब्बकालकिरियावसेन वुत्तेपि वचनक्खणेव अग्गिसत्थादिना बीजगामे वणं कातब्बन्ति वचनतो पन पुब्बे कातुं न वट्टति, तञ्च द्विधा अकत्वा छेदनभेदनमेव दस्सेतब्बं। करोन्तेन च भिक्खुना ''कप्पियं करोही''ति याय कायचि भासाय वुत्तेयेव कातब्बं। **बीजगामपरिमोचनत्थं पुन कप्पियं कारेतब्बन्ति** कारापनस्स पठममेव अधिकतत्ता। **''कटाहेपि कातुं वट्टती''**ति वुत्तत्ता कटाहतो नीहताय मिञ्जाय वा बीजे वा यत्थ कत्थचि विज्झितुं वट्टति एव। भूतगामो, भूतगामसञ्ञिता, विकोपनं वा विकोपापनं वाति इमानेत्थ तीणि अङ्गानि।

भूतगामसिक्खापदवण्णना निट्ठिता।

२. अञ्ञवादकसिक्खापदवण्णना

९४. दुतिये **अञ्ञं वचनन्ति** यं दोसविभावनत्थं परेहि वुत्तवचनं तं तस्स अननुच्छविकेन अञ्ञेन वचनेन पटिचरति।

९८. यदेतं अञ्ञेनञ्ञं पटिचरणवसेन पवत्तवचनं, तदेव पुच्छितमत्थं ठपेत्वा अञ्ञं वदति पकासेतीति अञ्ञवादकन्ति आह **''अञ्ञेनञ्ञं पटिचरणस्सेतं नाम''**न्ति। **तुण्हीभूतस्सेतं नामन्ति** तुण्हीभावस्सेतं नामं, अयमेव वा पाठो। **अञ्ञवादकं आरोपेतुन्ति** अञ्ञवादे आरोपेतुं। **विहेसकन्ति** विहेसकत्तं।

९९. पाळियं **न उग्घाटेतुकामो**ति पटिच्छादेतुकामो।

१००. **अनारोपिते अञ्ञवादके**ति वुत्तदुक्कटं पाळियं आगतअञ्ञेनञ्ञपटिचरणवसेन युज्जति, अट्ठकथायं आगतनयेन पन मुसावादेन अञ्ञेनञ्ञं पटिचरन्तस्स पाचित्तियेन सद्धिं दुक्कटं, आरोपिते इमिनाव पाचित्तियं। केचि पन ''मुसावादपाचित्तियेन सद्धिं पाचित्तियद्वय''न्ति वदन्ति, वीमंसितब्बं। आदिकम्मिकस्सपि मुसावादे इमिनाव अनापत्तीति दट्ठब्बं। धम्मकम्मेन आरोपितता, आपत्तिया वा वत्थुना वा अनुयुञ्जियमानता, छादेतुकामताय अञ्ञेनञ्ञं पटिचरणं, तुण्हीभावो चाति इमानेत्थ तीणि अङ्गानि।

अञ्ञवादकसिक्खापदवण्णना निट्ठिता।

३. उज्झापनकसिक्खापदवण्णना

१०३. ततिये चिन्तायनत्थस्स **झे**-धातुस्स अनेकत्थताय ओलोकनत्थसम्भवतो वुत्तं **''ओलोकापेन्ती''**ति। **छन्दाया**ति लिङ्गविपल्लासोति आह **''छन्देना''**ति।

१०५. भिक्खुं लामकतो चिन्तापनत्थं अञ्ञेसं तं अवण्णकथनं **उज्झापनं** नाम। अञ्ञेसं पन अवत्वा अञ्ञमञ्ञं समुल्लपनवसेन भिक्खुनो दोसप्पकासनं **खिय्यनं** नामाति अयमेतेसं भेदो।

१०६. **अञ्ञं अनुपसम्पन्नं उज्झापेती**ति अञ्ञेन अनुपसम्पन्नेन उज्झापेति। **तस्स वा तं सन्तिके**ति तस्स अनुपसम्पन्नस्स सन्तिके तं सङ्घेन सम्मतं उपसम्पन्नं खिय्यति। इधापि मुसावादेन उज्झापनादीनं सम्भवतो दुक्कटट्ठानानि च आदिकम्मिकस्स अनापत्ति च इमिना एव सिक्खापदेन वुत्ताति वेदितब्बं सब्बत्थ मुसावादपाचित्तियस्स अनिवत्तितो। धम्मकम्मेन सम्मतता, उपसम्पन्नता, अगतिगमनाभावो, तस्स अवण्णकामता, यस्स सन्तिके वदति। तस्स उपसम्पन्नता, उज्झापनं वा खिय्यनं वाति इमानेत्थ छ अङ्गानि।

उज्झापनकसिक्खापदवण्णना निट्ठिता।

४. पठमसेनासनसिक्खापदवण्णना

११०. चतुत्थे **अपञ्ञाते**ति अप्पसिद्धे। इमं पन अट्ठ मासे मण्डपादीसु ठपनसङ्खातं अत्थविसेसं गहेत्वा भगवता पठममेव सिक्खापदं पञ्ञत्तन्ति अधिप्पायं ''अनुजानामि, भिक्खवे, अट्ठमासे''तिआदिवचनेन अनुपञ्ञत्तिसदिसेन पकासेत्वा विसुं अनुपञ्ञत्ति न वुत्ता। **परिवारे** पनेतं अनुजाननवचनं अनुपञ्ञत्तिट्ठानन्ति ''एका अनुपञ्ञत्ती''ति (परि० ६५-६७) वुत्तं।

नववायिमोति अधुना सुत्तेन वीतकच्छेन पलिवेठितमञ्चो। **ओनद्धो**ति कप्पियचम्मेन ओनद्धो। ते हि वस्सेन सीघं न नस्सन्ति। **''उक्कट्ठअब्भोकासिको''**ति इदं तस्स सुखपटिपत्तिदस्सनमत्तं, उक्कट्ठस्सापि पन चीवरकुटि वट्टतेव। **कायानुगतिकत्ता**ति भिक्खुनो तत्थेव निसीदनभावं दीपेति, तेन च वस्सभयेन सयं अञ्ञत्थ गच्छन्तस्स आपत्तीति दस्सेति। अब्भोकासिकानं तेमनत्थाय नियमेत्वा दायकेहि दिन्नम्पि अत्तानं रक्खन्तेन रक्खितब्बमेव।

''वलाहकानं अनुट्ठितभावं सल्लक्खेत्वा''ति इमिना गिम्हानेपि मेघे उट्ठिते अब्भोकासे निक्खिपितुं न वट्टतीति दीपेति। **तत्र तत्रा**ति चेतियङ्गणादिके तस्मिं तस्मिं अब्भोकासे नियमेत्वा निक्खित्ता। **मज्झतो पट्ठाय पादट्ठानाभिमुखा**ति यत्थ समन्ततो सम्मज्जित्वा अङ्गणमज्झे सब्बदा कचवरस्स सङ्कड्ढनेन मज्झे वालिका सञ्चिता होति। तत्थ कत्तब्बविधिदस्सनत्थं वुत्तं। उच्चवत्थुपादट्ठानाभिमुखं वा वालिका हरितब्बा। यत्थ वा पन कोणेसु वालिका सञ्चिता, तत्थ ततो पट्ठाय अपरदिसाभिमुखा हरितब्बाति केचि अत्थं वदन्ति। केचि पन ''सम्मट्ठट्ठानस्स पदवळञ्जेन अविकोपनत्थाय सयं असम्मट्ठट्ठाने ठत्वा अत्तनो पादाभिमुखं वालिका हरितब्बाति वुत्त''न्ति वदन्ति, तत्थ ''मज्झतो पट्ठाया''ति वचनस्स पयोजनं न दिस्सति।

१११. वङ्कपादतामत्तेन कुळीरपादकस्स सेसेहि विसेसो, न अटनीसु पादप्पवेसनविसेसेनाति दस्सेतुं **''यो वा पन कोची''**तिआदि वुत्तं। **तस्सा**ति उपसम्पन्नस्सेव।

निसीदित्वा...पे०... पाचित्तियन्ति एत्थ मेघुट्ठानाभावं ञत्वा ''पच्छा आगन्त्वा उद्धरिस्सामी''ति आभोगेन गच्छन्तस्स अनापत्ति, तेन पुनागन्तब्बमेव। **कप्पं लभित्वा**ति ''गच्छ, मा इध तिट्ठा''ति वुत्तवचनं लभित्वा।

आवासिकानंयेव पलिबोधोति आगन्तुकेसु किञ्चि अवत्वा निसीदित्वा ''आवासिका एव उद्धरिस्सन्ती''ति गतेसुपि आवासिकानमेव पलिबोधो। **महापच्चरिवादे** पन ''इदं अम्हाक''न्ति अवत्वापि निसिन्नानमेवाति अधिप्पायो। ''सन्थरित्वा वा सन्थरापेत्वा वा''ति वुत्तत्ता अनाणत्तिया पञ्ञापितत्तापि दुक्कटे कारणं वुत्तं। **उस्सारको**ति सरभाणको। सो हि उद्धं उद्धं पाळिपाठं सारेति पवत्तेतीति उस्सारकोति वुच्चति।

११२. **वण्णानुरक्खणत्थं कता**ति पटखण्डादीहि सिब्बित्वा कता। **भूमियं अत्थरितब्बा**ति चिमिलिकाय सति तस्सा उपरि, असति सुद्धभूमियं अत्थरितब्बा। **''सीहचम्मादीनं परिहरणेयेव पटिक्खेपो''**ति इमिना मञ्चपीठादीसु अत्थरित्वा पुन संहरित्वा ठपनादिवसेन अत्तनो अत्थाय परिहरणमेव न वट्टति, भूमत्थरणादिवसेन परिभोगो पन अत्तनो परिहरणं न होतीति दस्सेति। **खन्धके** हि ''अन्तोपि मञ्चे पञ्ञत्तानि होन्ति, बहिपि मञ्चे पञ्ञत्तानि होन्ती''ति एवं अत्तनो अत्तनो अत्थाय मञ्चादीसु पञ्ञपेत्वा **परिहरणवत्थुस्मिं** –

> ''न, भिक्खवे, महाचम्मानि धारेतब्बानि सीहचम्मं ब्यग्घचम्मं दीपिचम्मं। यो धारेय्य, आपत्ति दुक्कटस्सा''ति (महाव० २५५) –

पटिक्खेपो कतो। तस्मा वुत्तनयेनेवेत्थ अधिप्पायो दट्ठब्बो। **दारुमयपीठ**न्ति फलकमयपीठमेव। **पादकथलिक**न्ति अधोतपादं यस्मिं घंसन्ता धोवन्ति, तं दारुफलकादि।

११३. ''आगन्त्वा उद्धरिस्सामीति गच्छती''ति वुत्तत्ता अञ्ञेनपि कारणेन अनोतापेन्तस्सपि आगमने सापेक्खस्स अनापत्ति। तेनेव **मातिकाट्ठकथायं** ''मञ्चादीनं सङ्घिकता, वुत्तलक्खणे देसे सन्थरणं वा सन्थरापनं वा, अपलिबुद्धता, आपदाय अभावो, निरपेक्खता, लेड्डुपातातिक्कमो''ति (कङ्खा० अट्ठ० पठमसेनासनसिक्खापदवण्णना) एवमेत्थ निरपेक्खताय सद्धिं छ अङ्गानि वुत्तानि।

पठमसेनासनसिक्खापदवण्णना निट्ठिता।

५. दुतियसेनासनसिक्खापदवण्णना

११६. पञ्चमे **पावारो कोजवो**ति पच्चत्थरणत्थायेव ठपिता उग्गतलोमा अत्थरणविसेसा। **एत्तकमेव वुत्त**न्ति अट्ठकथासु वुत्तं। **सेनासनतो**ति सब्बपच्छिमसेनासनतो।

११७. **कुरुन्दट्ठकथायं** वुत्तमेवत्थं सविसेसं कत्वा दस्सेतुं **''किञ्चापि वुत्तो''**तिआदि आरद्धं। **वत्तब्बं नत्थी**ति रुक्खमूलस्स पाकटत्ता वुत्तं। **पलुज्जती**ति विनस्सति।

११८. येन मञ्चं वा पीठं वा वीनन्ति, तं **मञ्चपीठकवानं**। **सिलुच्चयलेण**न्ति पब्बतगुहा। **''आपुच्छनं पन वत्त''**न्ति इमिना आपत्ति नत्थीति दस्सेति। वुत्तलक्खणसेय्या, तस्सा सङ्घिकता, वुत्तलक्खणे विहारे सन्थरणं वा सन्थरापनं वा, अपलिबुद्धता, आपदाय अभावो, अनपेक्खस्स दिसापक्कमनं, उपचारसीमातिक्कमोति इमानेत्थ सत्त अङ्गानि।

दुतियसेनासनसिक्खापदवण्णना निट्ठिता।

६. अनुपखज्जसिक्खापदवण्णना

११९. छट्ठे **अनुपविसित्वा**ति समीपं पविसित्वा।

१२२. **उपचारं ठपेत्वा**ति दियड्ढहत्थूपचारं ठपेत्वा। सङ्घिकविहारता, अनुट्ठापनीयभावजाननं, सम्बाधेतुकामता, उपचारे निसीदनं वा निपज्जनं वाति इमानेत्थ चत्तारि अङ्गानि।

अनुपखज्जसिक्खापदवण्णना निट्ठिता।

७. निक्कड्ढनसिक्खापदवण्णना

१२६. सत्तमे **कोट्ठकानी**ति द्वारकोट्ठकानि।

१२८. **''सकलसङ्घारामतो निक्कड्ढितुं न वट्टती''**ति इदं अननुरूपतो वुत्तं। पापगरहिताय हि अकुपितचित्तेन निक्कड्ढापेन्तस्स इमिना सिक्खापदेन आपत्ति नत्थि ''कुपितो अनत्तमनो''ति वुत्तत्ता। अञ्ञापेक्खा आपत्ति न दिस्सति। पाळियं **''अलज्जिं निक्कड्ढती''**तिआदीसु चित्तस्स लहुपरिवत्तिताय अन्तरन्तरा कोपे उप्पन्नेपि अनापत्ति अलज्जितादिपच्चयेनेव निक्कड्ढनस्स आरद्धत्ता। सङ्घिकविहारो, उपसम्पन्नस्स भण्डनकारकभावादिविनिमुत्तता, कोपेन निक्कड्ढनं वा निक्कड्ढापनं वाति इमानेत्थ तीणि अङ्गानि।

निक्कड्ढनसिक्खापदवण्णना निट्ठिता।

८. वेहासकुटिसिक्खापदवण्णना

१२९. अट्ठमं उत्तानमेव। सङ्घिको विहारो, असीसघट्टवेहासकुटि, हेट्ठापरिभोगता, अपटाणिदिन्ने आहच्चपादके निसीदनं वा निपज्जनं वाति इमानेत्थ चत्तारि अङ्गानि।

वेहासकुटिसिक्खापदवण्णना निट्ठिता।

९. महल्लकविहारसिक्खापदवण्णना

१३५. नवमे ''महल्लको नाम विहारो सस्सामिको''ति वुत्तत्ता सञ्ञाचिकाय कुटिया अनापत्तीति वदन्ति। **यस्सा**ति विहारस्स। **सा अपरिपूरूपचारापि होती**ति विवरियमानं कवाटं यं भित्तिं आहनति, सा सामन्ता कवाटवित्थारप्पमाणा उपचाररहितापि होतीति अत्थो। आलोकं वातपानं सन्धेति घटयतीति **आलोकसन्धी**ति कवाटं वुच्चति। द्वारवातपानूपचारतो अञ्ञत्थ पुनप्पुनं लिम्पनादिं करोन्तस्स पिण्डगणनाय पाचित्तियं।

केचि पन ''पाळियं पाचित्तियस्स अवुत्तत्ता दुक्कट''न्ति वदन्ति। **अधिट्ठातब्ब**न्ति संविधातब्बं। **हरिते ठितो अधिट्ठाति। आपत्ति दुक्कटस्सा**ति हरितयुत्ते खेत्ते ठत्वा छादेन्तस्स दुक्कटन्ति अत्थो। केचि पन ''तादिसे खेत्ते विहारं करोन्तस्स दुक्कट''न्ति वदन्ति, तं पाळिया न समेति।

१३६. **उजुकमेव छादन**न्ति छादनमुखवट्टितो पट्ठाय याव पिट्ठिवंसकूटागारकण्णिकादि, ताव इट्ठकादीहि उजुकं छादनं। इमिना पन येन सब्बस्मिं विहारे एकवारं छादिते तं छादनं एकमग्गन्ति गहेत्वा पाळियं ''द्वे मग्गे''तिआदि वुत्तं। परियायेन छादनम्पि इमिनाव नयेन योजेतब्बन्ति वदन्ति, तं ''पुनप्पुनं छादापेसी''ति इमाय पाळिया च ''सब्बम्पि चेतं छदनं छदनूपरि वेदितब्ब''न्ति इमिना अट्ठकथावचनेन च समेति।

पाळियं ''मग्गेन छादेन्तस्स परियायेन छादेन्तस्सा''ति इदञ्च इट्ठकादीहि, तिणपण्णेहि च छादनप्पकारभेददस्सनत्थं वुत्तं। केचि पन ''पन्तिया छादितस्स छदनस्स उपरि छदनमुखवट्टितो पट्ठाय उद्धं उजुकमेव एकवारं छादनं एकमग्गन्ति गहेत्वा 'द्वे मग्गे'तिआदि वुत्तं, न पन सकलविहारछादनं। एस नयो परियायेन छादनेपी''ति वदन्ति, तं पाळिअट्ठकथाहि न समेति।

ततियाय मग्गन्ति एत्थ **ततियाया**ति उपयोगत्थे सम्पदानवचनं, ततियं मग्गन्ति अत्थो। अयमेव वा पाठो। **तिणपण्णेहि लब्भती**ति तिणपण्णेहि छादेत्वा उपरि उल्लित्तावलित्तकरणं सन्धाय वुत्तं। केवलं तिणकुटिया हि अनापत्ति वुत्ता। **तिण्णं मग्गान**न्ति मग्गवसेन छादितानं तिण्णं छदनानं। **तिण्णं परियायान**न्ति एत्थापि एसेव नयो। महल्लकविहारता, अत्तनो वासागारता, उत्तरि अधिट्ठानन्ति इमानेत्थ तीणि अङ्गानि।

महल्लकविहारसिक्खापदवण्णना निट्ठिता।

१०. सप्पाणकसिक्खापदवण्णना

१४०. दसमे **मातिकायं** सप्पाणकउदकं तिणेन वा मत्तिकाय वा सिञ्चेय्य, छड्डेय्याति अत्थो। अथ वा उदकं गहेत्वा बहि सिञ्चेय्य, तस्मिञ्च उदके तिणं वा मत्तिकं वा आहरित्वा पक्खिपेय्याति अज्झाहरित्वा अत्थो वेदितब्बो। तेनाह **''सकटभारमत्तञ्चेपी''**तिआदि। **इद**न्ति तिणमत्तिकपक्खिपनविधानं। **वुत्त**न्ति मातिकायं ''तिणं वा मत्तिकं वा''ति एवं वुत्तं, अट्ठकथासु वा वुत्तं।

इदञ्च सिक्खापदं बाहिरपरिभोगं सन्धाय वत्थुवसेन वुत्तं अब्भन्तरपरिभोगस्स विसुं वक्खमानत्ता। तदुभयम्पि ''सप्पाणक''न्ति कत्वा वधकचित्तं विनाव सिञ्चने पञ्ञत्तत्ता ''पण्णत्तिवज्ज''न्ति वुत्तं। वधकचित्ते पन सति सिक्खापदन्तरेनेव पाचित्तियं, न इमिनाति दट्ठब्बं। उदकस्स सप्पाणकता, ''सिञ्चनेन पाणका मरिस्सन्ती''ति जाननं, तादिसमेव च उदकं विना वधकचेतनाय केनचिदेव करणीयेन तिणादीनं सिञ्चनन्ति इमानेत्थ चत्तारि अङ्गानि।

सप्पाणकसिक्खापदवण्णना निट्ठिता।

निट्ठितो सेनासनवग्गो दुतियो।

''भूतगामवग्गो''तिपि एतस्सेव नामं।

३. ओवादवग्गो

१. ओवादसिक्खापदवण्णना

१४४. ततियवग्गस्स पठमे **तिरच्छानभूत**न्ति तिरोकरणभूतं, बाहिरभूतन्ति अत्थो। **समिद्धो**ति परिपुण्णो। **सहितत्थो** अत्थयुत्तो। अत्थगम्भीरतादिना **गम्भीरो**।

१४५-१४७. परतोति उत्तरि। **करोन्तोवा**ति परिबाहिरे करोन्तो। **विभङ्गे**ति झानविभङ्गे। **चरण**न्ति निब्बानगमनाय पादं।

यदस्साति यं अस्स। **धारेती**ति अविनस्समानं धारेति। **परिकथनत्थ**न्ति पकिण्णककथावसेन परिच्छिन्नधम्मकथनत्थं। **तिस्सो अनुमोदना**ति सङ्घभत्तादीसु दानानिसंसप्पटिसंयुत्ता **निधिकुण्डसुत्ता**दि (खु० पा० ८.१ आदयो) -अनुमोदना, गेहप्पवेसमङ्गलादीसु **मङ्गलसुत्ता**दि (खु० पा० ५.१ आदयो; सु० नि० मङ्गलसुत्त) -अनुमोदना, मतकभत्तादिअमङ्गलेसु **तिरोकुट्टा**दि (खु० पा० ७.१ आदयो; पे० व० १४ आदयो) -अनुमोदनाति इमा तिस्सो अनुमोदना। **कम्माकम्मविनिच्छयो**ति परिवारावसाने **कम्मवग्गे** (परि० ४८२ आदयो) वुत्तविनिच्छयो। **समाधिवसेना**ति समथपुब्बकवसेन। **विपस्सनावसेन वा**ति दिट्ठिविसुद्धिआदिकाय सुक्खविपस्सनाय वसेन। अत्तनो सीलरक्खणत्थं अपरानपेक्खताय येन कामं गन्तुं चतस्सो दिसा अरहति, अस्स वा सन्ति, तासु वा साधूति **चातुद्दिसो**।

अभिविनयेति पातिमोक्खसंवरसङ्खाते संवरविनये, तप्पकासके वा विनयपिटके। **विनेतु**न्ति सिक्खापेतुं पकासेतुं। **पगुणा वाचुग्गता**ति पाठतो च अत्थतो च पगुणा मुखे सन्निधापनवसेन वाचुग्गता कातब्बा। अत्थमत्तवसेनपेत्थ योजनं करोन्ति। **अभिधम्मे**ति लक्खणरसादिवसेन परिच्छिन्ने नामरूपधम्मे। पुब्बे किर महाथेरा परियत्तिअनन्तरधानाय एकेकस्स गणस्स दीघनिकायादिएकेकधम्मकोट्ठासं निय्यातेन्ता ''तुम्हे एतं पाळितो च अट्ठकथातो च परिहरथ, सक्कोन्ता उत्तरिपि उग्गण्हथा''ति एवं सकलधम्मं गन्थवसेन निय्यातेन्ति, तत्थ ते च भिक्खू गन्थनामेन दीघभाणका मज्झिमभाणकाति वोहरीयन्ति, ते च अत्तनो भारभूतं कोट्ठासं परिच्चजित्वा अञ्ञं उग्गहेतुं न लभन्ति। तं सन्धायाह **''सचे मज्झिमभाणको होती''**तिआदि।

तत्थ **हेट्ठिमा वा तयो वग्गा**ति महावग्गतो हेट्ठिमा सगाथकवग्गो (सं० नि० १.१ आदयो), निदानवग्गो (सं० नि० २.१ आदयो), खन्धवग्गोति (सं० नि० ३.१ आदियो) इमे तयो वग्गा। **तिकनिपाततो पट्ठाय हेट्ठा**ति एककनिपातदुकनिपाते सन्धाय वुत्तं। धम्मपदम्पि सह वत्थुना जातकभाणकेन अत्तनो जातकेन सद्धिं उग्गहेतब्बं। **ततो ओरं न वट्टती**ति महापच्चरिवादस्स अधिप्पायो। **ततो तती**ति दीघनिकायादितो। उच्चिनित्वा उग्गहितं सद्धम्मस्स ठितिया, भिक्खुनोपि पुब्बापरानुसन्धिआदिकुसलताय च न होतीति ''तं न वट्टती''ति पटिक्खित्तं। **अभिधम्मे किञ्चि उग्गहेतब्बन्ति न वुत्त**न्ति एत्थ यस्मा विनये कुसलत्तिकादिविभागो, सुत्तन्तेसु समथविपस्सनामग्गो च अभिधम्मपाठं विना न विञ्ञायति, अन्धकारे पविट्ठकालो विय होति, तस्मा सुत्तविनयानं गहणवसेन अभिधम्मग्गहणं वुत्तमेवाति विसुं न वुत्तन्ति वेदितब्बं। यथा ''भोजनं भुञ्जितब्ब''न्ति वुत्ते ''ब्यञ्जनं खादितब्ब''न्ति अवुत्तम्पि वुत्तमेव होति तदविनाभावतो, एवंसम्पदमिदं दट्ठब्बं।

परिमण्डलपदब्यञ्जनायाति परिमण्डलानि परिपुण्णानि पदेसु सिथिलधनितादिब्यञ्जनानि यस्सं, ताय। पुरस्स एसाति **पोरी,** नगरवासीनं कथाति अत्थो। **अनेलगळाया**ति एत्थ **एला**ति खेळं तग्गळनविरहिताय। **कल्याणवाक्करणो**ति एत्थ वाचा एव वाक्करणं, उदाहरणघोसो। कल्याणं मधुरं वाक्करणमस्साति कल्याणवाक्करणो। उपसम्पन्नाय मेथुनेनेव अभब्बो होति, न सिक्खमानासामणेरीसूति आह **''भिक्खुनिया कायसंसग्गं वा''**तिआदि।

१४८. गरुकेहीति गरुकभण्डेहि। **एकतोउपसम्पन्नाया**ति उपयोगत्थे भुम्मवचनं। **भिक्खूनं सन्तिके उपसम्पन्ना** नाम परिवत्तलिङ्गा वा पञ्चसतसाकियानियो वा। एता पन एकतोउपसम्पन्ना ओवदन्तस्स पाचित्तियमेव।

१४९. न निमन्तिता हुत्वा गन्तुकामाति निमन्तिता हुत्वा भोजनपरियोसाने गन्तुकामा न होन्ति, तत्थेव वसितुकामा होन्तीति अत्थो। **यतो**ति भिक्खुनुपस्सयतो। **याचित्वा**ति ''तुम्हेहि आनीतओवादेनेव मयम्पि वसिस्सामा''ति याचित्वा। **तत्था**ति तस्मिं भिक्खुनुपस्सये। अभिक्खुकावासे वस्सं वसन्तिया पाचित्तियं, अपगच्छन्तिया दुक्कटं।

इमासु कतरापत्ति परिहरितब्बाति चोदनं परिहरन्तो आह **''सा रक्खितब्बा''**ति। सा वस्सानुगमनमूलिका आपत्ति रक्खितब्बा, इतराय अनापत्तिकारणं अत्थीति अधिप्पायो। तेनाह **''आपदासु ही''**तिआदि।

ओवादत्थायाति ओवादे याचनत्थाय। **द्वे तिस्सो**ति द्वीहि तीहि, करणत्थे चेतं पच्चत्तवचनं। **पासादिकेना**ति पसादजनकेन कायकम्मादिना। **सम्पादेतू**ति तिविधं सिक्खं सम्पादेतु। असम्मतता, भिक्खुनिया परिपुण्णूपसम्पन्नता, ओवादवसेन अट्ठगरुधम्मदानन्ति इमानेत्थ तीणि अङ्गानि।

ओवादसिक्खापदवण्णना निट्ठिता।

२. अत्थङ्गतसिक्खापदवण्णना

१५३. दुतिये **कोकनद**न्ति पदुमविसेसं, तं किर बहुपत्तं वण्णसम्पन्नं। अयञ्हेत्थ अत्थो – यथा कोकनदसङ्खातं पदुमं, एवं फुल्लमुखपदुमं अवीतगुणगन्धं निम्मले अन्तलिक्खे आदिच्चं विय च अत्तनो तेजसा तपन्तं ततो एव विरोचमानं अङ्गेहि निच्छरणकजुतिया अङ्गीरसं सम्मासम्बुद्धं पस्साति। **रजोहरण**न्ति सरीरे रजं पुञ्छतीति रजोहरणन्ति पुञ्छनचोळस्स नामं। ओभासविस्सज्जनपुब्बका भासितगाथा **ओभासगाथा** नाम। **विसुद्धिमग्गा**दीसु (विसुद्धि० २.३८६) पन ''रागो रजो न च पन रेणु वुच्चती''तिआदि ओभासगाथा वुत्ता, न पनेसा ''अधिचेतसो''ति गाथा। अयञ्च **चूळपन्थकत्थेरस्स** उदानगाथाति उदानपाळियं नत्थि, **एकुदानियत्थेरस्स** (थेरगा० १.६७ एकुदानियत्थेरगाथावण्णना) नायं उदानगाथाति तत्थ वुत्तं। इध पन पाळिया एव वुत्तत्ता थेरस्सापि उदानगाथाति गहेतब्बं। इध च अगरुधम्मेनापि ओवदतो पाचित्तियमेव। अत्थङ्गतसूरियता, परिपुण्णूपसम्पन्नता, ओवदनन्ति इमानेत्थ तीणि अङ्गानि।

अत्थङ्गतसिक्खापदवण्णना निट्ठिता।

३. भिक्खुनुपस्सयसिक्खापदवण्णना

१६२. ततियं उत्तानमेव। उपस्सयूपगमनं, परिपुण्णूपसम्पन्नता, समयाभावो, गरुधम्मेहि ओवदनन्ति इमानेत्थ चत्तारि अङ्गानि।

भिक्खुनुपस्सयसिक्खापदवण्णना निट्ठिता।

४. आमिससिक्खापदवण्णना

१६४. चतुत्थे आमिसनिरपेक्खम्पि आमिसहेतु ओवदतीतिसञ्ञाय भणन्तस्सपि अनापत्ति सचित्तकत्ता सिक्खापदस्स। सेसमेत्थ उत्तानमेव। उपसम्पन्नता, धम्मेन लद्धसम्मुतिता, अनामिसन्तरता, अवण्णकामताय एवं भणनन्ति इमानेत्थ चत्तारि अङ्गानि।

आमिससिक्खापदवण्णना निट्ठिता।

१६९. पञ्चमं चीवरदानसिक्खापदं उत्तानमेव।

६. चीवरसिब्बनसिक्खापदवण्णना

१७६. छट्ठे **कथिनवत्त**न्ति कथिनमासे चीवरं करोन्तानं सब्रह्मचारीनं सहायभावूपगमनं सन्धाय वुत्तं। **वञ्चेत्वा**ति ''तव ञातिकाया''ति अवत्वा ''एकिस्सा भिक्खुनिया''ति एत्तकमेव वत्वा ''एकिस्सा भिक्खुनिया''ति सुत्वा ते अञ्ञातिकसञ्ञिनो अहेसुन्ति आह **''अकप्पिये नियोजितत्ता''**ति। अञ्ञातिकाय भिक्खुनिया सन्तकता, निवासनपारुपनूपगता, वुत्तनयेन सिब्बनं वा सिब्बापनं वाति इमानेत्थ

तीणि अङ्गानि।

चीवरसिब्बनसिक्खापदवण्णना निट्ठिता।

७. संविधानसिक्खापदवण्णना

१८३. सत्तमे पाळियं **गच्छाम भगिनि गच्छामाय्या**ति भिक्खुपुब्बकं संविधानं, इतरं भिक्खुनिपुब्बकं। **एकद्धानमग्ग**न्ति एकतो अद्धानसङ्खातं मग्गं। **हिय्यो**ति सुवे। **परे**ति ततिये दिवसे।

द्विधा वुत्तप्पकारोति पादगमने पक्खगमनेति द्विधा वुत्तप्पकारो। **उपचारो न लब्भती**ति यो परिक्खित्तादिगामस्स एकलेड्डुपातादिउपचारो वुत्तो, सो इध न लब्भति आसन्नत्ता। एतेन च अन्तरघरेयेवेत्थ गामोति अधिप्पेतो, न सकलं गामखेत्तं। तत्थापि यत्थ उपचारो लब्भति, तत्थ उपचारोक्कमने एव आपत्तीति दस्सेति। तेनाह **''रतनमत्तन्तरो''**तिआदि। उपचारोक्कमनञ्चेत्थ उपचारब्भन्तरे पविसनमेव होति। तत्थ अप्पविसित्वापि उपचारतो बहि अद्धयोजनब्भन्तरगतेन मग्गेन गच्छन्तोपि मग्गस्स द्वीसु पस्सेसु अद्धयोजनब्भन्तरगतं गामूपचारं सब्बं ओक्कमित्वा गच्छतिच्चेव वुच्चति। अद्धयोजनतो बहि गतेन मग्गेन गच्छन्तो न गामूपचारगणनाय कारेतब्बो, अद्धयोजनगणनायेव कारेतब्बो। एवञ्च सति अनन्तरसिक्खापदे नावायेव गामतीरपस्सेन गच्छन्तस्स गामूपचारगणनाय आपत्ति समत्थिता होति। न हि सक्का नावाय गामूपचारब्भन्तरे पविसितुं। तिण्णं मग्गानं सम्बन्धट्ठानं **सिङ्घाटकं**। **एत्थन्तरे संविदहिते**ति एत्थ न केवलं यथावुत्तरथिकादीसु एव संविदहने दुक्कटं, अन्तरामग्गेपीति अधिप्पायो।

अद्धयोजनं अतिक्कमन्तस्साति असति गामे अद्धयोजनं अतिक्कमन्तस्स। यस्मिञ्हि गामखेत्तभूतेपि अरञ्ञे अद्धयोजनब्भन्तरे गामो न होति, तम्पि इध अगामकं अरञ्ञन्ति अधिप्पेतं, न विञ्झाटवादयो।

१८५. **रट्ठभेदे**ति रट्ठविलोपे। **चक्कसमारुळ्हा**ति इरियापथचक्कं, सकटचक्कं वा समारुळ्हा। द्विन्नम्पि संविदहित्वा मग्गप्पटिपत्ति, अविसङ्केतं, समयाभावो, अनापदा, गामन्तरोक्कमनं वा अद्धयोजनातिक्कमो वाति इमानेत्थ पञ्च अङ्गानि। एकतोउपसम्पन्नादीहि सद्धिं संविधाय गच्छन्तस्स पन मातुगामसिक्खापदेन आपत्ति।

संविधानसिक्खापदवण्णना निट्ठिता।

८. नावाभिरुहनसिक्खापदवण्णना

१८९. अट्ठमे **एकं तीरं…पे०… निरन्तर**न्ति नदितो अद्धयोजनब्भन्तरे पदेसे निविट्ठगामेहि निरन्तरता वुत्ता। **एकं अगामकं अरञ्ञ**न्ति तथा निविट्ठगामाभावेन वुत्तं। **अगामकतीरपस्सेना**तिआदि पन अतिरेकअद्धयोजनवित्थतं नदिं सन्धाय वुत्तं। ततो ऊनवित्थाराय हि नदिया मज्झेनापि गमने तीरद्वयस्सापि अद्धयोजनब्भन्तरे गतत्ता गामन्तरगणनाय, अद्धयोजनगणनाय च आपत्तियो परिच्छिन्दितब्बा। तेनेव **''योजनवित्थता…पे०… अद्धयोजनगणनाय पाचित्तियानी''**ति वुत्तं। तेनेव हि योजनतो ऊनाय नदिया अद्धयोजनब्भन्तरगततीरवसेनेव आपत्तिगणनं वुत्तमेव होति। **''सब्बअट्ठकथासू''**तिआदिना वुत्तमेवत्थं समत्थेति। तत्थ किञ्चापि समुद्दतळाकादीसु पाचित्तियं न वुत्तं, तथापि कीळापुरेक्खारस्स तत्थ दुक्कटमेवाति गहेतब्बं, पठमं कीळापुरेक्खारस्सापि पच्छा नावाय निद्दुपगतस्स, योनिसो वा मनसि करोन्तस्स गामन्तरोक्कमनादीसुपि आपत्तिसम्भवतो पण्णत्तिवज्जता, तिचित्तता चस्स सिक्खापदस्स वुत्ताति वेदितब्बं। सेसं सुविञ्ञेय्यमेव।

नावाभिरुहनसिक्खापदवण्णना निट्ठिता।

९. परिपाचितसिक्खापदवण्णना

१९७. नवमे पाळियं **''सिक्खमाना…पे०… पञ्च भोजनानि ठपेत्वा सब्बत्थ अनापत्ती''**ति इदं इमिना सिक्खापदेन अनापत्तिं सन्धाय वुत्तं। पञ्चहि सहधम्मिकेहि कतविञ्ञत्तिपरिकथादीहि उप्पन्नं परिभुञ्जन्तस्स दुक्कटमेव। भिक्खुनिया परिपाचितता, तथा जाननं, गिहिसमारम्भाभावो, भोजनता, तस्स अज्झोहरणन्ति इमानेत्थ पञ्च अङ्गानि।

परिपाचितसिक्खापदवण्णना निट्ठिता।

१०. रहोनिसज्जसिक्खापदवण्णना

१९८. दसमे **उपनन्दस्स चतुत्थसिक्खापदेना**ति मातुगामेन रहोनिसज्जसिक्खापदं सन्धाय वुत्तं, तं पन अचेलकवग्गे पञ्चमम्पि उपनन्दं आरब्भ पञ्ञत्तेसु चतुत्थत्ता एवं वुत्तन्ति दट्ठब्बं।

रहोनिसज्जसिक्खापदवण्णना निट्ठिता।

निट्ठितो ओवादवग्गो ततियो।

४. भोजनवग्गो

१. आवसथपिण्डसिक्खापदवण्णना

२०६. चतुत्थवग्गस्स पठमे **इमेसंयेवा**ति इमेसं पासण्डानंयेव। **एत्तकान**न्ति इमस्मिं पासण्डे एत्तकानं।

२०८. **''गच्छन्तो वा आगच्छन्तो वा''**ति इदं अद्धयोजनवसेन गहेतब्बं। अञ्ञे उद्दिस्स पञ्ञत्तञ्च भिक्खूसु अप्पसन्नेहि तित्थियेहि सामञ्ञतोपि पञ्ञत्तम्पि भिक्खूनं न वट्टति एव। आवसथपिण्डता, अगिलानता, अनुवसित्वा भोजनन्ति इमानेत्थ तीणि अङ्गानि।

आवसथपिण्डसिक्खापदवण्णना निट्ठिता।

२. गणभोजनसिक्खापदवण्णना

२०९. दुतिये **अभिमारे**ति अभिभवित्वा भगवन्तं मारणत्थाय पयोजिते धनुधरे। ननु ''राजानम्पि मारापेसी''ति वचनतो इदं सिक्खापदं अजातसत्तुनो काले पञ्ञत्तन्ति सिद्धं, एवञ्च सति पाळियं ''तेन खो पन समयेन रञ्ञो मागधस्स…पे०… ञातिसालोहितो आजीवकेसु पब्बजितो होति…पे०… बिम्बिसारं एतदवोचा''तिआदि विरुज्झतीति? न विरुज्झति। सो किर आजीवको बिम्बिसारकालतो पभुति अन्तरन्तरा भिक्खू निमन्तेत्वा दानं देन्तो अजातसत्तुकालेपि सिक्खापदे पञ्ञत्तेपि भिक्खूनं सन्तिके दूतं पाहेसि, भिक्खू च कुक्कुच्चायन्ता निवारेसुं। तस्मा आदितो पट्ठाय तं वत्थु दस्सितन्ति वेदितब्बं।

२१५. अञ्ञमञ्ञं विसदिसं रज्जं विरज्जं, विरज्जतो आगता **वेरज्जका**। ते च यस्मा जातिगोत्तादितो नानाविधा, तस्मा **नानावेरज्जकेति**पि अत्थो।

२१७-८. इमस्स सिक्खापदस्स वत्थुवसेनेव विञ्ञत्तितो गणभोजनत्थता सिद्धाति तं अवत्वा पदभाजने असिद्धमेव निमन्तनतो गणभोजनं दस्सितन्ति वेदितब्बं। तेनाह **''द्वीहाकारेही''**तिआदि। **''येन**

केनचि वेवचनेना''ति वुत्तत्ता ''भोजनं गण्हथा''तिआदिसामञ्ञनामेनापि गणभोजनं होति। यं पन पाळियं अद्धानगमनादिवत्थूसु ''इधेव भुञ्जथा''ति वुत्तवचनस्स कुक्कुच्चायनं, तम्पि ओदनादिनामं गहेत्वा वुत्तत्ता एव कतन्ति वेदितब्बं। **एकतो गण्हन्ती**ति अञ्ञमञ्ञस्स द्वादसहत्थं अमुञ्चित्वा एकतो ठत्वा गण्हन्ति।

''**अम्हाकं चतुन्नम्पि भत्तं देही**''ति वुत्तत्ता पाळि (वण्णना) यं ''त्वं एकस्स भिक्खुनो भत्तं देही''तिआदिनो वुत्तत्ता च भोजननामेन विञ्ञत्तमेव गणभोजनं होति, तञ्च अञ्ञेन विञ्ञत्तम्पि एकतो गण्हन्तानं सब्बेसम्पि होतीति दट्ठब्बं। विसुं गहितं पन विञ्ञत्तं भुञ्जतो पणीतभोजनादिसिक्खापदेहि आपत्ति एव।

आगन्तुकपट्टन्ति अच्छिन्दित्वा अन्वाधिं आरोपेत्वा करणचीवरं सन्धाय वुत्तं। **ठपेती**ति एकं अन्तं चीवरे बन्धनवसेन ठपेति। **पच्चागतं सिब्बती**ति तस्सेव दुतियअन्तं परिवत्तित्वा आहतं सिब्बति। **आगन्तुकपट्टं बन्धती**ति चीवरेन लग्गं करोन्तो पुनप्पुनं तत्थ तत्थ सुत्तेन बन्धति। **घट्टेती**ति पमाणेन गहेत्वा दण्डादीहि घट्टेति। **सुत्तं करोती**ति गुणादिभावेन वट्टेति। **वलेती**ति अनेकगुणसुत्तं हत्थेन वा चक्कदण्डेन वा वट्टेति एकत्तं करोति। **परिवत्तनं करोती**ति परिवत्तनदण्डयन्तकं करोति, यस्मिं सुत्तगुळं पवेसेत्वा वेळुनाळिकादीसु ठपेत्वा परिब्भमापेत्वा सुत्तकोटितो पट्ठाय आकड्ढन्ति।

२२०. **अनिमन्तितचतुत्थ**न्ति अनिमन्तितो चतुत्थो यस्स भिक्खुचतुक्कस्स, तं अनिमन्तितचतुत्थं। एवं सेसेसुपि। तेनाह ''**पञ्चन्नं चतुक्कान**''न्ति। **सम्पवेसेत्वा**ति तेहि योजेत्वा। **गणो भिज्जती**ति निमन्तितसङ्खो न होतीति अत्थो।

अधिवासेत्वा गतेसूति एत्थ अकप्पियनिमन्तनाधिवासनक्खणे पुब्बपयोगे दुक्कटम्पि नत्थि, विञ्ञत्तितो पसवने पन विञ्ञत्तिक्खणे इतरसिक्खापदेहि दुक्कटं होतीति गहेतब्बं। **निमन्तनं सादियथा**ति निमन्तनभत्तं पटिग्गण्हथ। **तानि चा**ति कुम्मासादीनि च तेहि भिक्खूहि एकेन पच्छा गहितत्ता एकतो न गहितानि।

''**भत्तुद्देसकेन पण्डितेन भवितब्बं...पे०... मोचेतब्बा**''ति एतेन भत्तुद्देसकेन अकप्पियनिमन्तने सादिते सब्बेसम्पि सादितं होति। एकतो गण्हन्तानं गणभोजनापत्ति च होतीति दस्सेति। दूतस्स द्वारे आगन्त्वा पुन ''भत्तं गण्हथा''ति वचनभयेन ''**गामद्वारे अट्ठत्वा**''ति वुत्तं। गणभोजनता, समयाभावो, अज्झोहरणन्ति इमानेत्थ तीणि अङ्गानि।

गणभोजनसिक्खापदवण्णना निट्ठिता।

३. परम्परभोजनसिक्खापदवण्णना

२२१. ततिये पाळियं **भत्तपटिपाटि अट्ठिता**ति कुलपटिपाटिया दातब्बा भत्तपटिपाटि अट्ठिता न ठिता, अब्बोच्छिन्ना निरन्तरप्पवत्ताति अत्थो। बदरफलानि पक्खिपित्वा पक्कयागुआदिकं ''**बदरसाळव**''न्ति वुच्चति।

पाळियं **परम्परभोजने**ति येन पठमं निमन्तितो, तस्स भोजनतो परस्स भोजनस्स भुञ्जने। विकप्पनाव इध अनुपञ्ञत्तिवसेन मातिकायं अनारोपितापि **परिवारे** ''चतस्सो अनुपञ्ञत्तियो''ति (परि० ८६) अनुपञ्ञत्तियं गणिता। तत्थ किञ्चापि अट्ठकथायं महापच्चरिवादस्स पच्छा कथनेन परम्मुखाविकप्पना पतिट्ठपिता, तथापि सम्मुखाविकप्पनापि गहेतब्बाव। तेनेव **मातिकाट्ठकथाय**म्पि ''यो भिक्खु पञ्चसु सहधम्मिकेसु अञ्ञतरस्स 'मय्हं भत्तपच्चासं तुय्हं दम्मी'ति वा 'विकप्पेमी'ति वा एवं सम्मुखा''तिआदि (कङ्खा० अट्ठ० परम्परभोजनसिक्खापदवण्णना) वुत्तं।

२२९. **खीरं वा रसं वा**ति पञ्चभोजनामिसं भत्ततो उपरि ठितं सन्धाय वुत्तं। तञ्हि अभोजनत्ता उप्पटिपाटिया पिवतोपि अनापत्ति। तेनाह ''**भुञ्जन्तेना**''तिआदि।

विकप्पनाय अकरणतो अकिरियावसेन इदं वाचायपि समुट्ठितन्ति आह ''**वचीकम्म**''न्ति। परम्परभोजनता, समयाभावो, अज्झोहरणन्ति इमानेत्थ तीणि अङ्गानि।

परम्परभोजनसिक्खापदवण्णना निट्ठिता।

४. काणमातासिक्खापदवण्णना

२३१. चतुत्थे पाळियं **पटियालोक**न्ति पच्छिमदिसं, पच्छादिसन्ति अत्थो। अपाथेय्यादिअत्थाय पटियादितन्तिसञ्ञाय गण्हन्तस्सापि आपत्ति एव अचित्तकत्ता सिक्खापदस्स। अत्तनो अत्थाय ''इमस्स हत्थे देही''ति वचनेनापि आपज्जनतो ''**वचीकम्म**''न्ति वुत्तं। वुत्तलक्खणपूवमन्थता, असेसकता, अप्पटिप्पस्सद्धगमनता, अञ्ञातकादिता, अतिरेकपटिग्गहणन्ति इमानेत्थ पञ्च अङ्गानि।

काणमातासिक्खापदवण्णना निट्ठिता।

५. पठमपवारणासिक्खापदवण्णना

२३७. पञ्चमे ''**ति-कारं अवत्वा**''ति इमिना कातब्बसद्दसामत्थिया लद्धं इति-पदं कतकाले न वत्तब्बन्ति दस्सेति। इध पन अजानन्तेहि **इति**-सद्दे पयुत्तेपि अतिरित्तं कतमेव होतीति दट्ठब्बं।

२३८-९. ''पवारितो''ति इदञ्च कत्तुअत्थे निप्फन्नन्ति दस्सेतुं ''**कतपवारणो**''तिआदि वुत्तं। भुत्तावी-पदस्स निरत्थकभावमेव साधेतुं ''**वुत्तम्पि चेत**''न्तिआदि वुत्तं। **ताही**ति पुथुकाहि। **सत्तुमोदको**ति सत्तुं तेमेत्वा कतो अपक्को। सत्तुं पन पिसित्वा पिट्ठं कत्वा तेमेत्वा पूवं कत्वा पचन्ति, तं न पवारेति। ''**पटिक्खिपितब्बट्ठाने ठितमेव पटिक्खिपति नामा**''ति वुत्तत्ता यं यं अलज्जिसन्तकं वा अत्तनो अपापुणकसङ्घिकादिं वा पटिक्खेपतो पवारणा न होतीति दट्ठब्बं।

आसन्नतरं अङ्गन्ति हत्थपासतो बहि ठत्वा ओनमित्वा देन्तस्स सीसं आसन्नतरं होति, तस्स ओरिमन्तेन परिच्छिन्दितब्बं।

अपनामेत्वाति अभिमुखं हरित्वा। ''**इमं भत्तं गण्हा**''**ति वदती**ति किञ्चि अनामेत्वा वदति। केवलं वाचाभिहारस्स अनधिप्पेतत्ता गण्हथाति गहेतुं आरद्धं कटच्छुना अनुक्खित्तम्पि पुब्बेपि एवं अभिहटत्ता पवारणा होतीति ''**अभिहटाव होती**''ति वुत्तं। **उद्धटमत्ते**ति भाजनतो वियोजितमत्ते। **द्विन्नं समभारेपी**ति परिवेसकस्स च अञ्ञस्स च भत्तपच्छिभाजनवहने समकेपीति अत्थो।

रसं गण्हथाति एत्थ केवलं मंसरसस्स अपवारणाजनकस्स नामेन वुत्तत्ता पटिक्खिपतो पवारणा न होति। **मच्छरस**न्तिआदीसु मच्छो च रसञ्चाति अत्थस्स सम्भवतो वत्थुनोपि तादिसत्ता पवारणा होति, ''इदं गण्हथा''तिपि अवत्वा तुण्हीभावेन अभिहटं पटिक्खिपतोपि होति एव। **करम्बको**ति मिस्सकाधिवचनमेतं। यञ्हि बहूहि मिस्सेत्वा करोन्ति, सो ''करम्बको''ति वुच्चति।

पदेसन्ति सङ्घस्स निसीदनप्पहोनकप्पदेसं। **''सीमन्तरिकं ठपेत्वा''**तिआदिना सम्भेदज्झोत्थरणं अकत्वा बद्धसीमाहि अञ्ञमञ्ञं फुसापेत्वा अब्यवधानेन बद्धापि सीमा असीमा एवाति दस्सेति। तस्मा एकद्वङ्गुलमत्तापि सीमन्तरिका वट्टति एव। सा पन दुब्बोधाति अट्ठकथासु चतुरङ्गुलादिका वुत्ताति दट्ठब्बं। **द्विन्नं सीमान**न्ति द्विन्नं बद्धसीमानं। **निमित्तं होती**ति निमित्तस्स सीमतो बाहिरत्ता बन्धनकाले ताव सम्भेददोसो नत्थीति अधिप्पायो। न केवलञ्च निमित्तकत्ता एव सङ्करं करोति, अथ खो सीमन्तरिकाय ठितो अञ्ञोपि रुक्खो करोति एव। तस्मा अप्पमत्तिकाय सीमन्तरिकाय वड्ढनका रुक्खादयो न वट्टन्ति एव। एत्थ च उपरि दिस्समानखन्धसाखादिपवेसे एव सङ्करदोसस्स सब्बत्थ दस्सितत्ता अदिस्समानानं मूलानं पवेसेपि भूमिगतिकत्ता दोसो नत्थीति सिज्झति। सचे पन मूलानिपि दिस्समानानेव पविसन्ति, सङ्करोव। पब्बतपासाणा पन दिस्समानापि भूमिगतिका एव। यदि पन बन्धनकाले एव एको थूलरुक्खो उभयम्पि सीमं आहच्च तिट्ठति, पच्छा बद्धा असीमा होतीति दट्ठब्बं।

सीमासङ्करन्ति सीमासम्भेदं। यं पन **सारत्थदीपनियं** वुत्तं ''सीमासङ्करं करोतीति वड्ढित्वा सीमप्पदेसं पविट्ठे द्विन्नं सीमानं गतट्ठानस्स दुविञ्ञेय्यत्ता वुत्त''न्ति (सारत्थ॰ टी॰ महावग्ग ३.१४८), तं न युत्तं गामसीमायपि सह सङ्करं करोतीति वत्तब्बतो। तत्थापि हि निमित्ते वड्ढिते गामसीमाबद्धसीमानं गतट्ठानं दुब्बिञ्ञेय्यमेव होति, तत्थ पन अवत्वा द्विन्नं बद्धसीमानमेव सङ्करस्स वुत्तत्ता यथावुत्तसम्बद्धदोसोव सङ्कर-सद्देन वुत्तोति गहेतब्बं। पाळियं पन निदानवसेन ''येसं, भिक्खवे, सीमा पच्छा सम्मता, तेसं तं कम्मं अधम्मिक''न्तिआदिना (महाव॰ १४८) पच्छा सम्मताय असीमत्ते वुत्तेपि द्वीसु गामसीमासु ठत्वा द्वीहि सङ्घेहि सम्भेदं वा अज्झोत्थरणं वा कत्वा सीमन्तरिकं अट्ठपेत्वा वा रुक्खपारोहादिसम्बन्धं अवियोजेत्वा वा एकस्मिं खणे कम्मवाचानिट्ठापनवसेन एकतो सम्मतानं द्विन्नं सीमानम्पि असीमता पकासिताति वेदितब्बं।

गामसीमादिकथावण्णना निट्ठिता।

उपोसथभेदादिकथावण्णना

१४९. **अधम्मेन वग्ग**न्ति एत्थ एकसीमाय चतूसु भिक्खूसु विज्जमानेसु पातिमोक्खुद्देसोव अनुञ्ञातो, तीसु, द्वीसु च पारिसुद्धिउपोसथोव। इध पन तथा अकतत्ता ''अधम्मेना''ति वुत्तं। यस्मा पन छन्दपारिसुद्धि सङ्घे एव आगच्छति, न गणे, न पुग्गले, तस्मा ''वग्ग''न्ति वुत्तन्ति।

सचे पन द्वे सङ्घा एकसीमाय अञ्ञमञ्ञं छन्दं आहरित्वा एकस्मिं खणे विसुं सङ्घकम्मं करोन्ति, एत्थ कथन्ति? केचि पनेतं वट्टतीति वदन्ति, तं न गहेतब्बं वग्गकम्मत्ता। कम्मं करोन्तानञ्हि छन्दपारिसुद्धि अञ्ञत्थ न गच्छति तथा वचनाभावा, विसुं विसुं कम्मकरणत्थमेव सीमाय अनुञ्ञातत्ता चाति गहेतब्बं। विहारसीमायं पन सङ्घे विज्जमानेपि केनचि पच्चयेन खन्धसीमायं तीसु, द्वीसु वा पारिसुद्धिउपोसथं करोन्तेसु कम्मं धम्मेन समग्गमेव भिन्नसीमट्ठत्ताति दट्ठब्बं।

उपोसथभेदादिकथावण्णना निट्ठिता।

पातिमोक्खुद्देसकथावण्णना

१५०. **एवमेतं धारयामीति**। **सुता खो पनायस्मन्तेही**ति एत्थ ''एवमेतं धारयामी''ति वत्वा ''उद्दिट्ठं खो आयस्मन्तो निदानं, सुता खो पनायस्मन्तेहि चत्तारो पाराजिका धम्मा''तिआदिना वत्तब्बं। **मातिकाट्ठकथाय**म्पि (कङ्खा॰ अट्ठ॰ निदानवण्णना) एवमेव वुत्तं। **सुतेना**ति सुतपदेन।

सवरभयन्ति वनचरकभयं। तेनाह **''अटविमनुस्सभय''**न्ति। निदानुद्देसे अनिट्ठिते पातिमोक्खं निद्दिट्ठं नाम न होतीति आह **''दुतियादीसु उद्देसेसु''**तिआदि। **तीहिपि विधीही**ति ओसारणकथनसरभञ्ञेहि। एत्थ च अत्थं भणितुकामताय वा भणापेतुकामताय वा सुत्तस्स ओसारणं **ओसारणं** नाम। तस्सेव अत्थप्पकासना **कथनं** नाम। केवलं पाठस्सेव सरेन भणनं **सरभञ्ञं** नाम। **सज्झायं अधिट्ठहित्वा**ति ''सज्झायं करोमी''ति चित्तं उप्पादेत्वा। **ओसारेत्वा पन कथेन्तेना**ति सयमेव पाठं वत्वा पच्छा अत्थं कथेन्तेन।

पातिमोक्खुद्देसकथावण्णना निट्ठिता।

अधम्मकम्मपटिक्कोसनादिकथावण्णना

१५५. **नवविध**न्ति सङ्घगणपुग्गलेसु तयो, सुत्तुद्देसपारिसुद्धिअधिट्ठानवसेन तयो, चातुद्दसीपन्नरसीसामग्गीवसेन तयोति नवविधं। **चतुब्बिध**न्ति अधम्मेनवग्गादि चतुब्बिधं। **दुविध**न्ति भिक्खुभिक्खुनिपातिमोक्खवसेन दुविधं पातिमोक्खं। **नवविध**न्ति भिक्खूनं पञ्च, भिक्खुनीनं चत्तारोति नवविधं पातिमोक्खुद्देसं।

अधम्मकम्मपटिक्कोसनादिकथावण्णना निट्ठिता।

पक्खगणनादिउग्गहणानुजाननकथादिवण्णना

१५६. **कतिमी**ति तिथि-सद्दापेक्खं इत्थिलिङ्गं दट्ठब्बं।

१६३. **उतुवस्सेयेवा**ति हेमन्तगिम्हेसुयेव।

१६४. **विञ्ञापेती**ति एत्थ मनसा चिन्तेत्वा कायविकारकरणमेव विञ्ञापनन्ति दट्ठब्बं। पाळियं **अञ्ञस्स दातब्बा पारिसुद्धी**ति पारिसुद्धिदायकेन पुन अञ्ञस्स भिक्खुनो सन्तिके दातब्बा। **''भूतंयेव वा सामणेरभावं आरोचेती''**ति वुत्तत्ता ऊनवीसतिवस्सकाले उपसम्पन्नस्स, अन्तिमवत्थुअज्झापन्नसिक्खापच्चक्खातादीनं वा याव भिक्खुपटिञ्ञा वत्तति, ताव तेहि आहटापि छन्दपारिसुद्धि आगच्छति। यदा पन ते अत्तनो सामणेरादिभावं पटिजानन्ति, ततो पट्ठायेव नागच्छतीति दस्सितन्ति दट्ठब्बं। पाळियम्पि हि ''दिन्नाय पारिसुद्धिया सङ्घप्पत्तो विब्भमति...पे॰... पण्डको पटिजानाति। तिरच्छानगतो पटिजानाति। उभतोब्यञ्जनको पटिजानाति, आहटा होति पारिसुद्धी''ति वुत्तत्ता पण्डकादीनम्पि भिक्खुपटिञ्ञाय वत्तमानकालेसु छन्दपारिसुद्धिया आगमनं सिद्धमेव। तेनाह **''एस नयो सब्बत्था''**ति। उम्मत्तकखित्तचित्तवेदनाट्टानं पन पकतत्ता अन्तरामग्गे उम्मत्तकादिभावे पटिञ्ञातेपि तेसं सङ्घप्पत्तमत्तेनेव छन्दादि आगच्छतीति दट्ठब्बं।

''भिक्खूनं हत्थपास''न्ति इमिना गणपुग्गलेसु छन्दपारिसुद्धिया अनागमनं दस्सेति। ''सङ्घप्पत्तो''ति हि पाळियं वुत्तं। **बिळालसङ्खलिकपारिसुद्धी**ति बिळालगीवाय बन्धनसङ्खलिकसदिसा पारिसुद्धि नाम, यथा सङ्खलिका बिळाले आगच्छन्ते एव आगच्छति, न अनागच्छन्ते तप्पटिबद्धत्ता, एवमयं पारिसुद्धिपीति अत्थो। अथ वा यथा सङ्खलिकाय पठमवलयं दुतियवलयं पापुणाति, न ततियवलयं, एवमयम्पीति अधिप्पायो। उपलक्खणमत्तञ्चेत्थ बिळाल-ग्गहणं दट्ठब्बं।

पक्खगणनादिउग्गहणानुजाननकथादिवण्णना निट्ठिता।

छन्ददानकथादिवण्णना

१६५. पाळियं ''सन्ति सङ्घस्स करणीयानी''ति वत्तब्बे वचनविपल्लासेन **''करणीय''**न्ति वुत्तं।

१६७. **''तस्स सम्मुतिदानकिच्चं नत्थी''**ति इदं पाळियं एकदा सरन्तस्सेव सम्मुतिदानस्स वुत्तत्ता एकदा असरन्तस्स सम्मुतिअभावेपि तस्स अनागमनं वग्गकम्माय न होतीति वुत्तं। केचि पन ''सोपि हत्थपासेव आनेतब्बो''ति वदन्ति, तं न गहेतब्बं।

१६८. सङ्घसन्निपाततो पठमं कातब्बं **पुब्बकरणं**। सङ्घसन्निपाते कातब्बं **पुब्बकिच्च**न्ति दट्ठब्बं। पाळियं **नो चे अधिट्ठहेय्य, आपत्ति दुक्कटस्सा**ति एत्थ असञ्चिच्च असतिया अनापत्ति। यथा चेत्थ, एवं उपरिपि। यत्थ पन अचित्तकापत्ति अत्थि, तत्थ वक्खाम।

१६९. **''पञ्ञत्तं होती''**ति इमिना ''न सापत्तिकेन उपोसथो कातब्बो''ति विसुं पटिक्खेपाभावेपि यथावुत्तसुत्तसामत्थियतो पञ्ञत्तमेवाति दस्सेति। इमिना एव नयेन –

''अट्ठानमेतं, भिक्खवे, अनवकासो यं तथागतो अपरिसुद्धाय परिसाय उपोसथं करेय्य, पातिमोक्खं उद्दिसेय्या''ति (चूळव० ३८६; अ० नि० ८.२०; उदा० ४५) –

आदिसुत्तनयतो च अलज्जीहिपि सद्धिं उपोसथकरणम्पि पटिक्खित्तमेव अलज्जिनिग्गहत्थत्ता सब्बसिक्खापदानन्ति दट्ठब्बं। **''पारिसुद्धिदानपञ्ञापनेना''**ति इमिना सापत्तिकेन पारिसुद्धिपि न दातब्बाति दीपितं होति। **उभोपि दुक्कट**न्ति एत्थ सभागापत्तिभावं अजानित्वा केवलं आपत्तिनामेनेव देसेन्तस्स पटिग्गण्हन्तस्स अचित्तकमेव दुक्कटं होतीति वदन्ति। यथा सङ्घो सभागापत्तिं आपन्नो ञत्तिं ठपेत्वा उपोसथं कातुं लभति, एवं तयोपि ''सुणन्तु मे, आयस्मन्ता, इमे भिक्खू सभागं आपत्तिं आपन्ना''तिआदिना वुत्तनयानुसारेनेव गणञत्तिं ठपेत्वा द्वीहि अञ्ञमञ्ञं आरोचेत्वा उपोसथं कातुं वट्टति। एकेन पन सापत्तिकेन दूरं गन्त्वापि पटिकातुमेव वट्टति, असम्पापुणन्तेन ''भिक्खुं लभित्वा पटिकरिस्सामी''ति उपोसथो कातब्बो, पटिकरित्वा च पुन उपोसथो कत्तब्बो।

छन्ददानकथादिवण्णना निट्ठिता।

अनापत्तिपन्नरसकादिकथावण्णना

१७२. **केनचि** ६३ **करणीयेन गन्त्वा**ति सीमापरिच्छेदतो बहिभूतं गामं वा अरञ्ञं वा गन्त्वाति अत्थो। एतेनेव उपोसथञत्तिया ठपनकाले समग्गा एव ते ञत्तिं ठपेसुन्ति सिद्धं। तेनेव पाळियं ''उद्दिट्ठं सुउद्दिट्ठ''न्ति सब्बपन्नरसकेसुपि वुत्तं। **वग्गा समग्गसञ्ञिनो**तिआदि पन ञत्तिया निट्ठिताय ''किं सङ्घस्स पुब्बकिच्च''न्तिआदीनं (महाव० १३४) वचनक्खणे बहिगतानं भिक्खूनं सीमाय पविट्ठत्ता भिक्खू तस्मिं खणे वग्गा होन्तीति वुत्तं। तेनाह **''तेसं सीमं ओक्कन्तत्ता वग्गा''**तिआदि, एतेन पाराजिकुद्देसादिक्खणेपि वग्गसञ्ञीनं उद्दिसन्तानं आपत्ति एव, ञत्तिया पन पुब्बे निट्ठितत्ता कम्मकोपो नत्थीति दस्सितमेव होति। एवं उपरिपि सब्बवारेसु अधिप्पायो वेदितब्बो।

एत्थ च पाळियं ''सब्बाय वुट्ठिताय...पे०... तेसं सन्तिके पारिसुद्धि आरोचेतब्बा''ति (महाव० १७४) वुत्तत्ता बहिसीमागताय परिसाय तेसु यस्स कस्सचि सन्तिके अनधिट्ठितेहि पारिसुद्धिं आरोचेतुं वट्टतीति वदन्ति।

अनापत्तिपन्नरसकादिकथावण्णना निट्ठिता।

लिङ्गादिदस्सनकथादिवण्णना

१७९. अञ्ञातकं नाम अदिट्ठपुब्बन्ति आह **''अञ्ञेसं सन्तक''**न्ति। **अञ्ञेस**न्ति अत्तना अदिट्ठपुब्बानं। **नानासंवासकभाव**न्ति लद्धिनानासंवासकभावं।

१८०. पाळियं **अभिवितरन्ति** समानसंवासकाभावं निच्छिनन्ति।

१८१. **उपोसथकारका**ति सङ्घुपोसथकारका। तेनेव **''अञ्ञत्र सङ्घेना''**ति वुत्तं। सङ्घुपोसथट्ठानतो हि गच्छन्तेन अत्तचतुत्थेनेव गन्तब्बं, तिण्णं भिक्खूनं निसिन्नट्ठानतो पन गच्छन्तेन एकेन भिक्खुनापि सह गन्तुम्पि वट्टति। पाळियं **''अभिक्खुको आवासो''**ति इदं निदस्सनमत्तं, सङ्घुपोसथट्ठानतो गणपुग्गलेहि सभिक्खुकोपि आवासो न गन्तब्बो ''अञ्ञत्र सङ्घेना''ति वुत्तत्ताति वदन्ति। **उपोसथं करोन्ती**ति सङ्घुपोसथं वा गणुपोसथं वा। **''तस्स सन्तिक''**न्ति इदं गणुपोसथट्ठानतो गच्छन्तं सन्धाय वुत्तं, अञ्ञथा ''सब्बन्तिमेन परिच्छेदेन अत्तचतुत्थेन वा''ति वचनेन विरुज्झनतो। **आरञ्ञकेना**ति एकचारिना। **उपोसथन्तरायो**ति अत्तनो उपोसथन्तरायो।

१८३. पाळियं **भिक्खुनिया निसिन्नपरिसाया**तिआदीसु **भिक्खुनिया**तिआदि करणत्थे सामिवचनं।

लिङ्गादिदस्सनकथादिवण्णना निट्ठिता।

उपोसथक्खन्धकवण्णनानयो निट्ठितो।

३. वस्सूपनायिकक्खन्धको

वस्सूपनायिकअनुजाननकथादिवण्णना

१८४. वस्सूपनायिकक्खन्धके **अपरस्मिं दिवसे**ति दुतिये पाटिपददिवसे।

१८५. **अञ्ञत्थ अरुणं उट्ठापनेन वा**ति सापेक्खस्स अकरणीयेन गन्त्वा अञ्ञत्थ अरुणं उट्ठापनेन वा। **परिहानी**ति गुणपरिहानि।

१८७. पाळियं **सत्ताहं सन्निवत्तो कातब्बो**ति सकलं सत्ताहं बहि एव अवीतिनामेत्वा सत्ताहपरियोसानभूतं अरुणुट्ठानकालं पुन विहारेव सम्बन्धवसेन सत्ताहं विहारे सन्निवत्तं कातब्बं। सत्ताहपरियोसानकालो हि इध सत्ताह-सद्देन वुत्तो, तदपेक्खाय च ''सन्निवत्तो''ति पुल्लिङ्गेन वुत्तं। **तीणि परिहीनानी**ति भिक्खुनीनं वच्चकुटिआदीनं पटिक्खित्तत्ता परिहीनानि।

१८९. **न पलुज्जती**ति अञ्ञेसं अप्पगुणत्ता, मम च मरणेन न विनस्सति।

वस्सूपनायिकअनुजाननकथादिवण्णना निट्ठिता।

पहितेयेवअनुजाननकथावण्णना

१९९. **भिक्खूहि सद्धिं वसनकपुरिसो**ति अनञ्ञगतिकोति दस्सेति। **गन्तब्ब**न्ति सङ्घकरणीयेन अप्पहितेपि गन्तब्बं। एत्थ च अनुपासकेहिपि सासनभावं ञातुकामेहि पहिते तेसं पसादवड्ढिं सम्पस्सन्तेहिपि सत्ताहकरणीयेन गन्तुं वट्टतीति गहेतब्बं।

रत्तिच्छेदविनिच्छयोति सत्ताहकरणीयेन गन्त्वा बहिद्धा अरुणुट्ठापनसङ्खातस्स रत्तिच्छेदस्स विनिच्छयो। **गन्तुं वट्टती**ति अन्तोउपचारसीमायं ठितेनेव सत्ताहकरणीयनिमित्तं सल्लक्खेत्वा इमिना निमित्तेन गन्त्वा ''अन्तोसत्ताहे आगच्छिस्सामी''ति आभोगं कत्वा गन्तुं वट्टति। पुरिमक्खणे आभोगं कत्वा गमनक्खणे विस्सरित्वा गतेपि दोसो नत्थि ''सकरणीयो पक्कमती''ति (महाव० २०७) वुत्तत्ता। सब्बथा पन आभोगं अकत्वा गतस्स वस्सच्छेदोति वदन्ति। यो पन सत्ताहकरणीयनिमित्ताभावेपि ''सत्ताहब्भन्तरे आगमिस्सामी''ति आभोगं कत्वा गन्त्वा सत्ताहब्भन्तरे आगच्छति, तस्स आपत्तियेव, वस्सच्छेदो नत्थि सत्ताहस्स सन्निवत्तत्ताति वदन्ति। वीमंसित्वा गहेतब्बं। **भण्डक**न्ति चीवरभण्डं। **सम्पापुणितुं न सक्कोति, वट्टती**ति तदहेव आगमने सउस्साहत्ता वस्सच्छेदो वा आपत्ति वा न होतीति अधिप्पायो। **आचरिय**न्ति अगिलानम्पि निस्सयाचरियञ्च धम्माचरियञ्च, पगेव उपसम्पदाचरियउपज्झायेसु। **वदति, वट्टती**ति सत्ताहातिक्कमे आपत्तिअभावं सन्धाय वुत्तं, वस्सच्छेदो पन होति एव।

पहितेयेवअनुजाननकथावण्णना निट्ठिता।

अन्तरायेअनापत्तिवस्सच्छेदकथावण्णना

२००. पाळियं **गण्हिंसू**ति गहेत्वा खादिंसु। **परिपातिंसू**ति पलापेसुं, अनुबन्धिंसूति अत्थो।

२०१. **सत्ताहवारेन अरुणो उट्ठापेतब्बो**ति एत्थ छदिवसानि बहिद्धा वीतिनामेत्वा सत्तमे दिवसे पुरारुणा एव अन्तोउपचारसीमाय पविसित्वा अरुणं उट्ठापेत्वा पुनदिवसे सत्ताहं अधिट्ठाय गन्तब्बन्ति अधिप्पायो। केचि पन ''सत्तमे दिवसे आगन्त्वा अरुणं अनुट्ठापेत्वा तदहेव दिवसभागेपि गन्तुं वट्टती''ति वदन्ति, तं न गहेतब्बं ''अरुणो उट्ठापेतब्बो''ति वुत्तत्ता। सत्तमे दिवसे तत्थ अरुणुट्ठापनमेव हि सन्धाय पाळियम्पि ''सत्ताहं सन्निवत्तो कातब्बो''ति वुत्तं। अरुणं अनुट्ठापेत्वा गच्छन्तो अन्तो अप्पविसित्वा बहिद्धाव सत्ताहं वीतिनामेन्तेन समुच्छिन्नवस्सो एव भविस्सति अरुणस्स बहि एव उट्ठापितत्ता। इतरथा ''अरुणो उट्ठापेतब्बो''ति वचनं निरत्थकं सिया ''सत्ताहवारेन अन्तोविहारे पविसित्वा अरुणं अनुट्ठापेत्वापि गन्तब्ब''न्ति वत्तब्बतो। अञ्ञेसु च ठानेसु अरुणुट्ठापनमेव वुच्चति। वक्खति हि **चीवरक्खन्धके** ''एकस्मिं विहारे वसन्तो इतरस्मिं सत्ताहवारेन अरुणमेव उट्ठापेती''ति (महाव० अट्ठ० ३६४)।

अथापि यं ते वदेय्युं ''सत्तमे दिवसे यदा कदाचि पविट्ठेन तंदिवसनिस्सितो अतीतअरुणो उट्ठापितो नाम होतीति इममत्थं सन्धाय **अट्ठकथायं** वुत्त''न्ति, तं सद्दगतियापि न समेति। न हि उट्ठिते अरुणे पच्छा पविट्ठो तस्स पयोजको उट्ठापको भवितुमरहति। यदि भवेय्य, वस्सं उपगन्त्वा पनस्स अरुणं अनुट्ठापेत्वा तदहेव सत्ताहकरणीयेन पक्कन्तस्सापीति एत्थ ''अरुणं अनुट्ठापेत्वा''ति वचनं विरुज्झेय्य, तेनपि तंदिवससन्निस्सितस्स अरुणस्स उट्ठापितत्ता। आरञ्ञकस्सापि हि भिक्खुनो सायन्हसमये अङ्गयुत्तं अरञ्ञट्ठानं गन्त्वा तदा एव निवत्तन्तस्स अरुणो उट्ठापितो धुतङ्गञ्च विसोधितं सिया, न चेतं युत्तं अरुणुग्गमनकाले एव अरुणुट्ठापनस्स वुत्तत्ता। वुत्तञ्हि ''कालस्सेव पन निक्खमित्वा अङ्गयुत्ते ठाने अरुणं उट्ठापेतब्बं। सचे अरुणुट्ठानवेलायं तेसं आबाधो वड्ढति, तेसं एव किच्चं कातब्बं, न धुतङ्गविसुद्धिकेन भवितब्ब''न्ति (विसुद्धि० १.३१)। तथा पारिवासिकादीनम्पि अरुणं अनुट्ठापेत्वा वत्तं निक्खिपन्तानं रत्तिच्छेदो वुत्तो। ''उग्गते अरुणे निक्खिपितब्ब''न्ति (चूळव० ९७) हि वुत्तं। सहसेय्यसिक्खापदेपि अनुपसम्पन्नेहि सह निवुत्थभावपरिमोचनत्थं ''पुरारुणा निक्खमित्वा''तिआदि वुत्तं। एवं चीवरविप्पवासादीसु च सब्बत्थ रत्तिपरियोसाने आगामिअरुणवसेनेव अरुणुट्ठापनं दस्सितं, न अतीतारुणवसेन। तस्मा वुत्तनयेनेवेत्थ अरुणुट्ठापनं वेदितब्बं अञ्ञथा वस्सच्छेदत्ता।

यं पन वस्सं उपगतस्स तदहेव अरुणं अनुट्ठापेत्वा सकरणीयस्स पक्कमनवचनं, तं वस्सं उपगतकालतो पट्ठाय यदा कदाचि निमित्ते सति गमनस्स अनुञ्ञातत्ता युत्तं, न पन सत्ताहवारेन गतस्स अरुणं अनुट्ठापेत्वा तदहेव गमनं ''अरुणो उट्ठापेतब्बो''ति वुत्तत्ता एव। यथा वा ''सत्ताहं अनागताय पवारणाय सकरणीयो पक्कमति, आगच्छेय्य वा सो, भिक्खवे, भिक्खु तं आवासं, न वा आगच्छेय्या''तिआदिना (महाव० २०७) पच्छिमसत्ताहे अनागमने अनुञ्ञातेपि अञ्ञसत्ताहेसु न वट्टति। एवं पठमसत्ताहे अरुणं अनुट्ठापेत्वा गमने अनुञ्ञातेपि ततो परेसु सत्ताहेसु आगतस्स अरुणं अनुट्ठापेत्वा गमनं न वट्टतीति निट्ठमेत्थ गन्तब्बं। **इध आहट**न्ति विहारतो बहि आगतट्ठाने आनीतं।

अन्तरायेअनापत्तिवस्सच्छेदकथावण्णना निट्ठिता।

वजादीसु वस्सूपगमनकथावण्णना

२०३. **उपगन्तुं** ६८ **न वट्टती**ति कुटिकादीनं अभावेन ''इध वस्सं उपेमी''ति एवं वचीभेदं कत्वा उपगन्तुं न वट्टति।

२०४. पाळियं **पिसाचिल्लिका**ति पिसाचदारका। **पविसनद्वारं योजेत्वा**ति सकवाटद्वारं कत्वा। **रुक्खं छिन्दित्वा**ति सुसिरट्ठानस्स उपरिभागं छिन्दित्वा। **खाणुमत्थके**ति सुसिरखाणुमत्थके। **टङ्कितमञ्चो** नाम दीघे मञ्चपादे विज्झित्वा अटनियो पवेसेत्वा कतो, सो हेट्ठुपरियवसेन पञ्ञत्तोपि पुरिमसदिसोव होति, तं सुसाने, देवताठाने च ठपेन्ति। चतुन्नं पासाणानं उपरि पासाणफलके अत्थरित्वा कतगेहम्पि ''टङ्कितमञ्चो''ति वुच्चति।

वजादीसुवस्सूपगमनकथावण्णना निट्ठिता।

अधम्मिककतिकादिकथावण्णना

२०५. **महाविभङ्गे**ति चतुत्थपाराजिकवण्णनायं। परतो सेनासनक्खन्धकेपि अधम्मिकं कतिकवत्तं आवि भविस्सति एव।

२०७. यस्मा नानासीमायं द्वीसु आवासेसु वस्सं उपगच्छन्तस्स ''दुतिये वसिस्सामी''ति उपचारतो निक्खन्तमत्ते पठमो सेनासनग्गाहो पटिप्पस्सम्भति। तस्मा पाळियं ''तस्स, भिक्खवे, भिक्खुनो पुरिमिका च न पञ्ञायती''ति पठमं सेनासनग्गाहं सन्धाय वुत्तं। दुतिये सेनासनग्गाहे पन पुरिमिका पञ्ञायतेव, तत्थेव तेमासं वसन्तो पुरिमवस्संवुत्थो एव होति, ततो वा पन दुतियदिवसादीसु ''पठमसेनासने वसिस्सामी''ति उपचारातिक्कमे पुरिमिकापि न पञ्ञायतीति दट्ठब्बं।

२०८. पाळियं ''सो सत्ताहं अनागताय पवारणाय सकरणीयो पक्कमती''ति वुत्तत्ता पवारणादिवसेपि सत्ताहकरणीयं विना गन्तुं न वट्टतीति वेदितब्बं। **कोमुदिया चातुमासिनिया**ति पच्छिम-कत्तिकपुण्णमाय। सा हि तस्मिं काले कुमुदानं अत्थिताय **कोमुदी,** चतुन्नं वस्सिकमासानं परियोसानत्ता **चातुमासिनी**ति च वुच्चति।

अधम्मिककतिकादिकथावण्णना निट्ठिता।

वस्सूपनायिकक्खन्धकवण्णनानयो निट्ठितो।

४. पवारणाक्खन्धको

अफासुविहारकथादिवण्णना

२०९. पवारणाक्खन्धके पाळियं **पिण्डाय पटिक्कमेय्या**ति पिण्डाय चरित्वा पटिक्कमेय्य। **अवक्कारपाति**न्ति अतिरेकपिण्डपातठपनकं एकं भाजनं। **अविसय्ह**न्ति उक्खिपितुं असक्कुणेय्यं। विलङ्घनं उक्खिपनं विलङ्घो, सो एव विलङ्घको, हत्थेहि विलङ्घको हत्थविलङ्घकोति आह **''हत्थुक्खेपकेना''**ति। अथ वा विलङ्घकेन उक्खेपकेन हत्थेनातिपि अत्थो, अञ्ञमञ्ञं संसिब्बितहत्थेहीति वुत्तं होति।

२१३. **सचे पन वुड्ढतरो होती**ति पवारणादायको भिक्खु वुड्ढतरो होति। **एवञ्हि तेन तस्सत्थाय पवारितं होती**ति एत्थ एवं तेन अप्पवारितोपि तस्स सङ्घप्पत्तिमत्तेन सङ्घपवारणाकम्मं समग्गकम्ममेव होतीति दट्ठब्बं। **तेन च भिक्खुना**ति पवारणादायकेन भिक्खुना।

२३४. **बहूपि समानवस्सा एकतो पवारेतुं लभन्ती**ति एकस्मिं संवच्छरे लद्धूपसम्पदताय समानुपसम्पन्नवस्सा सब्बे एकतो पवारेतुं लभन्तीति अत्थो।

२३७. पाळियं **मिच्छादिट्ठी**ति ''नत्थि दिन्न''न्तिआदि (दी॰ नि॰ १.१७१; म॰ नि॰ १.४४५; २.९४, ९५, २२५; ३.९१, ११६, १३६; सं॰ नि॰ ३.२१०; ध॰ स॰ १२२१) नयप्पवत्ता। **अन्तग्गाहिका**ति सस्सतुच्छेदसङ्खातस्स अन्तस्स गाहिका। **यं खो त्व**न्तिआदीसु यं पवारणं ठपेसि, तं दिट्ठेन ठपेसीति तं-सद्दं अज्झाहरित्वा योजेतब्बं।

२३९. **वत्थुं पकासेन्तो**ति पुग्गले परिसङ्कुप्पत्तिया निमित्तभूतं वत्थुमत्तंयेव सन्धाय वुत्तं। यं पन वत्थुं सन्धाय ''पुग्गलो पञ्ञायति, न वत्थू''ति आह, न तं सन्धायेतं वुत्तं। यदि पन तस्स भिक्खुनो वसनट्ठाने पोक्खरणितो मच्छग्गहणादि दिस्सेय्य, तदा ''वत्थु च पुग्गलो च पञ्ञायती''ति वत्तब्बं भवेय्य। तेनाह **''पुरिमनयेनेव चोरेही''**तिआदि। भिक्खुनो सरीरे मालागन्धञ्च अरिट्ठगन्धञ्च दिस्वा एवं ''वत्थु च पुग्गलो च पञ्ञायती''ति वुत्तन्ति वेदितब्बं।

अफासुविहारकथादिवण्णना निट्ठिता।

भण्डनकारकवत्थुकथावण्णना

२४०. **द्वे चातुद्दसिका होन्ती**ति ततियपक्खे चातुद्दसिया सद्धिं द्वे चातुद्दसिका होन्ति। **''भण्डनकारकानं तेरसे वा चातुद्दसे वा इमे पन्नरसीपवारणं पवारेस्सन्ती''**ति इमिना यथासकं उपोसथकरणदिवसतो पट्ठाय भिक्खूनं चातुद्दसीपन्नरसीवोहारो, न चन्दगतिसिद्धिया तिथिया वसेनाति दस्सेति। किञ्चापि एवं ''अनुजानामि, भिक्खवे, राजूनं अनुवत्तितु''न्ति (महाव॰ १८६) वचनतो पनेत्थ लोकियानं तिथिं अनुवत्तन्तेहिपि अत्तनो उपोसथक्कमेन चातुद्दसिं पन्नरसिं वा, पन्नरसिं चातुद्दसिं वा करोन्तेहेव अनुवत्तितब्बं, न पन सोळसमदिवसं वा तेरसमदिवसं वा उपोसथदिवसं करोन्तेहि। तेनेव पाळियम्पि ''द्वे तयो उपोसथे चातुद्दसिके कातु''न्ति वुत्तं। अञ्ञथा द्वादसियं, तेरसियं वा उपोसथो कातब्बोति वत्तब्बतो। ''सकिं पक्खस्स चातुद्दसे, पन्नरसे वा''तिआदिवचनम्पि उपवुत्थक्कमेनेव वुत्तं, न तिथिक्कमेनाति गहेतब्बं।

भण्डनकारकवत्थुकथावण्णना निट्ठिता।

पवारणासङ्गहकथावण्णना

२४१. **''पवारेत्वा पन अन्तरापि चारिकं पक्कमितुं लभन्ती''**ति इमिना पवारणासङ्गहे कते अन्तरा पक्कमितुकामा सङ्घं सन्निपातापेत्वा पवारेतुं लभन्तीति दस्सेति।

पवारणासङ्गहकथावण्णना निट्ठिता।

पवारणाक्खन्धकवण्णनानयो निट्ठितो।

५. चम्मक्खन्धको

सोणकोळिविसकथादिवण्णना

२४२. चम्मक्खन्धके **उण्णपावारण**न्ति उभतो लोमानि उट्ठापेत्वा कतं उण्णमयं पावारणं, उभतो कप्पासपिचुं उट्ठापेत्वा वीतपावारोपि अत्थि, ततो निवत्तनत्थं ''उण्णपावारण''न्ति वुत्तं।

अड्ढचन्दपासाणेति सोपानमूले उपड्ढं अन्तो पवेसेत्वा ठपिते अड्ढपासाणे। पाळियं **विहारपच्छायाय**न्ति विहारपच्चन्ते छायाय, विहारस्स वड्ढमानच्छायायन्तिपि वदन्ति।

२४३. **भोगा**ति उपयोगत्थे पच्चत्तवचनं। **अच्चायता**ति अतिआयता खरमुच्छना। **सरवती**ति मधुरसरसंयुत्ता। **अतिसिथिला** मन्दमुच्छना। **वीरियसमथ**न्ति वीरियसम्पयुत्तसमथं। **तत्थ च निमित्तं गण्हाही**ति तस्मिञ्च समभावे सति यं आदासे मुखनिमित्तं विय निमित्तं उप्पज्जति, तं समथनिमित्तं, विपस्सनानिमित्तं, मग्गनिमित्तं, फलनिमित्तञ्च गण्हाहि निब्बत्तेहीति, एवमस्स अरहत्तपरियोसानं कम्मट्ठानं कथितं।

२४४. **छठानानी**ति छ कारणानि। **अधिमुत्तो**ति पटिविज्झित्वा ठितो। **नेक्खम्माधिमुत्तो**तिआदि सब्बं अरहत्तवसेन वुत्तं। अरहत्तञ्हि सब्बकिलेसेहि निक्खन्तत्ता **नेक्खम्मं,** तेहेव च पविवित्तत्ता **पविवेको,** ब्यापज्जाभावतो **अब्यापज्जं,** उपादानस्स खयन्ते उप्पन्नत्ता **उपादानक्खयो,** तण्हक्खयन्ते उप्पन्नत्ता **तण्हक्खयो,** सम्मोहाभावतो **असम्मोहो**ति च वुच्चति।

केवलं सद्धामत्तकन्ति केवलं पटिवेधपञ्ञाय असम्मिस्सं सद्धामत्तकं। **पटिचय**न्ति पुनप्पुनं करणेन वड्ढिं। **वीतरागत्ता**ति मग्गपटिवेधेन रागस्स विगतत्ता एव नेक्खम्मसङ्खातं अरहत्तं पटिविज्झित्वा सच्छिकत्वा ठितो होति। सेसपदेसुपि एसेव नयो। **पविवेकाधिमुत्तो**ति ''पविवेके अधिमुत्तो अह''न्ति एवं अरहत्तं ब्याकरोतीति अत्थो।

सीलब्बतपरामासन्ति सीलञ्च वतञ्च परामसित्वा गहितग्गहणमत्तं। **सारतो पच्चागच्छन्तो**ति सारभावेन जानन्तो। **अब्यापज्जाधिमुत्तो**ति अब्यापज्जं अरहत्तं ब्याकरोति।

अमिस्सीकतन्ति अमिस्सकतं। किलेसा हि आरम्मणेन सद्धिं चित्तं मिस्सं करोन्ति, तेसं अभावा अमिस्सीकतं। **भुसा वातवुट्ठी**ति बलववातक्खन्धो।

उपादानक्खयस्स चाति उपयोगत्थे सामिवचनं। **दिस्वा आयतनुप्पाद**न्ति चक्खादिआयतनानं उप्पादञ्च वयञ्च दिस्वा। **चित्तं विमुच्चती**ति इमाय विपस्सनापटिपत्तिया फलसमापत्तिवसेन चित्तं विमुच्चति।

सोणकोळिविसकथादिवण्णना निट्ठिता।

दिगुणादिउपाहनपटिक्खेपकथावण्णना

२४५. **सकटवाहे**ति द्वीहि सकटेहि परिच्छिन्ने वाहे। **''वाहे''**ति बहुवचनस्स हिरञ्ञविसेसनत्तेपि सामञ्ञापेक्खाय ''हिरञ्ञ''न्ति एकवचनं कतं।

२४६. **अद्दारिट्ठकवण्णा**ति अल्लारिट्ठफलवण्णा, तिन्तकाकपक्खवण्णातिपि वदन्ति। **रजन**न्ति उपलित्तं नीलादिवण्णं सन्धाय वुत्तं। तेनाह **''चोळकेन पुञ्छित्वा''**ति। तञ्हि तथा पुञ्छिते विगच्छति। यं पन चम्मस्स दुग्गन्धापनयनत्थं काळरत्तादिरजनेहि रञ्जितत्ता काळरत्तादिवण्णं होति, तं चोळादीहि अपनेतुं न सक्का चम्मगतिकमेव, तस्मा तं वट्टतीति दट्ठब्बं।

खल्लकन्ति सब्बपण्हिपिधानचम्मं, अपरिगळनत्थं पण्हिउपरिभागे अपिधाय आरोपनबन्धनमत्तं वट्टति। **विचित्रा**ति सण्ठानतो विचित्रपटा अधिप्पेता, न वण्णतो सब्बसो अपनेतब्बेसु खल्लकादीसु पविट्ठत्ता। बिळालसदिसमुखत्ता महाउलूका **''पक्खिबिळाला''**ति वुच्चति, तेसं चम्मं नाम पक्खलोममेव।

दिगुणादिउपाहनपटिक्खेपकथावण्णना निट्ठिता।

अज्झारामेउपाहनपटिक्खेपकथादिवण्णना

२५१. **उण्णाहि कतपादुका**ति एत्थ उण्णामयकम्बलेहि कता पादुका सङ्गय्हन्ति।

२५३. **गङ्गामहकीळिकाया**ति गङ्गामहे कीळिकाय। तत्थ हि इत्थिपुरिसा यानेहि उदककीळं गच्छन्ति। **पीठकसिविक**न्ति फलकादिना कतं पीठकयानं। **पटपोतलिकं** अन्दोलिका। सब्बम्पि यानं उपाहनेनपि गन्तुं असमत्थस्स गिलानस्स अनुञ्ञातं।

२५४. **वाळरूपानी**ति आहरिमानि वाळरूपानि। **चतुरङ्गुलाधिकानी**ति उद्दलोमीएकन्तलोमीहि विसेसदस्सनं। चतुरङ्गुलतो हि ऊनानि किर उद्दलोमीआदीसु पविसन्ति। **वानचित्रो उण्णामयत्थरणो**ति नानावण्णेहि उण्णामयसुत्तेहि भित्तिच्छेदादिवसेन वायित्वा कतचित्तत्थरणो। **घनपुप्फको**ति बहलरागो। **पकतितूलिका**ति तूलपुण्णा भिसि। **विकतिका**ति सीहरूपादिवसेन वानचित्राव गय्हति। **उद्दलोमी**ति ''उभतोदसं उण्णामयत्थरण''न्ति **दीघनिकायट्ठकथायं** वुत्तं। **कोसेय्यकट्टिस्समय**न्ति कोसियसुत्तानं अन्तरा सुवण्णमयसुत्तानि पवेसेत्वा वीतं। सुवण्णसुत्तं किर ''कट्टिस्सं, कसट''न्ति च वुच्चति। तेनेव ''कोसेय्यकसटमय''न्ति **आचरिय-धम्मपालत्थेरेन** वुत्तन्ति वदन्ति। **रतनपरिसिब्बित**न्ति सुवण्णलित्तं। **सुद्धकोसेय्य**न्ति रतनपरिसिब्बनरहितं।

अजिनमिगचम्मानं अतिसुखुमत्ता दुपट्टतिपट्टानि कत्वा सिब्बन्तीति वुत्तं **''अजिनप्पवेणी''**ति। **रत्तवितानेना**ति सब्बरत्तेन वितानेन। यं पन नानावण्णं वानचित्तं वा लेपचित्तं वा, तं वट्टति। **उभतोलोहितकूपधाने**पि एसेव नयो। **''चित्रं वा''**ति इदं पन सब्बथा कप्पियत्ता वुत्तं, न पन उभतोउपधानेसु अकप्पियत्ता। न हि लोहितक-सद्दो चित्ते वत्तति, पटलिग्गहणेनेव चित्तकस्सपि अत्थरणस्स सङ्गहेतब्बप्पसङ्गतो, कासावं पन लोहितकवोहारं न गच्छति। तस्मा वितानेपि उभतोउपधानेपि वट्टति। **सचे पमाणयुत्त**न्तिआदि अञ्ञप्पमाणातिक्कन्तस्स बिब्बोहनस्स पटिक्खित्तभावदस्सनत्थं वुत्तं, न पन उच्चासयनमहासयनभावदस्सनत्थं तथा अवुत्तत्ता। तं पन उपधानं उपोसथिकानं गहट्ठानं वट्टति। उच्चासयनमहासयनमेव हि तदा तेसं न वट्टति। **दीघनिकायट्ठकथा**दीसु किञ्चापि ''ठपेत्वा तूलिकं सब्बानेव गोनकादीनि रतनपरिसिब्बितानि वट्टन्ती''तिआदि वुत्तं, विनयट्ठकथायेव कप्पियाकप्पियभावे पमाणन्ति गहेतब्बं।

अज्झारामेउपाहनपटिक्खेपकथादिवण्णना निट्ठिता।

गिहिविकतानुञ्ञातादिकथावण्णना

२५६. **अभिनिस्साया**ति अपस्साय। **विसुकायिकविप्फन्दितान**न्ति पटिपक्खभूतानं दिट्ठिचित्तविप्फन्दितानन्ति अत्थो।

२५७. **यतिन्द्रिय**न्ति मनिन्द्रियवसेन सञ्ञतिन्द्रियं।

२५८. पाळियं **अट्ठकवग्गिकानी**ति **सुत्तनिपाते** (सु॰ नि॰ ७७२ आदयो) अट्ठकवग्गभूतानि सोळस सुत्तानि। **एवं चिरं अकासी**ति एवं चिरकालं पब्बज्जं अनुपगन्त्वा अगारमज्झे केन कारणेन वासमकासीति अत्थो। सो किर मज्झिमवये पब्बजितो, तेन भगवा एवमाह। **एतमत्थं विदित्वा**ति कामेसु दिट्ठादीनवा चिरायित्वापि घरावासेन पक्खन्दन्तीति एतमत्थं सब्बाकारतो विदित्वा।

आदीनवं लोकेति सङ्खारलोके अनिच्चतादिआदीनवं। **निरुपधि**न्ति निब्बानं। ''अरियो न रमती पापे''ति इमस्स हेतुमाह **''पापे न रमती सुची''**ति। तत्थ **सुची**ति विसुद्धपुग्गलो।

२५९. **काळसीहो**ति काळमुखवानरजाति। **चम्मं न वट्टती**ति निसीदनत्थरणं कातुं न वट्टति, भूमत्थरणादिवसेन सेनासनपरिभोगो वट्टतेव।

गिहिविकतानुञ्ञातादिकथावण्णना निट्ठिता।

चम्मक्खन्धकवण्णनानयो निट्ठितो।

६. भेसज्जक्खन्धको

पञ्चभेसज्जादिकथावण्णना

२६०. भेसज्जक्खन्धके **पित्तं कोट्ठब्भन्तरगतं होती**ति बहिसरीरे ब्यापेत्वा ठितं अबद्धपित्तं कोट्ठब्भन्तरगतं होति, तेन पित्तं कुपितं होतीति अधिप्पायो।

२६१-२. पाळियं **नच्छादेन्ती**ति रुचिं न उप्पादेन्ति। **सुसुका**ति समुद्दे एका मच्छजाति, कुम्भिलातिपि वदन्ति। **संसट्ठ**न्ति परिस्सावितं।

२६३. **पिट्ठेही**ति पिसितेहि। **कसावेही**ति तचादीनि उदके तापेत्वा गहितऊसरेहि। **उब्भिद**न्ति ऊसरपंसुमयं। **लोणबिल**न्ति लोणविसेसो।

२६४-५. **छकण**न्ति गोमयं। **पाकतिकचुण्ण**न्ति अपक्ककसावचुण्णं, गन्धचुण्णं पन न वट्टति। पाळियं **चुण्णचालिनि**न्ति उदुक्खले कोट्टितचुण्णपरिस्सावनिं। **सुवण्णगेरुको**ति सुवण्णतुत्थादि। पाळियं **अञ्जनूपपिसन**न्ति अञ्जने उपनेतुं पिसितब्बभेसज्जं।

२६७-९. **कबळिका**ति उपनाहभेसज्जं। **घरदिन्नकाबाधो** नाम घरणिया दिन्नवसीकरणभेसज्जसमुट्ठितआबाधो। **ताय छारिकाय पग्घरितं खारोदक**न्ति परिस्सावने तच्छारिकं पक्खिपित्वा उदके अभिसिञ्चिते ततो छारिकतो हेट्ठा पग्घरितं खारोदकं। पाळियं **अकटयूसेना**ति अनभिसङ्खतेन मुग्गयूसेन। **कटाकटेना**ति मुग्गे पचित्वा अचालेत्वा परिस्सावितेन मुग्गयूसेनाति वदन्ति।

पञ्चभेसज्जादिकथावण्णना निट्ठिता।

गुळादिअनुजाननकथावण्णना

२७२-४. **गुळकरण**न्ति उच्छुसालं। **अविस्सत्था**ति सासङ्का।

२७६. **अप्पमत्तकेपि वारेन्ती**ति अप्पमत्तके दिन्ने दायकानं पीळाति पटिक्खिपन्ति। **पटिसङ्खापी**ति एत्तकेनपि यापेतुं सक्का, ''अवसेसं अञ्ञेसं होतू''ति सल्लक्खेत्वापि पटिक्खिपन्ति।

२७९. **वत्थिपीळन**न्ति यथा वत्थिगततेलादि अन्तोसरीरे आरोहन्ति, एवं हत्थेन वत्थिमद्दनं। सम्बाधे सत्थकम्मवत्थिकम्मानमेव पटिक्खित्तत्ता दहनकम्मं वट्टति एव।

गुळादिअनुजाननकथावण्णना निट्ठिता।

यागुमधुगोळकादिकथावण्णना

२८२-३. पाळियं **दसस्स ठानानी**ति अस्स पटिग्गाहकस्स दस ठानानि कारणानि धम्मेनाति अत्थो। **अनुप्पवेच्छती**ति देति। वातञ्च ब्यपनेतीति सम्बन्धो, वातञ्च अनुलोमेतीति अत्थो। **सग्गा ते आरद्धा**ति तया देवलोका आराधिता।

यागुमधुगोळकादिकथावण्णना निट्ठिता।

पाटलिगामवत्थुकथावण्णना

२८६. **पाटलिगामे नगरं मापेन्ती**ति पाटलिगामस्स समीपे तस्सेव गामखेत्तभूते महन्ते अरञ्ञप्पदेसे पाटलिपुत्तं नाम नगरं मापेन्ति। **यावता अरियं आयतन**न्ति यत्तकं अरियमनुस्सानं ओसरणट्ठानं। **यावता वणिप्पथो**ति यत्तकं वाणिजानं भण्डविक्कीणनट्ठानं, वसनट्ठानं वा, इदं तेसं सब्बेसं अग्गनगरं भविस्सतीति अत्थो। **पुटभेदन**न्ति सकटादीहि नानादेसतो आहटानं भण्डपुटानं विक्कीणनत्थाय मोचनट्ठानं। **सरन्ति** तळाकादीसुपि वत्तति, तन्निवत्तनत्थं **''सरन्ति इध नदी अधिप्पेता''**ति वुत्तं सरति सन्दतीति कत्वा। **विना एव कुल्लेन तिण्णा**ति इदं अप्पमत्तकउदकम्पि अफुसित्वा विना कुल्लेन पारप्पत्ता।

पाटलिगामवत्थुकथावण्णना निट्ठिता।

कोटिगामेसच्चकथावण्णना

२८७. पाळियं **सन्धावित**न्ति भवतो भवं पटिसन्धिग्गहणवसेन सन्धावनं कतं। **संसरित**न्ति तस्सेव वेवचनं। **ममञ्चेव तुम्हाकञ्चा**ति मया च तुम्हेहि च, सामिवसेनेव वा मम च तुम्हाकञ्च सन्धावनं अहोसीति अत्थो गहेतब्बो। **संसरित**न्ति संसरि। भवतण्हा एव भवतो भवं नेतीति **भवनेत्ती**ति वुत्ता।

२८९. ''नीला होन्ती''ति वुत्तमेवत्थं विवरितुं **''नीलवण्णा''**तिआदि वुत्तं। **नीलवण्णा**ति नीलविलेपना। एस नयो सब्बत्थ। **पटिवट्टेसी**ति पहरि। **अम्बकाया**ति अम्बाय। उपचारवचनञ्हेतं, मातुगामेनाति अत्थो। **उपसंहरथा**ति उपनेथ, ''ईदिसा तावतिंसा''ति परिकप्पेथाति अत्थो। इदञ्च भिक्खूनं संवेगजननत्थं वुत्तं, न निमित्तग्गाहत्थं। लिच्छविराजानो हि सब्बे न चिरस्सेव अजातसत्तुना विनासं पापुणिस्सन्ति।

कोटिगामेसच्चकथावण्णना निट्ठिता।

सीहसेनापतिवत्थुआदिकथावण्णना

२९०. **सन्धागारे**ति राजकिच्चस्स सन्धारणत्थाय निच्छिद्दं कत्वा विचारणत्थाय कतमहासभाय। **गमिकाभिसङ्खारो**ति गमने वायामो। **धम्मस्स च अनुधम्म**न्ति तुम्हेहि वुत्तस्स कारणस्स अनुकारणं, तुम्हेहि वुत्तस्स अत्थस्स अनुरूपमेवाति अधिप्पायो। **सहधम्मिको वादानुवादो**ति परेहि वुत्तकारणेन सकारणो हुत्वा तुम्हाकं वादो वा इतो परं तस्स अनुवादो वा। **कोचि** अप्पमत्तकोपि **गारय्हं ठानं न आगच्छती**ति किं तव वादे गारय्हकारणं नत्थीति वुत्तं होति।

२९३. **अनुविच्चकार**न्ति अनुविदिताकारं। रतनत्तयस्स सरणगमनादिकिरियं करोति। सहसा कत्वा मा पच्छा विप्पटिसारी अहोसीति अत्थो। **पटाकं परिहरेय्यु**न्ति धजपटाकं उक्खिपित्वा ''ईदिसो अम्हाकं सरणं गतो सावको जातो''ति नगरे घोसेन्ता आहिण्डन्ति।

२९४. **निमित्तकम्मस्सा**ति मंसखादननिमित्तेन उप्पन्नपाणातिपातकम्मस्स।

सीहसेनापतिवत्थुआदिकथावण्णना निट्ठिता।

कप्पियभूमिअनुजाननकथावण्णना

२९५. **अनुप्पगे एवा**ति पातोव। **ओरवसद्द**न्ति महासद्दं। **तं पन अवत्वापी**ति **पि**-सद्देन तथावचनम्पि अनुजानाति। **अट्ठकथासू**ति अन्धकट्ठकथाविरहितासु सेसट्ठकथासु। **साधारणलक्खण**न्ति अन्धकट्ठकथाय सह सब्बट्ठकथानं समानं।

चयन्ति अधिट्ठानउच्चवत्थुं। **यतो पट्ठाया**ति यतो इट्ठकादितो पट्ठाय, यं आदिं कत्वा भित्तिं उट्ठापेतुकामाति अत्थो। **''थम्भा पन उपरि उग्गच्छन्ति, तस्मा वट्टन्ती''**ति एतेन इट्ठकपासाणा हेट्ठा पतिट्ठापितापि यदि चयतो, भूमितो वा एकङ्गुलमत्तम्पि उग्गता तिट्ठन्ति, वट्टन्तीति सिद्धं होति।

आरामोति उपचारसीमापरिच्छिन्नो सकलो विहारो। **सेनासनानी**ति विहारस्स अन्तो तिणकुटिआदिकानि सङ्घस्स निवासगेहानि। **विहारगोनिसादिका नामा**ति सेनासनगोनिसादिका। सेनासनानि हि सयं परिक्खित्तानिपि आरामपरिक्खेपाभावेन ''गोनिसादिकानी''ति वुत्तानि। **''उपड्ढपरिक्खित्तोपी''**ति इमिना ततो ऊनपरिक्खित्तो येभुय्येन अपरिक्खित्तो नाम, तस्मा अपरिक्खित्तसङ्ख्यमेव गच्छतीति दस्सेति। **एत्था**ति उपड्ढादिपरिक्खित्ते। **कप्पियकुटिं लद्धुं वट्टती**ति गोनिसादिया अभावेन सेसकप्पियकुटीसु तीसु या काचि कप्पियकुटि कातब्बाति अत्थो।

तेसं गेहानीति एत्थ भिक्खूनं वासत्थाय कतम्पि याव न देन्ति, ताव तेसं सन्तकंयेव भविस्सतीति दट्ठब्बं। **विहारं ठपेत्वा**ति उपसम्पन्नानं वासत्थाय कतगेहं ठपेत्वाति अत्थो। **गेह**न्ति निवासगेहं, तदञ्ञं पन उपोसथागारादि सब्बं अनिवासगेहं चतुकप्पियभूमिविमुत्ता पञ्चमी कप्पियभूमि। सङ्घसन्तकेपि हि एतादिसे गेहे सुद्धु परिक्खित्तारामत्तेपि अब्भोकासे विय अन्तोवुत्थादिदोसो नत्थि। येन केनचि छन्ने, परिच्छन्ने च सहसेय्यप्पहोनके भिक्खुसङ्घस्स निवासगेहे अन्तोवुत्थादिदोसो, न अञ्ञत्थ। तेनाह **''यं पना''**तिआदि। तत्थ **''सङ्घिकं वा पुग्गलिकं वा''**ति इदं किञ्चापि भिक्खुनीनं सामञ्ञतो वुत्तं, भिक्खूनं पन सङ्घिकं पुग्गलिकञ्च भिक्खुनीनं, तासं सङ्घिकं पुग्गलिकञ्च भिक्खूनं गिहिसन्तकट्ठाने तिट्ठतीति वेदितब्बं।

मुखसन्निधीति अन्तोसन्निहितदोसो हि मुखप्पवेसननिमित्तं आपत्तिं करोति, नाञ्ञथा। तस्मा ''मुखसन्निधी''ति वुत्तो।

तत्थ तत्थ खण्डा होन्तीति उपड्ढतो अधिकं खण्डा होन्ति। **सब्बस्मिं छदने विनट्ठे**ति तिणपण्णादिवस्सपरित्तायके छदने विनट्ठे। गोपानसीनं पन उपरि वल्लीहि बद्धदण्डेसु ठितेसुपि जहितवत्थुका

होन्ति एव। **पक्खपासकमण्डल**न्ति एकस्मिं पस्से तिण्णं गोपानसीनं उपरि ठिततिणपण्णादिच्छदनं वुच्चति।

अनुपसम्पन्नस्स दातब्बो अस्सातिआदिना अकप्पियकुटियं वुत्थम्पि अनुपसम्पन्नस्स दिन्ने कप्पियं होति, सापेक्खदानञ्चेत्थ वट्टति, पटिग्गहणं विय न होतीति दस्सेति।

२९९. पाळियं **कन्तारे सम्भावेसी**ति अप्पभक्खकन्तारे सम्पापुणि।

कप्पियभूमिअनुजाननकथावण्णना निट्ठिता।

केणियजटिलवत्थुकथावण्णना

३००. **जटिलो**ति आहरिमजटाधरो तापसवेसधारको यञ्ञयुत्तो लोकपूजितो ब्राह्मणो। **पवत्तारो** पावचनवसेन वत्तारो। येसं सन्तकमिदं, येहि वा इदं गीतन्ति अत्थो। **गीतं पवुत्तं समिहित**न्ति अञ्ञमञ्ञस्स परियायवचनं वुत्तन्ति अत्थो। **तदनुगायन्ती**ति तं तेहि पुब्बे गीतं अनुगायन्ति। एवं सेसेसु च।

यावकालिकपक्कानन्ति पक्के सन्धाय वुत्तं, आमानि पन अनुपसम्पन्नेहि सीतुदके मद्दित्वा परिस्सावेत्वा दिन्नपानं पच्छाभत्तम्पि कप्पति एव। अयञ्च अत्थो महाअट्ठकथायं सरूपतो अवुत्तोति आह **''कुरुन्दियं पना''**तिआदि। **''उच्छुरसो निकसटो''**ति इदं पातब्बसामञ्ञेन यामकालिककथायं वुत्तं, तं पन सत्ताहकालिकमेवाति गहेतब्बं। **इमे चत्तारो रसा**ति फलपत्तपुप्फउच्छुरसा चत्तारो।

पाळियं **अग्गिहुत्तमुखा**ति अग्गिजुहनपुब्बका। **छन्दसो**ति वेदस्स। **सावित्ती मुखं** पठमं सज्झायितब्बाति अत्थो। **तपत**न्ति विजोतन्तानं।

केणियजटिलवत्थुकथावण्णना निट्ठिता।

रोजमल्लादिवत्थुकथावण्णना

३०१. **बहुकतो बुद्धे वा**ति बुद्धे कतबहुमानोति अत्थो। सो खो अहं, भन्ते आनन्द, ञातीनं दण्डभयतज्जितो अहोसिन्ति सेसो। एवञ्हि सति ''एवाह''न्ति पुन अहं-गहणं युज्जति। **विवरी**ति ''विवरतू''ति चिन्तामत्तेन विवरि, न उट्ठाय हत्थेन।

३०३. **अञ्ञतरो**ति सुभद्दो वुड्ढपब्बजितो। **द्वे दारका**ति सामणेरभूमियं ठिता द्वे पुत्ता। **नाळियावापकेना**ति नाळिया चेव थविकाय च। **संहरथ** इमेहि भाजनेहि तण्डुलादीनि सङ्कड्ढथाति अत्थो। **भुसागारे**ति पलालमये अगारे, पलालपुञ्जं अब्भन्तरतो पलालं सङ्कड्ढित्वा अगारं कतं होति, तत्थाति अत्थो।

रोजमल्लादिवत्थुकथावण्णना निट्ठिता।

चतुमहापदेसकथावण्णना

३०५. **परिमद्दन्ता**ति उपपरिक्खन्ता। **द्वे पटा देसनामेनेव वुत्ता**ति तेसं सरूपदस्सनपदमेतं। नाञ्ञनिवत्तनपदं पत्तुण्णपटस्सापि देसनामेन वुत्तत्ता।

तुम्बाति भाजनानि। **फलतुम्बो** नाम लाबुआदि। **उदकतुम्बो** उदकघटो। **किलञ्जच्छत्त**न्ति वेळुविलीवेहि वायित्वा कतछत्तं। **सम्भिन्नरस**न्ति मिस्सीभूतरसं।

चतुमहापदेसकथावण्णना निट्ठिता।

भेसज्जक्खन्धकवण्णनानयो निट्ठितो।

७. कथिनक्खन्धको

कथिनानुजाननकथावण्णना

३०६. कथिनक्खन्धके **सीसवसेना**ति पधानवसेन। **कथिन**न्ति पञ्चानिसंसे अन्तोकरणसमत्थताय थिरन्ति अत्थो। **सो नेसं भविस्सतीति युज्जती**ति ''सो तुम्हाक''न्ति अवत्वा ''नेस''न्ति वचनं युज्जति। **ये अत्थतकथिना**ति न केवलं तुम्हाकमेव, ये अञ्ञेपि अत्थतकथिना, तेसं भविस्सतीति अत्थो। अथ वा **वो**ति तदा सम्मुखीभूतेहि सद्धिं असम्मुखीभूते च अनागते च भिक्खू सब्बे एकतो सम्पिण्डेत्वा वुत्तं, तुम्हाकन्ति अत्थो। **सो नेस**न्ति एत्थ सो तेसन्ति योजेतब्बं। तेनाह ''अत्थतकथिनानं वो, भिक्खवे, इमानि पञ्च कप्पिस्सन्ती''ति। **मतकचीवर**न्ति मतस्स चीवरं। ''वुत्थवस्सवसेना''ति इदं पच्छिमवस्संवुत्थानम्पि साधारणन्ति आह **''पुरिमिकाय वस्सं उपगन्त्वा पठमपवारणाय पवारिता लभन्ती''**ति। **उपगता वा न लभन्ती**ति पच्छिमिकाय वुत्थवस्सेपि सन्धाय वुत्तं।

खलिमक्खितसाटकोति अहतवत्थं सन्धाय वुत्तं। **''अकातुं न लब्भती''**ति इमिना अनादरिये सति दुक्कटन्ति दीपेति।

''अपलोकेत्वा''ति इदं अञ्ञेसं वस्संवुत्थभिक्खूनं अदत्वा दातुकामेहि कत्तब्बविधिदस्सनं। यदि एवं कम्मवाचाय एव दानं अवुत्तन्ति आह **''कम्मवाचा पना''**तिआदि। कथिनचीवरं विय कम्मवाचाय दातुं न वट्टतीति अपलोकेत्वाव दातब्बन्ति अधिप्पायो।

३०८. **महाभूमिक**न्ति महाविसयं, चतुवीसतिआकारवन्तताय महावित्थारिकन्ति वुत्तं होति। **पञ्चक**न्ति पञ्चखण्डं। एसेव नयो सेसेसुपि। **पठमचिमिलिका**ति कथिनवत्थतो अञ्ञा अत्तनो पकतिचिमिलिका। **कुच्छिचिमिलिकं कत्वा सिब्बितमत्तेना**ति थिरजिण्णानं चिमिलिकानं एकतो कत्वा सिब्बनस्सेतं अधिवचनन्ति वदन्ति। महापच्चरियं, कुरुन्दियञ्च वुत्तवचनन्ति दस्सनं, ब्यञ्जनतो एव भेदो, न अत्थतोति दस्सनत्थं कतन्तिपि वदन्ति। **पिट्ठिअनुवातारोपनमत्तेना**ति दीघतो अनुवातस्स आरोपनमत्तेन। **कुच्छिअनुवातारोपनमत्तेना**ति पुथुलतो अनुवातस्स आरोपनमत्तेन। **रत्तिनिस्सग्गियेना**ति रत्तिअतिक्कन्तेन।

३०९. **हतवत्थकसाटकेना**ति अतिजिण्णसाटको। **न हि तेना**तिआदीसु तेन परिवारागतपाठेन इध आनेत्वा अवुच्चमानेन कथिनत्थारकस्स जानितब्बेसु न किञ्चि परिहायति, तस्स सब्बस्स इधेव वुत्तत्ताति अधिप्पायो।

३१०. माता वियाति **मातिका,** इवत्थे क-पच्चयो दट्ठब्बो। तेन सिद्धमत्थं दस्सेन्तो आह **''मातिकाति मातरो''**तिआदि। **अस्सा**ति एतिस्सा मातिकाय। पक्कमनन्तिको कथिनुब्भारो एव हि सयं अत्तनो उप्पज्जतीति एवमभेदूपचारेन ''मातिका''ति वुत्तो उब्भारस्सेव पक्कमनन्ते समुप्पत्तितो, तब्बिनिमुत्ताय च मातिकाय अभावा, तप्पकासिकापि चेत्थ पाळि ''मातिका''ति वत्तुं युज्जति। सापि हि पक्कमनन्तिकुब्भारप्पकासनेन ''पक्कमनन्तिका''ति वुत्ता। एसेव नयो सेसुब्भारेसुपि। **पक्कमन**न्ति चेत्थ उपचारसीमातिक्कमनं दट्ठब्बं।

कथिनानुजाननकथावण्णना निट्ठिता।

आदायसत्तककथावण्णना

३११. ''न पुन आगमिस्स''न्ति इदं आवासपलिबोधुपच्छेदकारणदस्सनं। पञ्चसु हि चीवरमासेसु यदा कदाचि न पच्चेस्सन्ति चित्तेन उपचारसीमातिक्कमेन आवासपलिबोधो छिज्जति। पच्चेस्सन्ति बहिउपचारगतस्स पन यत्थ कत्थचि न पच्चेस्सन्ति चित्ते उप्पन्नमत्ते छिज्जति। **पठमं चीवरपलिबोधो छिज्जती**ति न पच्चेस्सन्ति पक्कमनतो पुरेतरमेव चीवरस्स निट्ठितत्ता वुत्तं। ''कतचीवरमादाया''ति हि वुत्तं। अत्थतकथिनस्स हि भिक्खुनो याव ''सङ्घतो वा दायककुलादितो वा चीवरं लभिस्सामी''ति चीवरासा वा लद्धवत्थानं सहायसम्पदादियोगं लभित्वा सङ्घाटिआदिभावेन ''छिन्दित्वा करिस्सामी''ति करणिच्छा वा पवत्तति, ताव चीवरपलिबोधो अनुपच्छिन्नो एव। यदा पन यथापत्थितट्ठानतो चीवरादीनं सब्बथा अलाभेन वा चीवरासा चेव लद्धानं कत्वा निट्ठानेन वा नट्ठविनट्ठादिभावेन वा चीवरे निरपेक्खताय वा करणिच्छा च विगच्छति, तदा चीवरपलिबोधो उपच्छिन्नो होति।

सो च इध ''कतचीवरं आदाया''ति वचनेन पकासितो। एवं उपरि सब्बत्थ पाळिवचनक्कमं निस्साय नेसं पठमं, पच्छा च उपच्छिज्जनं वुत्तन्ति दट्ठब्बं। सब्बथापि च इमेसं उभिन्नं पलिबोधानं उपच्छेदेनेव कथिनुब्भारो, न एकस्स। तेसञ्च पुब्बापरियेन, एकक्खणे च उपच्छिज्जनं दस्सेतुं इमा अट्ठ मातिका ठपिताति वेदितब्बा। **अन्तोसीमाय**न्ति चीवरनिट्ठानक्खणेयेव छिन्नत्ता वुत्तं। **नेविमं चीवरं कारेस्स**न्ति चीवरे अपेक्खाय विगतत्ता करणपलिबोधस्सापि उपच्छिन्नतं दस्सेति। यो पन अप्पिच्छताय वा अनत्थिकताय वा सब्बथा चीवरं न सम्पटिच्छति, तस्स बहिसीमागतस्स सब्बथापि चीवरपलिबोधाभावेन न पच्चेस्सन्ति सन्निट्ठानमत्तेन **सन्निट्ठानन्तिको** कथिनुब्भारो वेदितब्बो। **सो पना**ति पलिबोधुपच्छेदो। **अयं पना**ति आसावच्छेदको कथिनुब्भारो विसुं वित्थारेत्वा वुत्तो, इध न वुत्तोति सम्बन्धो।

अनासाय लभतीति ''यस्मिं कुले चीवरं लभिस्सामा''ति आसा अनुप्पन्नपुब्बा, तत्थ चीवरासाय अनुप्पन्नट्ठाने यत्थ कत्थचि लभतीति अत्थो। **आसाय न लभती**ति आसीसितट्ठाने न लभतीति अत्थो। **इध न वुत्तो**ति इध सवनन्तिकानन्तरे न वुत्तो। **तत्था**ति तस्मिं सीमातिक्कन्तिके। **सीमातिक्कन्तिको** नाम चीवरमासानं परियन्तदिवससङ्खाताय सीमाय अतिक्कमनतो सञ्जातो। केचि ''बहिसीमाय कालातिक्कमो सीमातिक्कमो''ति मञ्ञन्ति, तेसं अन्तोउपचारे चीवरकालातिक्कमेपि कथिनुब्भारो असम्मतो नाम सियाति न चेतं युत्तं। तस्मा यत्थ कत्थचि कालातिक्कमो सीमातिक्कमोति वेदितब्बो। एत्थ च पाळियं ''कतचीवरो''ति इदं उपलक्खणमत्तं, अकतचीवरस्सपि कालातिक्कमेन सीमातिक्कन्तिको होति, द्वे च पलिबोधा एकतो छिज्जन्ति। एवं अञ्ञत्थापि यथासम्भवं तंतं विसेसनाभावेपि कथिनुब्भारता, पलिबोधुपच्छेदप्पकारो च वेदितब्बो। **''सहुब्भारे द्वेपि पलिबोधा अपुब्बं अचरिमं छिज्जन्ती''**ति इदं अकतचीवरस्स पच्चेस्सन्ति अधिट्ठानसम्भवपक्खं सन्धाय वुत्तं, तेसु अञ्ञतराभावेपि सहुब्भारोव होति।

३१२-३२५. समादायवारो आदायवारसदिसोव। उपसग्गमेवेत्थ विसेसो। तेनाह **''पुन समादायवारेपि...पे०... तेयेव दस्सिता''**ति। विप्पकतचीवरे पक्कमनन्तिकस्स अभावतो **''यथासम्भव''**न्ति वुत्तं। तेनेव विप्पकतचीवरवारे छळेव उब्भारा वुत्ता, चीवरे हत्थगते च आसावच्छेदिकस्स असम्भवा, सो एतेसु वारेसु यत्थ कत्थचि न वुत्तो, विसुञ्ञेव वुत्तो। विप्पकतवारे चेत्थ आदायवारसमादायवारवसेन द्वे छक्कवारा वुत्ता।

ततो परं निट्ठानसन्निट्ठाननासनन्तिकानं वसेन तीणि तिकानि दस्सितानि। तत्थ ततियत्तिके **अनधिट्ठितेना**ति ''पच्चेस्सं, न पच्चेस्स''न्ति एवं अनधिट्ठितेन, न एवं मनसिकत्वाति अत्थो। ततियत्तिकतो पन परं एकं छक्कं दस्सितं। एवं तीणि तिकानि, एकं छक्कञ्चाति पठमं पन्नरसकं वुत्तं, इमिना नयेन दुतियपन्नरसकादीनि वेदितब्बानि।

पाळियं आसाद्वादसके बहिसीमागतस्स कथिनुद्धारेसु तेसम्पि चीवरासादिवसेन चीवरपलिबोधो याव चीवरनिट्ठाना तिट्ठतीति आह **''सो बहिसीमागतो सुणाति 'उब्भतं किर तस्मिं आवासे कथिन'न्ति...पे०... सवनन्तिको कथिनुद्धारो''**ति। एत्थ च सवनक्खणे आवासपलिबोधो पठमं छिज्जति, निट्ठिते चीवरपलिबोधोति वेदितब्बो।

दिसंगमिकनवके **दिसंगमिको पक्कमती**ति न पच्चेस्सन्ति पक्कमति, इमिना आवासपलिबोधाभावो दस्सितो होति। तेनेव वस्संवुत्थावासे पुन गन्त्वा चीवरनिट्ठापितमत्ते निट्ठानन्तिको कथिनुद्धारो वुत्तो। **''चीवरपटिविसं अपविलायमानो''**ति इमिना चीवरपलिबोधसमङ्गिकत्तमस्स दस्सेति, **अपविलायमानो**ति आकङ्खमानो। सेसं सुविञ्ञेय्यमेव।

आदायसत्तककथावण्णना निट्ठिता।

कथिनक्खन्धकवण्णनानयो निट्ठितो।

८. चीवरक्खन्धको

जीवकवत्थुकथादिवण्णना

३२९. चीवरक्खन्धके **कम्मविपाक**न्ति कम्मपच्चयउतुचित्ताहारसमुट्ठितं अप्पटिबाहियरोगं सन्धाय वुत्तं कम्मजस्स रोगस्स अभावा।

३३०. पाळियं **संयमस्सा**ति सङ्गहणस्स। अविसज्जनस्साति अत्थो ''यो संयमो सो विनासो''तिआदीसु (पे० व० २३७) विय। एतस्स संयमस्स फलं उपजानामाति योजना। तमेव फलं दस्सेन्ती आह **''वरमेतं...पे०... आसित्त''**न्ति। केचि पन ''संयमस्साति आनिसंसस्स, उपयोगत्थे चेतं सामिवचन''न्ति (सारत्थ० टी० महावग्ग ३.३२९-३३०) अत्थं वदन्ति।

३३६. **उस्सन्नदोसो**ति सञ्जातपित्तादिदोसो। **सब्बत्था**ति सकलसरीरे।

३३७. **महापिट्ठियकोजव**न्ति हत्थिपिट्ठियं अत्थरितब्बताय ''महापिट्ठिय''न्ति लद्धसमञ्ञं उण्णामयत्थरणं।

३३८-९. **उपड्ढकासिनं खममान**न्ति अड्ढकासिअग्घनकं। पाळियं **किं नु खो**ति कतमं नु खो।

३४०-३४२. **उपचारे**ति सुसानस्स आसन्ने पदेसे। **छड्डेत्वा गता**ति किञ्चि अवत्वा एव छड्डेत्वा गता, एतेन ''भिक्खू गण्हन्तू''ति छड्डिते एव अकामा भागदानं विहितं, केवलं छड्डिते पन कतिकाय असति एकतो बहूसु पविट्ठेसु येन गहितं, तेन अकामभागो न दातब्बोति दस्सेति। समाना दिसा पुरत्थिमादिभेदा एतेसन्ति सदिसाति आह **''एकदिसाय वा ओक्कमिंसू''**ति। **धुरविहारट्ठाने**ति विहारस्स सम्मुखट्ठाने।

जीवकवत्थुकथादिवण्णना निट्ठिता।

भण्डागारसम्मुतिआदिकथावण्णना

३४३. **विहारमज्झे**ति सब्बेसं जाननत्थाय वुत्तं। **वण्णावण्णं कत्वा**ति पटिवीसप्पहोनकताजाननत्थं हलिद्दियादीहि खुद्दकमहन्तवण्णेहि युत्ते समे कोट्ठासे कत्वा। तेनाह **''समे पटिवीसे ठपेत्वा''**ति। **इद**न्ति सामणेरानं उपड्ढपटिवीसदानं। **फातिकम्म**न्ति पहोनककम्मं। यत्तकेन विनयागतेन सम्मुञ्जनीबन्धनादिहत्थकम्मेन विहारस्स ऊनकता न होति, तत्तकं कत्वाति अत्थो। **सब्बेस**न्ति

ततुप्पादवस्सावासिकं गण्हन्तानं सब्बेसं भिक्खूनं, सामणेरानञ्च। **भण्डागारिकचीवरेपी**ति अकालचीवरं सन्धाय वुत्तं। **एत**न्ति उक्कुट्ठिया कताय समभागदानं। **विरज्झित्वा करोन्ती**ति कत्तब्बकालेसु अकत्वा यथारुचितक्खणे करोन्ति।

एत्तकेन मम चीवरं पहोतीति द्वादसग्घनकेनेव मम चीवरं परिपुण्णं होति, न ततो ऊनेनाति सब्बं गहेतुकामोति अत्थो।

भण्डागारसम्मुतिआदिकथावण्णना निट्ठिता।

चीवररजनकथादिवण्णना

३४४. एवञ्हि कतेति वट्टाधारस्स अन्तो रजनोदकं, बहि छल्लिकञ्च कत्वा वियोजने कते। **न उत्तरती**ति केवलं उदकतो फेणुट्ठानाभावा न उत्तरति। **रजनकुण्ड**न्ति पक्करजनट्ठपनकं महाघटं।

३४५. अनुवातादीनं दीघपत्तानन्ति आयामतो, वित्थारतो च अनुवातं। **आदि**-सद्देन द्विन्नं खन्धानं अन्तरा मातिकाकारेन ठपितपत्तञ्च ''दीघपत्त''न्ति दट्ठब्बं। **आगन्तुकपत्त**न्ति दिगुणचीवरस्स उपरि अञ्ञं पट्टं अप्पेन्ति, तं सन्धाय वुत्तं। तं किर इदानि न करोन्ति।

३४६. पाळियं **नन्दिमुखिया**ति तुट्ठिमुखिया, पसन्नदिसामुखायाति अत्थो।

३४८. अच्छुपेय्यन्ति पतिट्ठपेय्यं। **हतवत्थकान**न्ति पुराणवत्थानं। **अनुद्धरित्वावा**ति अग्गळे विय दुब्बलट्ठानं अनपनेत्वाव।

३४९-३५१. विसाखवत्थुम्हि **कल्लकाया**ति अकिलन्तकाया। **गती**ति ञाणगति अधिगमो। **अभिसम्परायो**ति ''सकिदेव इमं लोकं आगन्त्वा दुक्खस्सन्तं करोती''तिआदिना (सं॰ नि॰ ५.१०४८) वुत्तो ञाणाभिसम्परायो, मग्गञाणयुत्तेहि गन्तब्बगतिविसेसोति अत्थो। तं भगवा ब्याकरिस्सति। **''ददाति दान''**न्ति इदं अन्नपानविरहितानं सेसपच्चयानं दानवसेन वुत्तं। **सोवग्गिक**न्ति सग्गसंवत्तनिकं।

३५९. अट्ठपदकच्छन्नेनाति अट्ठपदकसङ्खातजूतफलकलेखासण्ठानेन।

३६२. पाळियं **नदीपारं गन्तु**न्ति भिक्खुनो नदीपारगमनं होतीति अत्थो। **अग्गळगुत्तियेव पमाण**न्ति इमेहि चतूहि निक्खेपकारणेहि ठपेन्तेनपि अग्गळगुत्तिविहारे एव ठपेतुं वट्टतीति अधिप्पायो। **निस्सीमागत**न्ति वस्सानसङ्खातं कालसीमं अतिक्कन्तं, तं वस्सिकसाटिकचीवरं न होतीति अत्थो।

चीवररजनकथादिवण्णना निट्ठिता।

सङ्घिकचीवरुप्पादकथावण्णना

३६३. पञ्च मासेति अच्चन्तसंयोगे उपयोगवचनं। **वड्ढिं पयोजेत्वा ठपितउपनिक्खेपतो**ति वस्सावासिकस्सत्थाय दायकेहि वड्ढिं पयोजेत्वा ठपितउपनिक्खेपतो। **''इध वस्संवुत्थसङ्घस्सा''**ति इदं अभिलापमत्तं। इध-सद्दं पन विना ''वस्संवुत्थसङ्घस्स देमा''ति वुत्तेपि सो एव नयो। **अनत्थतकथिनस्सापि पञ्च मासे पापुणाती**ति वस्सावासिकलाभवसेन उप्पन्नत्ता अनत्थतकथिनस्सापि वुत्थवस्सस्स पञ्च मासे पापुणाति। वक्खति हि ''चीवरमासतो पट्ठाय याव हेमन्तस्स पच्छिमो दिवसो, ताव वस्सावासिकं देमाति वुत्ते कथिनं अत्थतं वा होतु अनत्थतं वा, अतीतवस्संवुत्थानमेव पापुणाती''ति (महाव॰ अट्ठ॰ ३७९)। **ततो पर**न्ति पञ्चमासतो परं, गिम्हानस्स पठमदिवसतो पट्ठायाति अत्थो। **''कस्मा? पिट्ठिसमये उप्पन्नत्ता''**ति इदं ''उदाहु अनागतवस्से''ति इमस्सानन्तरं दट्ठब्बं। पोत्थकेसु पन ''अनत्थतकथिनस्सापि पञ्च मासे पापुणाती''ति इमस्सानन्तरं ''कस्मा पिट्ठिसमये उप्पन्नत्ता''ति इदं लिखन्ति, तं पमादलिखितं पिट्ठिसमये उप्पन्नं सन्धाय ''अनत्थतकथिनस्सापी''ति वत्तब्बतो। वुत्थवस्से हि सन्धाय ''अनत्थतकथिनस्सापी''ति वुत्तं, न च पिट्ठिसमये उप्पन्नं वुत्थवस्सस्सेव पापुणातीति सम्मुखीभूतानं सब्बेसम्पि पापुणनतो। तेनेव वक्खति ''सचे पन गिम्हानं पठमदिवसतो पट्ठाय एवं वदति, तत्र सम्मुखीभूतानं सब्बेसं पापुणाति। कस्मा? पिट्ठिसमये उप्पन्नत्ता''ति (महाव॰ अट्ठ॰ १७९)।

दुग्गहितानीति अग्गहितानि। सङ्घिकानेवाति अत्थो। **इतोवा**ति थेरानं दातब्बतोव, इदानेवाति वा अत्थो।

सङ्घिकचीवरुप्पादकथावण्णना निट्ठिता।

उपनन्दसक्यपुत्तवत्थुकथावण्णना

३६४. ''सत्ताहवारेन अरुणमेव उट्ठापेती''ति इदं नानासीमाविहारेसु कत्तब्बनयेन एकस्मिम्पि विहारे द्वीसु सेनासनेसु निवुत्थभावदस्सनत्थं वुत्तं, अरुणुट्ठापनेनेव तत्थ वुत्थो होति, न पन वस्सच्छेदपरिहाराय। अन्तोउपचारसीमायपि यत्थ कत्थचि अरुणं उट्ठापेन्तो अत्तना गहितसेनासनं अप्पविट्ठोपि वुत्थवस्सो एव होति, गहितसेनासने पन निवुत्थो नाम न होति, तत्थ च अरुणुट्ठापने पन सति होति। तेनाह **''पुरिमस्मिं बहुतरं निवसति नामा''**ति, एतेन च इतरस्मिं सत्ताहवारेनापि अरुणुट्ठापने सति एव अप्पकतरं निवसति नाम होति, नासतीति दीपितं होति। **नानालाभेही**ति विसुं विसुं निबद्धवस्सावासिकलाभेहि। **नानूपचारेही**ति नानापरिक्खेपनानाद्वारेहि। **एकसीमाविहारेही**ति द्विन्नं विहारानं एकेन पाकारेन परिक्खित्तत्ता एकाय उपचारसीमाय अन्तोगतेहि द्वीहि विहारेहि। **सेनासनग्गाहो पटिप्पस्सम्भती**ति पठमं गहितो पटिप्पस्सम्भति। **तत्था**ति यत्थ सेनासनग्गाहो पटिप्पस्सद्धो, तत्थ।

उपनन्दसक्यपुत्तवत्थुकथावण्णना निट्ठिता।

गिलानवत्थुकथावण्णना

३६५-६. भूमियं परिभण्डं अकासीति गिलानेन निपन्नभूमियं किलिट्ठट्ठानं धोवित्वा हरितूपलित्तं कारेसीति अत्थो। **भेसज्जं योजेतुं असमत्थो**ति परेहि वुत्तविधिम्पि कातुं असमत्थो। पाळियं गिलानुपट्ठाकानं चीवरदाने सामणेरानं तिचीवराधिट्ठानाभावा ''चीवरञ्च पत्तञ्चा''तिआदि सब्बत्थ वुत्तं। सचेपि सहस्सं अग्घति, गिलानुपट्ठाकानञ्ञेव दातब्बन्ति सम्बन्धो।

गिलानवत्थुकथावण्णना निट्ठिता।

मतसन्तककथादिवण्णना

३६९. अञ्ञन्ति चीवरपत्ततो अञ्ञं। **अप्पग्घ**न्ति अतिजिण्णादिभावेन निहीनं। **ततो**ति अवसेसपरिक्खारतो। **सब्ब**न्ति पत्तं, तिचीवरञ्च।

तत्थ तत्थ सङ्घस्सेवाति तस्मिं तस्मिं विहारे सङ्घस्सेव। पाळियं **अविस्सज्जिकं अवेभङ्गिक**न्ति आगतानागतस्स चातुद्दिसस्स सङ्घस्सेव सन्तकं हुत्वा कस्सचि अविस्सज्जिकं अवेभङ्गिकं भवितुं अनुजानामीति अत्थो।

३७१-२. **अक्कनाळमय**न्ति अक्कदण्डमयं। **अक्कदुस्सानी**ति अक्कवाकेन कतदुस्सानि, पोत्थकगतिकानि दुक्कटवत्थुकानीति अत्थो। **दुपट्टचीवरस्स वा मज्झे**ति यं निट्ठिते तिपट्टचीवरं होति, तस्स मज्झे पटलं कत्वा दातब्बानीति अत्थो।

३७४. ''**सन्ते पतिरूपे गाहके**''ति वुत्तत्ता गाहके असति अदत्वा भाजितेपि सुभाजितमेवाति दट्ठब्बं।

३७६. **दक्खिणोदकं पमाण**न्ति ''एत्तकानि चीवरानि दस्सामी''ति पठमं उदकं पातेत्वा पच्छा देन्ति। तं येहि गहितं, ते भागिनोव होन्तीति अधिप्पायो। **परसमुद्दे**ति जम्बुदीपे। तम्बपण्णिदीपञ्हि उपादायेस एवं वुत्तो।

मतसन्तककथादिवण्णना निट्ठिता।

अट्ठचीवरमातिकाकथावण्णना

३७९. **पुग्गलाधिट्ठाननयेन वुत्त**न्ति ''सीमाय दान''न्तिआदिना वत्तब्बे ''सीमाय देती''तिआदि पुग्गलाधिट्ठानेन वुत्तं। ''**अपिचा**''तिआदिना पठमलेड्डुपातभूतपरिक्खेपारहट्ठानतो बहि दुतियलेड्डुपातोपि उपचारसीमा एवाति दस्सेति। धुवसन्निपातट्ठानादिकम्पि परियन्ते ठितमेव गहेतब्बं। लोके गामसीमादयो विय लाभसीमा नाम विसुं पसिद्धा नाम नत्थि, केनायं अनुञ्ञाताति आह ''**नेव सम्मासम्बुद्धेना**''तिआदि। एतेन नायं सासनवोहारसिद्धा, लोकवोहारसिद्धा एवाति दस्सेति। ''**जनपदपरिच्छेदो**''ति इदं लोकपसिद्धसीमासद्दत्थवसेन वुत्तं। परिच्छेदब्भन्तरं पन सब्बं जनपदसीमाति गहेतब्बं, जनपदो एव जनपदसीमा। एवं रट्ठसीमादीसुपि। तेनाह ''**आणापवत्तिट्ठान**''न्तिआदि।

पथवीवेमज्झे गतस्साति याव उदकपरियन्ता खण्डसीमत्ता वुत्तं, उपचारसीमादीसु पन अबद्धसीमासु हेट्ठापथवियं सब्बत्थ ठितानं न पापुणाति, कूपादिपवेसारहट्ठाने ठितानञ्ञेव पापुणातीति हेट्ठा सीमाकथायं वुत्तनयेन तंतंसीमट्ठभावो वेदितब्बो। चक्कवाळसीमाय पन दिन्नं पथवीसन्धारकउदकट्ठानेपि ठितानं पापुणाति सब्बत्थ चक्कवाळवोहारत्ता।

बुद्धाधिवुत्थोति बुद्धेन भगवता निवुत्थो। **पाकवट्ट**न्ति निबद्धदानं। **वत्तती**ति पवत्तति। **तेही**ति येसं सम्मुखे एस देति, तेहि भिक्खूहि। **दुतियभागे पन थेरासनं आरुळ्हे**ति याव सङ्घनवका एकवारं सब्बेसं भागं दत्वा चीवरे अपरिक्खीणे पुन सब्बेसं दातुं दुतियभागे थेरस्स दिन्नेति अत्थो। **पंसुकूलिकानम्पि वट्टती**ति एत्थ ''तुय्हं देमा''ति अवुत्तत्ताति कारणं वदन्ति। यदि एवं ''सङ्घस्स देमा''ति वुत्तेपि वट्टेय्य, ''भिक्खूनं देम, थेरानं देम, सङ्घस्स देमा''ति (महाव॰ अट्ठ॰ ३७९) वचनतो भेदो न दिस्सति। वीमंसितब्बमेत्थ कारणं।

पारुपितुं वट्टतीति पंसुकूलिकानं वट्टति। **भिक्खुसङ्घस्स च भिक्खुनीनञ्च दम्मीति वुत्ते पन न मज्झे भिन्दित्वा दातब्ब**न्ति एत्थ यस्मा भिक्खुनिपक्खे सङ्घस्स पच्चेकं अपरामट्ठत्ता भिक्खुनीनं गणनाय भागो दातब्बोति दायकस्स अधिप्पायोति सिज्झति, तथा दानञ्च भिक्खूपि गणेत्वा दिन्ने एव युज्जति। इतरथा हि कित्तकं भिक्खूनं दातब्बं, कित्तकं भिक्खुनीनन्ति न विञ्ञायति, तस्मा ''भिक्खुसङ्घस्सा''ति वुत्तवचनम्पि ''भिक्खून''न्ति वुत्तवचनसदिसमेवाति आह ''**भिक्खू च भिक्खुनियो च गणेत्वा दातब्ब**''न्ति। तेनाह ''**पुग्गलो ...पे॰... भिक्खुसङ्घग्गहणेन अग्गहितत्ता**''ति। भिक्खुसङ्घ-सद्देन भिक्खूनञ्ञेव गहितत्ता, पुग्गलस्स पन ''तुय्हञ्चा''ति विसुं गहितत्ता च तत्थस्स अग्गहितता दट्ठब्बा, ''भिक्खूनञ्च भिक्खुनीनञ्च तुय्हञ्चा''ति वुत्तट्ठानसदिसत्ताति अधिप्पायो। पुग्गलप्पधानो हेत्थ सङ्घ-सद्दो दट्ठब्बो। केचि पन ''भिक्खुसङ्घग्गहणेन गहितत्ता''ति (सारत्थ॰ टी॰ महावग्ग ३.३७९) पाठं लिखन्ति, तं न सुन्दरं तस्स विसुं लाभग्गहणे कारणवचनत्ता। तथा हि विसुं सङ्घग्गहणेन गहितत्ताति विसुं पुग्गलस्सपि भागग्गहणे कारणं वुत्तं। यथा चेत्थ पुग्गलस्स अग्गहणं, एवं उपरि ''भिक्खुसङ्घस्स च तुय्हञ्चा''तिआदीसुपि सङ्घादि-सद्देहि पुग्गलस्स अग्गहणं दट्ठब्बं। यदि हि गहणं सिया, सङ्घतोपि, विसुम्पीति भागद्वयं लभेय्य उभयत्थ गहितत्ता।

पूजेतब्बन्तिआदि गिहिकम्मं न होतीति दस्सनत्थं वुत्तं। ''**भिक्खुसङ्घस्स हरा**''ति इदं पिण्डपातहरणं सन्धाय वुत्तं। तेनाह ''**भुञ्जितुं वट्टती**''ति। ''**अन्तोहेमन्ते**''ति इमिना अनत्थते कथिने वस्सानं पच्छिमे मासे दिन्नं पुरिमवस्संवुत्थानञ्ञेव पापुणाति, ततो परं हेमन्ते दिन्नं पच्छिमवस्संवुत्थानम्पि वुत्थवस्सत्ता पापुणाति। हेमन्ततो पन परं पिट्ठिसमये ''वस्संवुत्थसङ्घस्सा''ति एवं वत्वा दिन्नं अनन्तरे वस्से वा ततो परेसु वा यत्थ कत्थचि तस्मिं वुत्थवस्सानं सब्बेसं पापुणाति। ये पन सब्बथा अवुत्थवस्सा, तेसं न पापुणातीति दस्सेति। **सब्बेसम्पी**ति हि तस्मिं भिक्खुभावे वुत्थवस्सानं सब्बेसम्पीति अत्थो दट्ठब्बो। ''**वस्संवुत्थसङ्घस्सा**''ति वुत्तत्ता **सम्मुखीभूतानं सब्बेस**न्ति एत्थापि एसेव नयो। **अतीतवस्स**न्ति अनन्तरातीतवस्सं।

उद्देसं गहेतुं आगतोति उद्देसे अग्गहितेपि अन्तेवासिकोवाति वुत्तं। **गहेत्वा गच्छन्तो**ति परिनिट्ठितउद्देसो हुत्वा गच्छन्तो। ''**वत्तं कत्वा उद्देसपरिपुच्छादीनि गहेत्वा विचरन्तान**''न्ति इदं ''उद्देसन्तेवासिकान''न्ति इमस्सेव विसेसनं, तेन उद्देसकाले आगन्त्वा उद्देसं गहेत्वा गन्त्वा अञ्ञत्थ निवसन्ते अनिबद्धचारिके निवत्तेति।

अट्ठचीवरमातिकाकथावण्णना निट्ठिता।

चीवरक्खन्धकवण्णनानयो निट्ठितो।

९. चम्पेय्यक्खन्धको

कस्सपगोत्तभिक्खुवत्थुकथादिवण्णना

३८०. चम्पेय्यक्खन्धके **तन्तिबद्धो**ति तन्ति वुच्चति ब्यापारो, तत्थ बद्धो, उस्सुक्कं आपन्नोति अत्थो। तेनाह ''**तस्मिं आवासे**''तिआदि।

३८७-८. **हापनं वा अञ्ञथा करणं वा नत्थी**ति ञत्तिकम्मस्स ञत्तिया एकत्ता हापनं न सम्भवति, तस्सा एकत्ता एव पच्छा ञत्तिठपनवसेन, द्विक्खत्तुं ठपनवसेन च अञ्ञथा करणं नत्थि। **परतो**ति परिवारे। **त**न्ति पब्बाजनीयकम्मं, तस्साति अत्थो।

कस्सपगोत्तभिक्खुवत्थुकथादिवण्णना निट्ठिता।

द्वेनिस्सरणादिकथावण्णना

३९५. **एसा**ति ''बालो''तिआदिना निद्दिट्ठपुग्गलो, अप्पत्तोति सम्बन्धो। तत्थ कारणमाह ''**यस्मा**''तिआदि। तत्थ **आवेणिकेन लक्खणेना**ति पब्बाजनीयकम्मस्स निमित्तभावेन पाळियं वुत्तत्ता असाधारणभूतेन कुलदूसकभावेन। यदि हेस तं कम्मं अप्पत्तो, कथं पन सुनिस्सारितोति आह ''**यस्मा पनस्स आकङ्खमानो सङ्घो पब्बाजनीयकम्मं करेय्याति वुत्तं, तस्मा सुनिस्सारितो**''ति। **तत्थ वुत्त**न्ति कम्मक्खन्धके (चूळव॰ २७) वुत्तं।

एत्थ पन कुलदूसककम्मं कत्वा पब्बाजनीयकम्मकतस्स **तेरसककण्डकट्ठकथायं** ''यस्मिं विहारे वसन्तेन यस्मिं गामे कुलदूसककम्मं कतं होति, तस्मिं विहारे वा तस्मिं गामे वा न वसितब्ब''न्तिआदिना (पारा॰ अट्ठ॰ २.४३३) या सम्मावत्तना वुत्ता, सा इतरेनापि पूरेतब्बा। यं पन पटिप्पस्सद्धकम्मस्स कुलदूसकस्स तत्थेव **अट्ठकथायं** ''येसु कुलेसु कुलदूसककम्मं कतं, ततो पच्चया न गहेतब्बा''तिआदि वुत्तं, तं न पूरेतब्बं कुलसङ्गहस्स अकतत्ता। एवं सेसकम्मेसुपि। यदि एवं ''तज्जनीयकम्मारहस्स नियसकम्मं करोति...पे॰... एवं खो, उपालि, अधम्मकम्मं होती''तिआदिवचनं (महाव॰

४०२) विरुज्झतीति? न विरुज्झति सङ्घसन्निट्ठानवसेन तज्जनीयादिकम्मारहत्तस्स सिज्झनतो। यस्स हि सङ्घो ''तज्जनीयकम्मं करोमा''ति सन्निट्ठानं कत्वा कम्मवाचं सावेन्तो पब्बाजनीयकम्मवाचं सावेति, तस्स कम्मं अधम्मकम्मं होति। सचे पन ''तस्सेव पब्बाजनीयकम्ममेव करोमा''ति सन्निट्ठानं कत्वा तदेव करोति, तस्स तं कम्मं धम्मकम्मन्ति वेदितब्बं।

लभन्तीति तत्रवासिनो भिक्खू लभन्ति। **विजटेत्वा**ति ''एकेकस्स पहोनकप्पमाणेन वियोजेत्वा। **आवासेसु पक्खिपित्वा**ति ''इतो उप्पन्नं असुकस्मिं असुकस्मिञ्च आवासे वसन्ता पापेत्वा गण्हन्तू''ति वाचाय उपसंहरित्वा। **पविसितब्ब**न्ति महालाभे परिवेणे वसित्वाव लाभो गहेतब्बोति अधिप्पायो।

अयम्पीति एत्थ यो पंसुकूलिको पच्चयं विस्सज्जेति। तेनेव विस्सट्ठो अयं चीवरपच्चयोपीति योजना। **पादमूले ठपेत्वा साटकं देन्ती**ति पच्चयदायका देन्ति। एतेन गहट्ठेहि पादमूले ठपेत्वा दिन्नम्पि पंसुकूलिकानम्पि वट्टतीति दस्सेति। **अथ वस्सावासिकं देमाति वदन्ती**ति एत्थ पंसुकूलिकानं न वट्टतीति अज्झाहरित्वा योजेतब्बं। **वस्संवुत्थभिक्खून**न्ति पंसुकूलिकतो अञ्ञेसं भिक्खूनं।

उपनिबन्धित्वा गाहापेतब्बन्ति इध रुक्खादीसु वसित्वा चीवरं गण्हथाति पटिबन्धं कत्वा गाहेतब्बं।

पाटिपदअरुणतोतिआदि वस्सूपनायिकदिवसं सन्धाय वुत्तं। अन्तरामुत्तकं पन पाटिपदं अतिक्कमित्वापि गाहेतुं वट्टति। **निबद्धवत्तं ठपेत्वा**ति सज्झायमनसिकारादीसु निरन्तरकरणीयेसु कत्तब्बं कतिकवत्तं कत्वा। **कसावपरिभण्ड**न्ति कसावरसेहि भूमिपरिकम्मं।

तिविधम्पीति परियत्तिपटिपत्तिपटिवेधवसेन तिविधम्पि। **सोधेत्वा**ति आचारादीसु उपपरिक्खित्वा। **एकचारिकवत्त**न्ति भावनाकम्मं। तञ्हि गणसङ्गणिकं पहाय एकचारिकेनेव वत्तितब्बत्ता एवं वुत्तं। **दसवत्थुककथा** नाम अप्पिच्छकथा, सन्तुट्ठि, पविवेक, असंसग्ग, वीरियारम्भ, सील, समाधि, पञ्ञा, विमुत्ति, विमुत्तिञाणदस्सनकथाति इमा दस।

दन्तकट्ठखादनवत्तन्ति दन्तकट्ठमाळके निक्खित्तेसु दन्तकट्ठेसु ''दिवसे दिवसे एकमेव दन्तकट्ठं गहेतब्ब''न्तिआदिना (पारा० अट्ठ० १.१०९) अदिन्नादाने **दन्तपोनकथायं** वुत्तं वत्तं। **पत्तं वा…पे०… न कथेतब्ब**न्ति पत्तगुत्तत्थाय वुत्तं। **विसभागकथा**ति तिरच्छानकथा। **खन्धकवत्त**न्ति **वत्तक्खन्धके** (चूळव० ३६५) आगतं पिण्डचारिकवत्ततो अवसिट्ठवत्तं तस्स **''भिक्खाचारवत्त''**न्ति विसुं गहितत्ता।

इदानि यं दायका पच्छिमवस्संवुत्थानं वस्सावासिकं देन्ति, तत्थ पटिपज्जनविधिं दस्सेतुं **''पच्छिमवस्सूपनायिकदिवसे पना''**ति आरद्धं। आगन्तुको सचे भिक्खूति चीवरे गाहिते पच्छा आगतो आगन्तुको भिक्खु। **पत्तट्ठाने**ति वस्सग्गेन पत्तट्ठाने। **पठमवस्सूपगता**ति आगन्तुकस्स आगमनतो पुरेतरमेव पच्छिमिकाय वस्सूपनायिकाय वस्सूपगता। **लद्धं लद्ध**न्ति पुनप्पुनं दायकानं सन्तिका आगतागतसाटकं।

नेव वस्सावासिकस्स सामिनोति छिन्नवस्सत्ता वुत्तं। पठममेव कतिकाय कतत्ता **''नेव अदातुं लभन्ती''**ति वुत्तं, दातब्बं वारेन्तानं गीवा होतीति अधिप्पायो। **तेसमेव दातब्ब**न्ति वस्सूपगतेसु अलद्धवस्सावासिकानं एकच्चानमेव दातब्बं।

भतिनिविट्ठन्ति पानीयुपट्ठानादिभतिं कत्वा लद्धं। **सङ्घिकं पना**तिआदि केसञ्चि वाददस्सनं। तत्थ **अपलोकनकम्मं कत्वा गाहित**न्ति ''छिन्नवस्सानं वस्सावासिकञ्च इदानि उप्पज्जनकवस्सावासिकञ्च इमेसं दातुं रुच्चती''ति अनन्तरे वुत्तनयेन अपलोकनं कत्वा गाहितं सङ्घेन दिन्नत्ता विब्भन्तोपि लभति। पगेव छिन्नवस्सो। **पच्चयवसेन गाहितं** पन तेमासं वसित्वा गहेतुं अत्तना, दायकेहि च अनुमतत्ता भतिनिविट्ठम्पि छिन्नवस्सोपि विब्भन्तोपि **न लभती**ति केचि आचरिया वदन्ति। इदञ्च पच्छा वुत्तत्ता पमाणं। तेनेव वस्सूपनायिकदिवसे एव दायकेहि दिन्नवस्सावासिकं गहितभिक्खुनो वस्सच्छेदं अकत्वा वासोव हेट्ठा विहितो, न पानीयुपट्ठानादिभतिकरणवत्तं। यदि हि तं निविट्ठमेव सिया, भतिकरणमेव विधातब्बं। तस्मा वस्सग्गेन गाहितं छिन्नवस्सादयो न लभन्तीति वेदितब्बं।

''सङ्घिकं होती''ति एतेन वुत्थवस्सानम्पि वस्सावासिकभागो सङ्घिकतो अमोचितो तेसं विब्भमेन सङ्घिको होतीति दस्सेति। **लभती**ति ''मम पत्तभागं एतस्स देथा''ति दायके सम्पटिच्छापेन्तेनेव सङ्घिकतो वियोजितं होतीति वुत्तं।

वरभागं सामणेरस्साति तस्स पठमगाहत्ता, थेरेन पुब्बे पठमभागस्स गहितत्ता, इदानि गय्हमानस्स दुतियभागत्ता च वुत्तं।

सेनासनग्गाहकथावण्णना निट्ठिता।

उपनन्दवत्थुकथावण्णना

३१९. पाळियं **उभयत्थ परिबाहिरो**ति कमेन उभयस्सपि मुत्तत्ता वुत्तं, न सब्बथा उभयतो परिबाहिरत्ता। तेनाह **''पच्छिमे…पे०… तिट्ठती''**ति।

३२०. **यं तिण्णं पहोती**ति मञ्चपीठविनिमुत्तं यं आसनं तिण्णं सुखं निसीदितुं पहोति, इदं पच्छिमदीघासनं। एत्थ मञ्चपीठरहितेसु असमानासनिकापि तयो निसीदितुं लभन्ति। मञ्चपीठेसु पन द्वे। अदीघासनेसु मञ्चपीठेसु समानासनिका एव द्वे निसीदितुं लभन्ति दुवग्गस्सेव अनुञ्ञातत्ता।

हत्थिनखो हेट्ठाभागे एतस्स अत्थीति **हत्थिनखो,** पासादो। **पासादस्स नखो** नाम हेट्ठिमभागो पादनखसदिसत्ता, सो सब्बदिसासु अनेकेहि हत्थिरूपेहि समलङ्कतो ठितो। तस्सूपरि कतो पासादो हत्थिकुम्भे पतिट्ठितो विय होतीति आह **''हत्थिकुम्भे पतिट्ठित''**न्ति। **सुवण्णरजतादिविचित्रानी**ति सङ्घिकसेनासनं सन्धाय वुत्तं। पुग्गलिकं पन सुवण्णादिविचित्रं भिक्खुस्स सम्पटिच्छितुमेव न वट्टति ''न केनचि परियायेन जातरूपरजतं सादितब्ब''न्ति (महाव० २९९) वुत्तत्ता। तेनेवेत्थ **अट्ठकथायं** ''सङ्घिकविहारे वा पुग्गलिकविहारे वा''ति न वुत्तं, गोनकादिअकप्पियभण्डविसये एव वुत्तं एकभिक्खुस्सापि तेसं गहणे दोसाभावा। **गिहिविकटनीहारेना**ति गिहीहि कतनीहारेन, गिहीहि अत्तनो सन्तकं अत्थरित्वा दिन्ननियामेनाति अत्थो। **लब्भन्ती**ति निसीदितुं लब्भन्ति।

उपनन्दवत्थुकथावण्णना निट्ठिता।

अविस्सज्जियवत्थुकथावण्णना

३२१. **अरञ्जरो**ति बहुउदकगण्हनिका महाचाटि, जलं गण्हितुमलन्ति अरञ्जरो।

थावरेन च थावरन्तिआदीसु पञ्चसु कोट्ठासेसु पुरिमद्वयं थावरं, पच्छिमत्तयं गरुभण्डन्ति वेदितब्बं। **समकमेव देती**ति एत्थ ऊनकं देन्तम्पि विहारवत्थुसामन्तं गहेत्वा दूरतरं दुक्खगोपं विस्सज्जेतुं वट्टतीति दट्ठब्बं। वक्खति हि ''भिक्खूनं चे महग्घतरं…पे०… सम्पटिच्छितुं वट्टती''ति (चूळव० अट्ठ० ३२१)। **जानापेत्वा**ति भिक्खुसङ्घस्स जानापेत्वा, अपलोकेत्वाति अत्थो। **''ननु तुम्हाकं बहुतरा रुक्खाति वत्तब्ब''**न्ति इदं सामिकेसु अत्तनो भण्डस्स महग्घतं अजानित्वा देन्तेसु तं ञत्वा थेय्यचित्तेन गण्हतो अवहारो होतीति वुत्तं।

विहारेन विहारो परिवत्तेतब्बोति सवत्थुकेन अञ्ञेसं भूमियं कतपासादादिना, अवत्थुकेन वा सवत्थुकं परिवत्तेतब्बं। अवत्थुकं पन अवत्थुकेनेव परिवत्तेतब्बं। केवलं पासादस्स भूमितो अथावरत्ता। एवं थावरेसुपि थावरविभागं ञत्वाव परिवत्तेतब्बं।

''कप्पियमञ्चा सम्पटिच्छितब्बा''ति इमिना सुवण्णादिविचित्तं अकप्पियमञ्चं ''सङ्घस्सा''ति वुत्तेपि सम्पटिच्छितुं न वट्टतीति दस्सेति। ''विहारस्स देमा''ति वुत्ते सङ्घस्स वट्टति, न पुग्गलस्स खेत्तादि

वियाति दट्ठब्बं। **एतेसू**ति मञ्चादीसु। **कप्पियाकप्पियं वुत्तनयमेवा**ति आसन्दीतूलिकादिविनिच्छयेसु वुत्तनयमेव। **अकप्पियं वा**ति आसन्दीआदि, पमाणातिक्कन्तं बिम्बोहनादि च। **महग्घं कप्पियं वा**ति सुवण्णादिविचित्तं कप्पियवोहारेन दिन्नं।

''काळलोह...पे॰... भाजेतब्बो''ति वुत्तत्ता वट्टकंसलोहमयम्पि भाजनं पुग्गलिकम्पि सम्पटिच्छितुम्पि परिहरितुम्पि वट्टति पुग्गलपरिहरितब्बस्सेव भाजेतब्बत्ताति वदन्ति। तं उपरि ''कंसलोहवट्टलोहभाजनविकति सङ्घिकपरिभोगेन वा गिहिविकटा वा वट्टती''तिआदिकेन महापच्चरिवचनेन विरुज्झति। इमस्स हि ''वट्टलोहकंसलोहानं येन केनचि कतो सीहळदीपे पादग्गण्हनको भाजेतब्बो''ति वुत्तस्स महाअट्ठकथावचनस्स पटिक्खेपाय तं महापच्चरिवचनं पच्छा दस्सितं। तस्मा वट्टलोहकंसलोहमयं यं किञ्चि पादग्गण्हनकवारकम्पि उपादाय अभाजनीयमेव। गिहीहि दिय्यमानम्पि पुग्गलस्स सम्पटिच्छितुम्पि न वट्टति। **परिहारियं न वट्टती**ति पत्तादिपरिक्खारं विय सयमेव पटिसामेत्वा परिभुञ्जितुं न वट्टति। गिहिसन्तकं विय आरामिकादयो चे सयमेव गोपेत्वा विनियोगकाले आनेत्वा पटिनेन्ति, परिभुञ्जितुं वट्टति। ''पटिसामेत्वा भिक्खूनं देथा''ति वत्तुम्पि वट्टति।

पण्णसूचि नाम लेखनीति वदन्ति। **''अत्तना लद्धानिपी''**तिआदिना पटिग्गहणे दोसो नत्थि, परिहरित्वा परिभोगोव आपत्तिकरोति दस्सेति। यथा चेत्थ, एवं उपरि अभाजनीयवासिआदीसु अत्तनो सन्तकेसुपि।

अनामासम्पीति सुवण्णादिमयम्पि सब्बं तं आमसित्वापि परिभुञ्जितुं वट्टति। **उपक्खरे**ति उपकरणे। **अड्ढबाहुप्पमाणा** नाम अड्ढबाहुमत्ता। अड्ढब्याममत्तातिपि वदन्ति। **योत्तानी**ति चम्मरज्जुका।

अट्ठङ्गुलसूचिदण्डमत्तोपीति तसरदण्डादिसूचिआकारतनुदण्डकमत्तोपि। **रित्तपोत्थकोपी**ति अलिखितपोत्थको। इदञ्च पण्णप्पसङ्गेन वुत्तं।

''घट्टनफलकं घट्टनमुग्गरो''ति इदं रजितचीवरं एकस्मिं मट्ठे दण्डमुग्गरे वेठेत्वा एकस्स मट्ठफलकस्स उपरि ठपेत्वा उपरि अपरेन मट्ठफलकेन निकुज्जित्वा एको उपरि अक्कमित्वा तिट्ठति। द्वे जना उपरि फलकं द्वीसु कोटीसु गहेत्वा अपरापरं आकड्ढनविकड्ढनं करोन्ति, एतं सन्धाय वुत्तं। हत्थे ठपापेत्वा हत्थेन पहरणं पन निट्ठितरजनस्स चीवरस्स अल्लकाले कातब्बं। इदं पन फलकमुग्गरेहि घट्टनं सुक्खकाले थद्धभावविमोचनत्थन्ति दट्ठब्बं। **अम्बण**न्ति एकदोणिकनावाफलकेहि पोक्खरणीसदिसं कतं। पानीयभाजनन्तिपि वदन्ति। **रजनदोणी**ति एकदारुनाव कतं रजनभाजनं। **उदकदोणी**पि एकदारुनाव कतं उदकभाजनं।

भूमत्थरणं कातुं वट्टतीति अकप्पियचम्मं सन्धाय वुत्तं। तत्थ भूमत्थरणसङ्खेपेन सयितुम्पि वट्टतियेव। **''पच्चत्थरणगतिक''**न्ति इमिना मञ्चादीसु अत्थरितब्बं महाचम्मं एळकचम्मं नामाति दस्सेति।

छत्तमुट्ठिपण्णन्ति तालपण्णं सन्धाय वुत्तं। **पत्तकटाह**न्ति पत्तपचनकटाहं।

अविस्सज्जियवत्थुकथावण्णना निट्ठिता।

नवकम्मदानकथावण्णना

३२३. पाळियं **पिण्डनिक्खेपनमत्तेना**तिआदीसु खण्डफुल्लट्ठाने मत्तिकापिण्डट्ठपनं पिण्डनिक्खेपनं नाम। **नवकम्म**न्ति नवकम्मसम्मुति। **अग्गळवट्टि** नाम कवाटबन्धो। **छादनं** नाम तिणादीहि गेहच्छादनं। **बन्धनं** नाम दण्डवल्लिआदीहि छदनबन्धनमेव। **चतुहत्थविहारे**ति वित्थारप्पमाणतो वुत्तं। उब्बेधतो पन अनेकभूमकत्ता वड्ढकीहत्थेन वीसतिहत्थोपि नानासण्ठानविचित्तोपि होति। तेनस्स चतुवस्सिकं नवकम्मं वुत्तं। एवं सेसेसुपि।

पाळियं **सब्बे विहारे**ति भुम्मत्थे उपयोगबहुवचनं। एकस्स सब्बेसु विहारेसु नवकम्मं देतीति अत्थो। **सब्बकालं पटिबाहन्ती**ति नवकम्मिका अत्तनो गाहितं वरसेय्यं सम्पत्तानं यथावुड्ढं अकत्वा उतुकालेपि पटिबाहन्ति।

''सचे सो आवासो जीरती''तिआदि पाळिमुत्तकविनिच्छयो। **मञ्चट्ठानं दत्वा**ति मञ्चट्ठानं पुग्गलिकं दत्वा। **तिभाग**न्ति ततियभागं। एवं विस्सज्जनम्पि थावरेन थावरपरिवत्तनट्ठाने एव पविसति, न इतरथा सब्बसेनासनानं विनस्सनतो। **सचे सद्धिविहारिकानं दातुकामो होती**ति सचे सो सङ्घस्स भण्डकट्ठपनट्ठानं वा अञ्ञेसं भिक्खूनं वसनट्ठानं वा दातुं न इच्छति, अत्तनो सद्धिविहारिकानञ्ञेव दातुकामो होति, तादिसस्स तुय्हं पुग्गलिकमेव कत्वा जग्गाति न सब्बं तस्स दातब्बन्ति अधिप्पायो। तत्थ पन कत्तब्बविधिं दस्सेन्तो आह **''कम्म''**न्तिआदि। **एवञ्ही**तिआदिम्हि वयानुरूपं ततियभागे वा उपड्ढभागे वा गहिते तं भागं दातुं लभतीति अत्थो।

येनाति तेसु द्वीसु भिक्खूसु येन। **सो सामी**ति तस्सा भूमिया विहारकरणे सोव सामी, तं पटिबाहित्वा इतरेन न कातब्बन्ति अधिप्पायो। सो हि पठमं गहितो। **अकतट्ठाने**ति चयादीनं अकतपुब्बट्ठाने। **चयं वा पमुखं वा**ति सङ्घिकसेनासनं निस्साय ततो बहि चयं बन्धित्वा, एकं सेनासनं वा। **बहिकुट्टे**ति कुट्टतो बहि, अत्तनो कतट्ठानेति अत्थो।

नवकम्मदानकथावण्णना निट्ठिता।

अञ्ञत्रपरिभोगपटिक्खेपादिकथावण्णना

३२४. **वड्ढिकम्मत्थाया**ति यथा तम्मूलग्घतो न परिहायति, एवं कत्तब्बस्स एवं निप्फादेतब्बस्स मञ्चपीठादिनो अत्थाय।

चक्कलिकन्ति पादपुञ्छनत्थं चक्काकारेन कतं। **परिभण्डकतभूमि वा**ति काळवण्णादिकतसण्हभूमि वा। **सेनासनं वा**ति मञ्चपीठादि वा।

''तथेव वळञ्जेतुं वट्टती''ति इमिना नेवासिकेहि धोतपादादीहि वळञ्जनट्ठाने सञ्चिच्च अधोतपादादीहि वळञ्जन्तस्सेव आपत्ति पञ्ञत्ताति दस्सेति।

''द्वारम्पी''तिआदिना सामञ्ञतो वुत्तत्ता द्वारवातपानादयो अपरिकम्मकतापि न अपस्सयितब्बा। अजानित्वा अपस्सयन्तस्सपि इध लोमगणनाय आपत्ति।

अञ्ञत्रपरिभोगपटिक्खेपादिकथावण्णना निट्ठिता।

सङ्घभत्तादिअनुजाननकथावण्णना

३२५. **उद्देसभत्तं निमन्तनन्ति इमं वोहारं पत्तानी**ति एत्थ **इति**-सद्दो आदिअत्थो, उद्देसभत्तं निमन्तनन्तिआदिवोहारं पत्तानीति अत्थो। **तम्पी**ति सङ्घभत्तम्पि।

सङ्घभत्तादिअनुजाननकथावण्णना निट्ठिता।

उद्देसभत्तकथावण्णना

भोजनसालायाति भत्तुद्देसट्ठानं सन्धाय वुत्तं। **एकवळञ्जन्**ति एकद्वारेन वळञ्जितब्बं। **नानानिवेसनेसू**ति नानाकुलस्स नानूपचारेसु निवेसनेसु।

निसिन्नस्सपि निद्दायन्तस्सपीति अनादरे सामिवचनं, वुड्ढतरे निद्दायन्ते नवकस्स गाहितं सुग्गहितन्ति अत्थो।

विस्सट्ठदूतोति यथारुचि वत्तुं लभनतो निरासङ्कदूतो। **पुच्छासभागेना**ति पुच्छावचनपटिभागेन। ''एका कूटट्ठितिका नामा''ति वुत्तमेवत्थं विभावेतुं **''रञ्ञो वा ही''**तिआदि वुत्तं।

सब्बं पत्तस्सामिकस्स होतीति चीवरादिकम्पि सब्बं पत्तस्सामिकस्सेव होति, मया भत्तमेव सन्धाय वुत्तं, न चीवरादिन्ति वत्वा गहेतुं न वट्टतीति अत्थो।

अकतभागोनामाति आगन्तुकभागो नाम, अदिन्नपुब्बभागोति अत्थो।

किं आहरीयतीति अवत्वाति ''कतरभत्तं वा तया आहरीयती''ति दायकं अपुच्छित्वा। **पकतिट्ठितिकाया**ति उद्देसभत्तट्ठितिकाय।

उद्देसभत्तकथावण्णना निट्ठिता।

निमन्तनभत्तकथावण्णना

विच्छिन्दित्वाति ''भत्तं गण्हथा''ति पदं अवत्वा। तेनेवाह **''भत्तन्ति अवदन्तेना''**ति।

आलोपसङ्खेपेनाति एकेकपिण्डवसेन, एवञ्च भाजनं उद्देसभत्ते न वट्टति। तत्थ हि एकस्स पहोनकप्पमाणेनेव भाजेतब्बं।

आरुळ्हायेव मातिकं, सङ्घतो अट्ठ भिक्खूति एत्थ ये मातिकं आरुळ्हा, ते अट्ठ भिक्खूति योजेतब्बं। उद्देसभत्तनिमन्तनभत्तादिसङ्घिकभत्तमातिकासु निमन्तनभत्तमातिकाय ठितिवसेन आरुळ्हे भत्तुद्देसकेन वा सयं वा सङ्घतो उद्दिसापेत्वा गहेत्वा गन्तब्बं, न अत्तनो रुचिते गहेत्वाति अधिप्पायो। **मातिकं आरोपेत्वा**ति ''सङ्घतो गण्हामी''तिआदिना वुत्तमातिकाभेदं दायकस्स विञ्ञापेत्वाति अत्थो।

पटिबद्धकालतो पन पट्ठायाति तत्थेव वासस्स निबद्धकालतो पट्ठाय।

निमन्तनभत्तकथावण्णना निट्ठिता।

सलाकभत्तकथावण्णना

उपनिबन्धित्वाति लिखित्वा। **गामवसेनपी**ति येभुय्येन समलाभगामवसेनपि। **बहूनि सलाकभत्तानी**ति तिंसं वा चत्तारीसं वा भत्तानि। ''सचे होन्ती''ति अज्झाहरित्वा योजेतब्बं।

सल्लक्खेत्वाति तानि भत्तानि पमाणवसेन सल्लक्खेत्वा। **निग्गहेन दत्वा**ति दूरं गन्तुं अनिच्छन्तस्स निग्गहेन सम्पटिच्छापेत्वा दत्वा। **पुन विहारं आगन्त्वा**ति एत्थ विहारं अनागन्त्वा भत्तं गहेत्वा पच्छा विहारे अत्तनो पापेत्वा भुञ्जितुम्पि वट्टति।

एकगेहवसेनाति वीथियम्पि एकपस्से घरपाळिया वसेन। **उद्दिसित्वापी**ति असुककुले सलाकभत्तानि तुय्हं पापुणन्तीति वत्वा।

वारगामेति अतिदूरत्ता वारेन गन्तब्बगामे। **सट्ठितो वा पण्णासतो वा**ति दण्डकम्मत्थाय उदकघटं सन्धाय वुत्तं। **विहारवारो**ति सब्बभिक्खूसु भिक्खत्थाय गतेसु विहाररक्खणवारो।

तेसन्ति विहारवारिकानं। **फातिकम्ममेवा**ति विहाररक्खणकिच्चस्स पहोनकपटिपादनमेव। **एकस्सेव पापुणन्ती**ति दिवसे दिवसे एकेकस्सेव पापितानीति अत्थो।

रससलाकन्ति उच्छुरससलाकं। **''सलाकवसेन गाहितत्ता पन न सादितब्बा''**ति इदं असारुप्पवसेन वुत्तं, न धुतङ्गभेदवसेन। ''सङ्घतो निरामिससलाका…पे॰… वट्टतियेवा''ति (विसुद्धि॰ १.२६) हि **विसुद्धिमग्गे** वुत्तं। **अग्गभिक्खामत्तन्**ति एककटच्छुभिक्खामत्तं। **लद्धा वा अलद्धा वा स्वेपि गण्हेय्यासी**ति लद्धेपि अप्पमत्तताय वुत्तं। तेनाह **''यावदत्थं लभति…पे॰… अलभित्वा 'स्वे गण्हेय्यासी'ति वत्तब्बो''**ति।

तत्थाति तस्मिं दिसाभागे। **तं गहेत्वा**ति तं वारगामे सलाकं अत्तनो गहेत्वा। **तेना**ति दिसंगमिकतो अञ्ञेन तस्मिं दिसंगमिके। **देवसिकं पापेतब्बा**ति उपचारसीमाय ठितस्स यस्स कस्सचि वस्सग्गेन पापेतब्बा। एवं एतेसु अगतेसु आसन्नविहारे भिक्खूनं भुञ्जितुं वट्टति इतरथा सङ्घिकतो।

अम्हाकं गोचरगामेवाति सलाकभत्तदायकानं गामं सन्धाय वुत्तं। **विहारे थेरस्स पत्तसलाकभत्तन्**ति विहारे एकेकस्सेव ओहीनत्थेरस्स सब्बसलाकानं अत्तनो पापनवसेन पत्तसलाकभत्तं।

सलाकभत्तकथावण्णना निट्ठिता।

पक्खिकभत्तादिकथावण्णना

''स्वे पक्खो''ति अज्ज पक्खिकं न गाहेतब्बन्ति अट्ठमिया भुञ्जितब्बं सत्तमिया भुञ्जनत्थाय न गाहेतब्बं, दायकेहि नियमितदिवसेनेव गाहेतब्बन्ति अत्थो। तेनाह **''सचे पना''**तिआदि। **स्वे लूखन्**ति अज्ज आवाहमङ्गलादिकरणतो अतिपणीतभोजनं करीयति, स्वे तथा न भविस्सति, अज्जेव भिक्खू भोजेस्सामीति अधिप्पायो।

पक्खिकभत्ततो उपोसथिकस्स भेदं दस्सेन्तो आह **''उपोसथङ्गानि समादियित्वा''**तिआदि। **निबन्धापितन्**ति ''असुकविहारे आगन्तुका भुञ्जन्तू''ति नियमितं।

गमिको आगन्तुकभत्तम्पीति गामन्तरतो आगन्त्वा अवूपसन्तेन गमिकचित्तेन वसित्वा पुन अञ्ञत्थ गच्छन्तं सन्धाय वुत्तं। आवासिकस्स पन गन्तुकामस्स गमिकभत्तमेव लब्भति। **''लेसं ओड्डेत्वा''**ति वुत्तत्ता लेसाभावे याव गमनपरिबन्धो विगच्छति, ताव भुञ्जितुं वट्टतीति ञापितन्ति दट्ठब्बं।

तण्डुलादीनि पेसेन्ति…पे॰… वट्टतीति अभिहटभिक्खत्ता वट्टति। **तथा पटिग्गहितत्ता**ति भिक्खानामेन पटिग्गहितत्ता।

अविभत्तं सङ्घिकं भण्डन्ति कुक्कुच्चुप्पत्तिआकारदस्सनं। एवं कुक्कुच्चं कत्वा पुच्छितब्बकिच्चं नत्थि, अपुच्छित्वा दातब्बन्ति अधिप्पायो।

पक्खिकभत्तादिकथावण्णना निट्ठिता।

सेनासनक्खन्धकवण्णनानयो निट्ठितो।

७. सङ्घभेदकक्खन्धको

छसक्यपब्बज्जाकथादिवण्णना

३३०. सङ्घभेदकक्खन्धके पाळियं **अनुपियं नामा**ति अनुपिया नाम। **हेट्ठा पासादा**ति पासादतो हेट्ठा हेट्ठिमतलं, ''हेट्ठापासाद''न्तिपि पाठो। **अभिनेतब्ब**न्ति वपितखेत्तेसु पवेसेतब्बं। **निन्नेतब्ब**न्ति ततो नीहरितब्बं। **निद्धापेतब्ब**न्ति सस्सदूसकतिणादीनि उद्धरितब्बं। **उजुं कारापेतब्ब**न्ति पुञ्जं कारापेतब्बं, अयमेव वा पाठो।

३३२. **परदत्तो**ति परेहि दिन्नपच्चयेहि पवत्तमानो। **मिगभूतेन चेतसा**ति कत्थचि अलग्गताय मिगस्स विय जातेन चित्तेन।

३३३. **मनोमयं काय**न्ति झानमनेन निब्बत्तं ब्रह्मकायं, ''किं नु खो अहं पसादेय्यं, यस्मिं मे पसन्ने बहुलाभसक्कारो उप्पज्जेय्या''ति पठमं उप्पन्नपरिवितक्कस्स मन्दपरियुट्ठानताय देवदत्तस्स तस्मिं खणे झानपरिहानि नाहोसि, पच्छा एव अहोसीति दट्ठब्बं। तेनाह **''सह चित्तुप्पादा''**तिआदि। **द्वे वा तीणि वा मागधकानि गामखेत्तानी**ति एत्थ मगधरट्ठे खुद्दकं गामखेत्तं गावुतमत्तं, मज्झिमं पन दियड्ढगावुतमत्तं, महन्तं अनेकयोजनम्पि होति। तेसु मज्झिमेन गामखेत्तेन द्वे वा खुद्दकेन तीणि वा गामखेत्तानि, तस्स सरीरं तिगावुतप्पमाणो अत्तभावोति वुत्तं होति।

३३४. **सत्थारो**ति गणसत्थारो। **नास्सस्सा**ति न एतस्स भवेय्य। **त**न्ति सत्थारं। **तेना**ति अमनापेन। **सम्मन्नती**ति चीवरादिना अम्हाकं सम्मानं करोति, परेहि वा अयं सत्था सम्मानीयतीति अत्थो।

३३५. **नासाय पित्तं भिन्देय्यु**न्ति अच्छपित्तं वा मच्छपित्तं वा नासापुटे पक्खिपेय्युं। **अस्सतरी**ति वळवाय कुच्छिस्मिं गद्रभस्स जाता। तस्सा हि गहितगब्भाय विजायितुमसक्कोन्तिया उदरं फालेत्वा पोतकं नीहरन्ति। तेनाह **''अत्तवधाय गब्भं गण्हाती''**ति।

३३९. **पोत्थनिक**न्ति छुरिकं, ''खर''न्तिपि वुच्चति।

३४२. **मा कुञ्जर नागमासदो**ति हे कुञ्जर बुद्धनागं वधकचित्तेन मा उपगच्छ। **दुक्ख**न्ति दुक्खकारणत्ता दुक्खं। **इतो**ति इतो जातितो। **यतो**ति यस्मा, यन्तस्स वा, गच्छन्तस्साति अत्थो। **मा च मदो**ति मदो तया न कातब्बोति अत्थो।

३४३. **तिकभोजन**न्ति तीहि भुञ्जितब्बं भोजनं, ततो अधिकेहि एकतो पटिग्गहेत्वा भुञ्जितुं न वट्टनकं गणभोजनपटिपक्खं भोजनन्ति अत्थो। **कोकालिको**तिआदीनि देवदत्तपरिसाय गणपामोक्खानं नामानि। **कप्प**न्ति महानिरये आयुकप्पं, तं अन्तरकप्पन्ति केचि। केचि पन ''असङ्ख्येय्यकप्प''न्ति।

छसक्यपब्बज्जाकथादिवण्णना निट्ठिता।

सङ्घभेदककथावण्णना

३४५. परस्स चित्तं ञत्वा कथनं **आदेसनापाटिहारियं**। केवलं धम्मदेसना **अनुसासनीपाटिहारियं**। तदुभयम्पि **धम्मी कथा** नाम। ताय थेरो ओवदि। इद्धिविधं **इद्धिपाटिहारियं** नाम। तेन सहिता अनुसासनी एव **धम्मी कथा**। ताय थेरो ओवदि।

''थुल्लच्चयं देसापेही''ति इदं भेदपुरेक्खारस्स उपोसथादिकरणे थुल्लच्चयस्स उपोसथक्खन्धकादीसु पठममेव पञ्ञत्तत्ता वुत्तं, इतरथा एतेसं आदिकम्मिकत्ता अनापत्तियेव सिया।

३४६. **सरसी**ति सरो। **महिं विकुब्बतो**ति महिं दन्तेहि विलिखन्तस्स। इदञ्च हत्थीनं सभावदस्सनं। **नदीसू**ति सरेसु। भिसं घसमानस्साति योजना। **जग्गतो**ति यूथं पालेन्तस्स।

३४७. **दूतेय्यं गन्तु**न्ति दूतकम्मं पत्तुं, दूतकम्मं कातुन्ति अत्थो। **सहितासहितस्सा**ति युत्तायुत्तस्स, यं वत्तुं, कातुञ्च युत्तं, तत्थ कुसलो। अथ वा अधिप्पेतानाधिप्पेतस्स वचनस्स कुसलो, ब्यञ्जनमत्ते न तिट्ठति, अधिप्पेतत्थमेव आरोचेतीति अत्थो।

३५०. गाथासु **जातू**ति एकंसेन। **मा उदपज्जथ** मा होतूति अत्थो। **पापिच्छानं यथागती**ति पापिच्छानं पुग्गलानं यादिसी गति अभिसम्परायो। **तं** अत्थजातं। **इमिनापि** कारणेन **जानाथा**ति देवदत्तस्स ''पण्डितो''तिआदिना उपरि वक्खमानाकारं दस्सेति।

पमादं अनुचिण्णोति पमादं आपन्नो। **आसीसाय**न्ति अवस्संभावीअत्थसिद्धियं। सा हि इध आसीसाति अधिप्पेता, न पत्थना। ईदिसे अनागतत्थे अतीतवचनं सद्दविदू इच्छन्ति।

दुब्भेति दुब्भेय्य। **विसकुम्भेना**ति एकेन विसपुण्णकुम्भेन। **सो**ति सो पुग्गलो। **न पदूसेय्य** विसमिस्सं कातुं न सक्कोतीति अत्थो। **भयानको**ति विपुलगम्भीरभावेन भयानको। तेनापि दूसेतुं न सक्कुणेय्यतं दस्सेति। **वादेना**ति दोसकथनेन। **उपहिंसती**ति बाधति।

सङ्घभेदककथावण्णना निट्ठिता।

उपालिपञ्हाकथावण्णना

३५१. **न पन एत्तावता सङ्घो भिन्नो होती**ति सलाकग्गाहापनमत्तेन सङ्घभेदानिब्बत्तितो वुत्तं। उपोसथादिसङ्घकम्मे कते एव हि सङ्घो भिन्नो होति। तत्थ च उपोसथपवारणासु ञत्तिनिट्ठानेन, सेसकम्मेसु अपलोकनादिकम्मपरियोसानेन सङ्घभेदो समत्थोति दट्ठब्बो।

''अभब्बता न वुत्ता''ति इदं ''भिक्खवे, देवदत्तेन पठमं आनन्तरियकम्मं उपचित''न्तिआदिना आनन्तरियत्तं वदता भगवता तस्स अभब्बतासङ्खाता पाराजिकता न पञ्ञत्ता। एतेन आपत्ति विय अभब्बतापि पञ्ञत्तिअनन्तरमेव होति, न ततो पुरेति दस्सेति। इध पन आदिकम्मिकस्सपि अनापत्तिया अवुत्तत्ता देवदत्तादयोपि न मुत्ताति दट्ठब्बं।

तयो सतिपट्ठानातिआदीसु तयो एव सतिपट्ठाना, न ततो परन्ति एकस्स सतिपट्ठानस्स पटिक्खेपोव इध **अधम्मो,** न पन तिण्णं सतिपट्ठानत्तविधानं तस्स धम्मत्ता। एवं सेसेसुपि हापनकोट्ठासेसु। वड्ढनेसु पन **छ इन्द्रियानी**ति अनिन्द्रियस्सपि एकस्स इन्द्रियत्तविधानमेव **अधम्मो**। एवं सेसेसुपि। न केवलञ्च एतेव, ''चत्तारो खन्धा, तेरसायतनानी''तिआदिना यत्थ कत्थचि विपरीततो पकासनं सब्बं **अधम्मो**। याथावतो पकासनञ्च सब्बं **धम्मो**ति दट्ठब्बं। **पकासन**न्ति चेत्थ तथा तथा कायवचीपयोगसमुट्ठापिका अरूपक्खन्धाव अधिप्पेता, एवमेत्थ दसकुसलकम्मपथादीसु अनवज्जट्ठेन सरूपतो धम्मेसु, अकुसलकम्मपथादीसु सावज्जट्ठेन सरूपतो अधम्मेसु च तदञ्ञेसु च अब्याकतेसु यस्स कस्सचि कोट्ठासस्स भगवता पञ्ञत्तक्कमेनेव पकासनं ''धम्मो''ति च विपरीततो पकासनं ''अधम्मो''ति च दस्सितन्ति दट्ठब्बं। कामञ्चेत्थ विनयादयोपि यथाभूततो, अयथाभूततो च पकासनवसेन धम्माधम्मेसु एव पविसन्ति, विनयादिनामेन पन विसेसेत्वा विसुं गहितत्ता तदवसेसमेव धम्माधम्मकोट्ठासे

पविसतीति दट्ठब्बं।

इमं अधम्मं धम्मोति करिस्सामातिआदि धम्मञ्च अधम्मञ्च याथावतो ञत्वाव पापिच्छं निस्साय विपरीततो पकासेन्तस्सेव सङ्घभेदो होति, न पन तथासञ्ञाय पकासेन्तस्साति दस्सनत्थं वुत्तं। एस नयो ''अविनयं विनयोति दीपेन्ती''तिआदीसुपि। तत्थ **निय्यानिक**न्ति उक्कट्ठन्ति अत्थो। **''तथेवा''**ति इमिना ''एवं अम्हाकं आचरियकुल''न्तिआदिना वुत्तमत्थं आकड्ढति।

संवरो पहानं पटिसङ्खाति संवरविनयो, पहानविनयो, पटिसङ्खाविनयो च वुत्तो। तेनाह **''अयं विनयो''**ति। ''पञ्ञत्तं अपञ्ञत्त''न्ति दुकं ''भासितं अभासित''न्ति दुकेन अत्थतो समानमेव, तथा दुट्ठुल्लदुकं गरुकदुकेन। तेनेव तेसं **''चत्तारो सतिपट्ठाना...पे०... इदं अपञ्ञत्तं नामा''**तिआदिना सदिसनिद्देसो कतो। **सावसेसापत्ति**न्ति अवसेससीलेहि सहितापत्तिं। नत्थि एतिस्सं आपन्नायं सीलावसेसाति **अनवसेसापत्ति**।

३५४. पाळियं **समग्गानञ्च अनुग्गहो**ति यथा समग्गानं सामग्गी न भिज्जति, एवं अनुग्गहणं अनुबलप्पदानं।

३५५. **सिया नु खो**ति सम्भवेय्य नु खो। **तस्मिं अधम्मदिट्ठी**ति अत्तनो ''अधम्मं धम्मो''ति एतस्मिं दीपने अयुत्तदिट्ठि। **भेदे अधम्मदिट्ठी**ति ''अधम्मं धम्मो''ति दीपेत्वा अनुस्सावनसलाकग्गाहापनादिना अत्तानं मुञ्चित्वा चतुवग्गादिकं सङ्घं एकसीमायमेव ठितंतो चतुवग्गादिसङ्घतो वियोजेत्वा एककम्मादिनिप्फादनवसेन सङ्घभेदकरणे अधम्मदिट्ठिको हुत्वाति अत्थो। **विनिधाय दिट्ठि**न्ति या तस्मिं ''अधम्मं धम्मो''ति दीपने अत्तनो अधम्मदिट्ठि उप्पज्जति, तं विनिधाय पटिच्छादेत्वा ''धम्मो एवाय''न्ति विपरीततो पकासेत्वाति अत्थो। एवं सब्बत्थ अत्थो वेदितब्बो।

भेदे धम्मदिट्ठीति यथावुत्तनयेन सङ्घभेदने दोसो नत्थीति लद्धिको। अयं पन ''अधम्मं धम्मो''ति दीपने अधम्मदिट्ठिको हुत्वापि तं दिट्ठिं विनिधाय करणेन सङ्घभेदको अतेकिच्छो जातो। **एवं भेदे वेमतिको**ति इमस्स पन भेदे वेमतिकदिट्ठिया विनिधानम्पि अत्थि। सेसं सममेव। **तस्मिं धम्मदिट्ठिभेदे अधम्मदिट्ठी**ति अयं पन भेदे अधम्मदिट्ठिं विनिधाय कतत्ता सङ्घभेदको अतेकिच्छो जातो। सुक्कपक्खे पन सब्बत्थ ''अधम्मं धम्मो''तिआदिदीपने वा भेदे वा धम्मदिट्ठिताय दिट्ठिं अविनिधायेव कतत्ता सङ्घभेदकोपि सतेकिच्छो जातो। तस्मा ''अधम्मं धम्मो''तिआदिदीपने वा सङ्घभेदे वा उभोसुपि वा अधम्मदिट्ठि वा वेमतिको वा हुत्वा तं दिट्ठिं, विमतिञ्च विनिधाय ''धम्मो''ति पकासेत्वा वुत्तनयेन सङ्घभेदं करोन्तस्सेव आनन्तरियं होतीति वेदितब्बं।

उपालिपञ्हाकथावण्णना निट्ठिता।

सङ्घभेदकक्खन्धकवण्णनानयो निट्ठितो।

८. वत्तक्खन्धको

आगन्तुकवत्तकथावण्णना

३५७. वत्तक्खन्धके **पत्थरितब्ब**न्ति आतपे पत्थरितब्बं। पाळियं **अभिवादापेतब्बो**ति वन्दनत्थाय वस्सं पुच्छनेन नवको सयमेव वन्दतीति वुत्तं। **निल्लोकेतब्बो**ति ओलोकेतब्बो।

आगन्तुकवत्तकथावण्णना निट्ठिता।

आवासिकवत्तकथावण्णना

३५९. ''यथाभाग''न्ति ठपितट्ठानं अनतिक्कमित्वा मञ्चपीठादिं पप्फोटेत्वा पत्थरित्वा उपरि पच्चत्थरणं दत्वा दानम्पि सेनासनपञ्ञापनमेवाति दस्सेन्तो आह **''पप्फोटेत्वा हि पत्थरितुं पन वट्टतियेवा''**ति।

आवासिकवत्तकथावण्णना निट्ठिता।

अनुमोदनवत्तकथावण्णना

३६२. **पञ्चमे निसिन्ने**ति अनुमोदनत्थाय निसिन्ने। **न महाथेरस्स भारो होती**ति अनुमोदकं आगमेतुं न भारो। **अज्झिट्ठोव आगमेतब्बो**ति अत्तना अज्झिट्ठेहि भिक्खूहि अनुमोदन्तेयेव निसीदितब्बन्ति अत्थो।

अनुमोदनवत्तकथावण्णना निट्ठिता।

भत्तग्गवत्तकथावण्णना

३६४. **मनुस्सानं परिविसनट्ठान**न्ति यत्थ अन्तोविहारेपि मनुस्सा सपुत्तदारा आवसित्वा भिक्खू नेत्वा भोजेन्ति। **आसनेसु सती**ति निसीदनट्ठानेसु सन्तेसु। **इदं, भन्ते, आसनं उच्च**न्ति आसन्ने समभूमिभागे पञ्ञत्तं थेरासनेन समकं आसनं सन्धाय वुत्तं, थेरासनतो पन उच्चतरे आपुच्छित्वापि निसीदितुं न वट्टति। यदि तं आसन्नम्पि नीचतरं होति, अनापुच्छापि निसीदितुं वट्टति। **महाथेरस्सेव आपत्ती**ति आसनेन पटिबाहनापत्तिया आपत्ति। **अवत्थरित्वा**ति पारुतसङ्घाटिं अवत्थरित्वा, अनुक्खिपित्वाति अत्थो।

पाळियं **''उभोहि हत्थेहि...पे०... ओदनो पटिग्गहेतब्बो''**ति इदं हत्थतले वा पच्छिपिट्ठिआदिदुस्सण्ठिताधारे वा पत्तं ठपेत्वा ओदनस्स गहणकाले पत्तस्स अपतनत्थाय वुत्तं, सुसज्जिते पन आधारे पत्तं ठपेत्वा एकेन हत्थेन तं परामसित्वापि ओदनं पटिग्गहेतुं वट्टति एव। **उभोहि हत्थेहि...पे०... उदकं पटिग्गहेतब्ब**न्ति एत्थापि एसेव नयो।

हत्थधोवनउदकन्ति भोजनावसाने उदकं। तेनाह **''पानीयं पिवित्वा हत्था धोवितब्बा''**ति। तेन परियोसाने धोवनमेव पटिक्खित्तं, भोजनन्तरे पन पानीयपिवनादिना नयेन हत्थं धोवित्वा पुन भुञ्जितुं वट्टतीति दस्सेति। पोत्थकेसु पन ''पानीयं पिवित्वा हत्था न धोवितब्बा''ति लिखन्ति, तं पुरिमवचनेन न समेति परियोसाने उदकस्सेव ''हत्थधोवनउदक''न्ति वुत्तत्ता। **सचे मनुस्सा धोवथ, भन्ते**तिआदि निट्ठितभत्तं निसिन्नं थेरं सन्धाय वुत्तं। **धुरे** द्वारसमीपे।

भत्तग्गवत्तकथावण्णना निट्ठिता।

पिण्डचारिकवत्तकथादिवण्णना

३६६. पाळियं **ठापेति वा**ति तिट्ठ भन्तेति वदन्ति।

३६७. **अत्थि, भन्ते, नक्खत्तपदानी**ति नक्खत्तपदविसयानि ञातानि अत्थि, अस्सयुजादिनक्खत्तं जानाथाति अधिप्पायो। तेनाह **''न जानाम, आवुसो''**ति। **अत्थि, भन्ते, दिसाभाग**न्ति एत्थापि

एसेव नयो। **केनज्ज, भन्ते, युत्त**न्ति केन नक्खत्तेन चन्दो युत्तोति अत्थो।

३६९. **अङ्गणे**ति अब्भोकासे। **एवमेव पटिपज्जितब्ब**न्ति उद्देसदानादि आपुच्छितब्बन्ति दस्सेति।

३७४. **निबद्धगमनत्थाया**ति अत्तनोव निरन्तरगमनत्थाय। ऊहदितााति एत्थ हद-धातुस्स वच्चविस्सज्जनत्थतायाह **''बहि वच्चमक्खिता''**ति।

पिण्डचारिकवत्तकथादिवण्णना निट्ठिता।

वत्तक्खन्धकवण्णनानयो निट्ठितो।

९. पातिमोक्खट्ठपनक्खन्धको

पातिमोक्खुद्देसयाचनकथावण्णना

३८३. पातिमोक्खट्ठपनक्खन्धके पाळियं **नन्दिमुखिया**ति ओदातदिसामुखताय तुट्ठमुखिया। ''उद्धस्तं अरुण''न्ति वत्वापि ''उद्दिसतु, भन्ते, भगवा''ति पातिमोक्खुद्देसयाचनं अनुपोसथे उपोसथकरणपटिक्खेपस्स सिक्खापदस्स अपञ्ञत्तत्ता थेरेन कतन्ति दट्ठब्बं। कस्मा पन भगवा एवं तुण्हीभूतोव तियामरत्तिं वीतिनामेसीति? अपरिसुद्धाय परिसाय उपोसथादिसंवासकरणस्स सावज्जतं भिक्खुसङ्घे पाकटं कातुं, तञ्च आयतिं भिक्खूनं तथापटिपज्जनत्थं सिक्खापदं ञापेतुं। केचि पनेत्थ ''अपरिसुद्धम्पि पुग्गलं तस्स सम्मुखा 'अपरिसुद्धो'ति वत्तुं महाकरुणाय अविसहन्तो भगवा तथा निसीदी''ति कारणं वदन्ति। तं अकारणं पच्छापि अवत्तब्बतो, महामोग्गल्लानत्थेरेनापि तं बाहायं गहेत्वा बहि नीहरणस्स अकत्तब्बतापसङ्गतो। तस्मा यथावुत्तमेवेत्थ कारणन्ति। तेनेव ''अट्ठानमेतं, भिक्खवे, अनवकासो, यं तथागतो अपरिसुद्धाय परिसाय उपोसथं करेय्य, पातिमोक्खं उद्दिसेय्या''ति (अ० नि० ८.२०; चूळव० ३८६; उदा० ४५) वत्वा ''न च, भिक्खवे, सापत्तिकेन पातिमोक्खं सोतब्ब''न्तिआदिना (चूळव० ३८६) सापत्तिकपरिसाय कत्तब्बविधि दस्सितो।

सङ्कस्सरसमाचारन्ति किञ्चिदेव असारुप्पं दिस्वा ''इदं इमिना कतं भविस्सती''ति परेहि सङ्काय सरितब्बसमाचारं, अत्तना वा ''मम अनाचारं एते जानन्ती''ति सङ्काय सरितब्बसमाचारं। समणवेसधारणेन, सङ्घिकपच्चयभागगहणादिना च जीविकं कप्पेन्तो ''अहं समणो''ति पटिञ्ञं अदेन्तोपि अत्थतो देन्तो विय होतीति **''समणपटिञ्ञं ब्रह्मचारिपटिञ्ञ''**न्ति वुत्तं। **अवस्सुत**न्ति किलेसावस्सनेन तिन्तं। सञ्जातदुस्सिल्यकचवरत्ता **कसम्बुजातं**, असारताय वा कसम्बु विय जातं। **बहिद्वारकोट्ठका निक्खामेत्वा**ति द्वारसालतो बहि निक्खमापेत्वा।

३८४. **महासमुद्दे अभिरमन्ती**ति बहुसो दस्सनपविसनादिना महासमुद्दे अभिरतिं विन्दन्ति। **न आयतकेनेव पपातो**ति छिन्नतटमहासोब्भो विय न आदितोव निन्नोति अत्थो। **ठितधम्मो**ति अवट्ठितसभावो। **पूरत्त**न्ति पुण्णत्तं। **नागा**ति सप्पजातिका।

पातिमोक्खुद्देसयाचनकथावण्णना निट्ठिता।

पातिमोक्खसवनारहकथादिवण्णना

३८६. **उदाहरितब्ब**न्ति पाळिया अवत्वा तमत्थं याय कायचि भासाय उदाहटम्पि उदाहटमेवाति दट्ठब्बं।

पुरे वा पच्छा वाति ञत्तिआरम्भतो पुब्बे वा ञत्तिनिट्ठानतो पच्छा वा।

३८७. **कतञ्च अकतञ्च उभयं गहेत्वा**ति यस्स कतापि अत्थि अकतापि। तस्स तदुभयं गहेत्वा। **धम्मिकं सामग्गि**न्ति धम्मिकं समग्गकम्मं। **पच्चादियती**ति उक्कोटनाधिप्पायेन पुन कातुं आदियति।

३८८. **आकारादिसञ्ञा वेदितब्बा**ति आकारलिङ्गनिमित्तनामानि वुत्तानीति वेदितब्बानि।

पातिमोक्खसवनारहकथादिवण्णना निट्ठिता।

अत्तादानअङ्गकथादिवण्णना

३९८. पुन चोदेतुं अत्तना आदातब्बं गहेतब्बं अधिकरणं अत्तादानन्ति आह **''सासनं सोधेतुकामो''**तिआदि। **वस्सारत्तो**ति वस्सकालो। सोपि हि दुब्भिक्खादिकालो विय अधिकरणवूपसमत्थं लज्जिपरिसाय दूरतो आनयनस्स, आगतानञ्च पिण्डाय चरणादिसमाचारस्स दुक्करत्ता अकालो एव।

समनुस्सरणकरणन्ति अनुस्सरितानुस्सरितक्खणे पीतिपामोज्जजननतो अनुस्सरणुप्पादकं। **विगतूपक्किलेस...पे०... संवत्तती**ति एत्थ यथा अब्भमहिमादिउपक्किलेसविरहितानं चन्दिमसूरियानं सस्सिरीकता होति, एवमस्सापि चोदकस्स पापपुग्गलूपक्किलेसविगमेन सस्सिरीकता होतीति अधिप्पायो।

३९९. **अधिगतं मेत्तचित्त**न्ति अप्पनाप्पत्तं मेत्तझानं।

४००-१. ''दोसन्तरो''ति एत्थ अन्तर-सद्दो चित्तपरियायोति आह **''न दुट्ठचित्तो हुत्वा''**ति।

कारुञ्ञं नाम करुणा एवाति आह **''कारुञ्ञताति करुणाभावो''**ति। **करुण**न्ति अप्पनाप्पत्तं वदति। तथा **मेत्त**न्ति।

अत्तादानअङ्गकथादिवण्णना निट्ठिता।

पातिमोक्खट्ठपनक्खन्धकवण्णनानयो निट्ठितो।

१०. भिक्खुनिक्खन्धको

महापजापतिगोतमीवत्थुकथावण्णना

४०३. भिक्खुनिक्खन्धके **''मातुगामस्स पब्बजितत्ता''**ति इदं पञ्चवस्ससततो उद्धं सद्धम्मस्स अप्पवत्तनकारणदस्सनं। **सुक्खविपस्सकखीणासववसेन वस्ससहस्स**न्तिआदि **खन्धकभाणकानं**

मतं गहेत्वा वुत्तं। **दीघनिकायट्ठकथायं** पन ''पटिसम्भिदाप्पत्तेहि वस्ससहस्सं अट्ठासि, छळभिञ्ञेहि वस्ससहस्सं, तेविज्जेहि वस्ससहस्सं, सुक्खविपस्सकेहि वस्ससहस्सं, पातिमोक्खेहि वस्ससहस्सं अट्ठासी''ति (दी॰ नि॰ अट्ठ॰ ३.१६१) वुत्तं। **अङ्गुत्तर** (अ॰ नि॰ अट्ठ॰ ३.८.५१) -**संयुत्तट्ठकथासु**पि (सं॰ नि॰ अट्ठ॰ २.२.१५६) अञ्ञथाव वुत्तं, तं सब्बं अञ्ञमञ्ञविरुद्धम्पि तंतंभाणकानं मतेन लिखितसीहळट्ठकथासु आगतनयमेव गहेत्वा आचरियेन लिखितं ईदिसे कथाविरोधे सासनपरिहानिया अभावतो, सोधनुपायाभावा च। परमत्थविरोधो एव हि सुत्तादिनयेन सोधनीयो, न कथामग्गविरोधोति।

महापजापतिगोतमीवत्थुकथावण्णना निट्ठिता।

भिक्खुनीउपसम्पदानुजाननकथावण्णना

४०४-८. पाळियं **यदग्गेना**ति यस्मिं दिवसे। **तदा**ति तस्मिंयेव दिवसे। **विमानेत्वा**ति अवमानं कत्वा।

४१०-१. **आपत्तिगामिनियो**ति आपत्तिं आपन्नायो। **कम्मविभङ्गे**ति परिवारे कम्मविभङ्गे (परि॰ ४८२ आदयो)।

४१३-५. पाळियं **द्वे तिस्सो भिक्खुनियो**ति द्वीहि तीहि भिक्खुनीहि। **न आरोचेन्ती**ति पातिमोक्खुद्देसकस्स न आरोचेन्ति।

४१६. **दुस्सवेणिया**ति अनेकदुस्सपट्टे एकतो कत्वा कतवेणिया।

४१७. **विसेसक**न्ति पत्तलेखादिवण्णविसेसं। **पकिणन्ती**ति विक्किणन्ति। **नमनक**न्ति पासुकट्ठिनमनकबन्धनं।

४२२-५. **संवेल्लिय**न्ति कच्छं बन्धित्वा निवासनं। **तयो निस्सये**ति रुक्खमूलसेनासनस्स तासं अलब्भनतो वुत्तं।

४२६-८. **अट्ठेव भिक्खुनियो यथावुड्ढं पटिबाहन्ती**ति अट्ठ भिक्खुनियो वुड्ढपटिपाटियाव गण्हन्तियो आगतपटिपाटिं पटिबाहन्ति, नाञ्ञाति अत्थो। **अनुवादं पट्ठपेन्ती**ति इस्सरियं पवत्तेन्तीति अत्थं वदन्ति।

४३०. **भिक्खुदूतेना**ति भिक्खुना दूतभूतेन। **सिक्खमानदूतेना**ति सिक्खमानाय दूताय।

४३१. **न सम्मती**ति नप्पहोति। **नवकम्म**न्ति ''नवकम्मं कत्वा वसतू''ति अपलोकेत्वा सङ्घिकभूमिया ओकासदानं।

४३२-६. **सन्निसिन्नगब्भा**ति दुविञ्ञेय्यगब्भा। **महिलातित्थे**ति इत्थीनं साधारणतित्थे।

भिक्खुनीउपसम्पदानुजाननकथावण्णना निट्ठिता।

भिक्खुनिक्खन्धकवण्णनानयो निट्ठितो।

११. पञ्चसतिकक्खन्धको

खुद्दानुखुद्दकसिक्खापदकथावण्णना

४३७. पञ्चसतिकक्खन्धके पाळियं **''अपावुसो, अम्हाकं सत्थारं जानासी''**ति इदं थेरो सयं भगवतो परिनिब्बुतभावं जानन्तोपि अत्तना सहगतभिक्खुपरिसाय ञापनत्थमेव, सुभद्दस्स वुड्ढपब्बजितस्स सासनस्स पटिपक्खवचनं भिक्खूनं विञ्ञापनत्थञ्च एवं पुच्छि। सुभद्दो हि कुसिनारायं भगवति अभिप्पसन्नाय खत्तियादिगहट्ठपरिसाय मज्झे भगवतो परिनिब्बानं सुत्वा हट्ठपहट्ठोपि भयेन पहट्ठाकारं वाचाय पकासेतुं न सक्खिस्सति, इधेव पन विजनपदेसे सुत्वा यथाज्झासयं अत्तनो पापलद्धिं पकासेस्सति, ततो तमेव पच्चयं दस्सेत्वा भिक्खू समुस्साहेत्वा धम्मविनयसङ्गहं कारेत्वा एतस्स पापभिक्खुस्स, अञ्ञेसञ्च ईदिसानं मनोरथविघातं, सासनट्ठितिञ्च करिस्सामीति जानन्तोव तं पुच्छीति वेदितब्बं। तेनेव थेरो ''एकमिदाहं, आवुसो, समय''न्तिआदिना सुभद्दवचनमेव दस्सेत्वा धम्मविनयं सङ्गायापेसि। **नानाभावो**ति सरीरेन नानादेसभावो, विप्पवासोति अत्थो। **विनाभावो**ति मरणेन वियुज्जनं। **अञ्ञथाभावो**ति भवन्तरूपगमनेन अञ्ञाकारप्पत्ति।

४४१. **''आकङ्खमानो…पे॰… समूहनेय्या''**ति इदं भगवा मया ''आकङ्खमानो''ति वुत्तत्ता एकसिक्खापदम्पि समूहनितब्बं अपस्सन्ता, समूहने च दोसं दिस्वा धम्मसङ्गहका भिक्खू ''अपञ्ञत्तं न पञ्ञापेस्साम, पञ्ञत्तं न समुच्छिन्दिस्सामा''तिआदिना पुन ''पञ्ञत्तिसदिसाय अकुप्पाय कम्मवाचाय सावेत्वा समादाय वत्तिस्सन्ति, ततो याव सासनन्तरधाना अप्पटिबाहियानि सिक्खापदानि भविस्सन्ती''ति इमिना अधिप्पायेन अवोचाति दट्ठब्बं। तेनेव महाथेरापि तथेव पटिपज्जिंसु।

गिहिगतानीति गिहीसु गतानि। खत्तियमहासारादिगिहीहि ञातानीति अत्थो। चितकधूमकालो अत्तनो पवत्तिपरियोसानभूतो एतस्साति **धूमकालिकं**।

४४३. **ओळारिके निमित्ते करियमानेपी**ति ''आकङ्खमानो, आनन्द, तथागतो कप्पं वा तिट्ठेय्य कप्पावसेसं वा''ति एवं थूलतरे ''तिट्ठतु, भगवा, कप्प''न्ति याचनहेतुभूते ओकासनिमित्ते कम्मे करियमाने। **मारेन परियुट्ठितचित्तो**ति मारेन आविट्ठचित्तो।

४४५. **उज्जवनिकाया**ति पटिसोतगामिनिया। कुच्छितो लवो छेदो विनासो **कुलवो,** निरत्थकविनियोगो। तं न गच्छन्तीति **न कुलवं गमेन्ति**।

खुद्दानुखुद्दकसिक्खापदकथावण्णना निट्ठिता।

पञ्चसतिकक्खन्धकवण्णनानयो निट्ठितो।

१२. सत्तसतिकक्खन्धको

दसवत्थुकथावण्णना

४४६. सत्तसतिकक्खन्धके **भिक्खग्गेना**ति भिक्खुगणनाय। **मही**ति हिमं।

४४७. **अविज्जानिवुता**ति अविज्जानीवरणेन निवुता पटिच्छन्ना। **अविद्दसू**ति अञ्ञाणिनो। **उपक्किलेसा वुत्ता**ति तेसं समणब्राह्मणानं एते सुरापानादयो उपक्किलेसाति वुत्ता। नेत्तिया तण्हाय सहिता **सनेत्तिका**।

४५०-१. **अहोगङ्गो**ति तस्स पब्बतस्स नामं। **पटिकच्चेव गच्छेय्य**न्ति यत्थ नं अधिकरणं वूपसमितुं भिक्खू सन्निपतिस्सन्ति, तत्थाहं पठममेव गच्छेय्यं। **सम्भावेसु**न्ति सम्पापुणिंसु।

४५२. **अलोणिक**न्ति लोणरहितं भत्तं, ब्यञ्जनं वा। **आसुता**ति सब्बसम्भारसज्जिता, ''असुत्ता''ति वा पाठो।

४५३. **उज्जविंसू**ति नावाय पटिसोतं गच्छिंसु। **पाचीनका**ति पुरत्थिमदिसाय जातत्ता वज्जिपुत्तके सन्धाय वुत्तं। **पावेय्यका**ति पावेय्यदेसवासिनो।

४५४. **ननु त्वं, आवुसो, वुड्ढो**ति ननु त्वं थेरो निस्सयमुत्तो, कस्मा तं थेरो पणामेसीति भेदवचनं वदन्ति। **गरुनिस्सयं गण्हामा**ति निस्सयमुत्तापि मयं एकं सम्भावनीयगरुं निस्सयभूतं गहेत्वाव वसिस्सामाति अधिप्पायो।

४५५. **मूलादायका**ति पठमं दसवत्थूनं दायका, आवासिकाति अत्थो। **पथब्या सङ्घत्थेरो**ति लोके सब्बभिक्खूनं तदा उपसम्पदाय वुड्ढो। **सुञ्ञताविहारेना**ति सुञ्ञतामुखेन अधिगतफलसमापत्तिं सन्धाय वदति।

४५७. **सुत्तविभङ्गे**ति पदभाजनीये। इदञ्च ''यो पन भिक्खु सन्निधिकारकं खादनीयं वा भोजनीयं वा''ति (पाचि॰ २५३) सुत्ते यावकालिकस्सेव परामट्ठत्ता सिङ्गीलोणस्स यावजीविकस्स सन्निधिकतस्स आमिसेन सद्धिं परिभोगे पाचित्तियं विभङ्गनयेनेव सिज्झतीति वुत्तं, तं पन पाचित्तियं विभङ्गे आगतभावं साधेतुं **''कथं सुत्तविभङ्गे''**तिआदि वुत्तं। तत्थ हि लोणमेत्थ सन्निधिकतं, न खादनीयं भोजनीयन्ति लोणमिस्सभोजने वज्जिपुत्तका अनवज्जसञ्ञिनो अहेसुं। तथासञ्ञीनम्पि नेसं आपत्तिदस्सनत्थं ''सन्निधिकारे असन्निधिकारसञ्ञी''ति इदं सुत्तविभङ्गं उद्धटन्ति वेदितब्बं।

तेन सद्धिन्ति पुरेपटिग्गहितलोणेन सद्धिं। **दुक्कटेनेत्थ भवितब्ब**न्ति ''यावकालिकेन, भिक्खवे, यावजीविकं पटिग्गहित''न्ति अवत्वा ''तदहुपटिग्गहित''न्ति वचनसामत्थियतो पुरेपटिग्गहितं यावजीविकं यावकालिकेन सद्धिं सम्भिन्नरसं कालेपि न कप्पतीति सिज्झति, तत्थ दुक्कटेन भवितब्बन्ति अधिप्पायो। **दुक्कटेनपि न भवितब्ब**न्ति यदि हि सन्निधिकारपच्चया दुक्कटं मञ्ञथ, यावजीविकस्स लोणस्स सन्निधिदोसाभावा दुक्कटेन न भवितब्बं, अथ आमिसेन सम्भिन्नरसस्स तस्स आमिसगतिकत्ता दुक्कटं मा मञ्ञथ। तदा च हि पाचित्तियेनेव भवितब्बं आमिसत्तुपगमनतोति अधिप्पायो। **न हि एत्थ यावजीविक**न्तिआदिनापि दुक्कटाभावं समत्थेति।

पाळियं **राजगहे सुत्तविभङ्गे**तिआदीसु सब्बत्थ सुत्ते च विभङ्गे चाति अत्थो गहेतब्बो। तस्स तस्स विकालभोजनादिनो सुत्तेपि पटिक्खित्तत्ता विनयस्स अतिसरणं अतिक्कमो **विनयातिसारो**। **''निसीदनं नाम सदसं वुच्चतीति आगत''**न्ति इदं विभङ्गे च आगतदस्सनत्थं वुत्तं। **तं पमाणं करोन्तस्सा**ति सुगतविदत्थिया विदत्थित्तयप्पमाणं करोन्तस्स, दसाय पन विदत्थिद्वयप्पमाणं कतं। अदसकम्पि निसीदनं वट्टति एवाति अधिप्पायो। सेसमिध हेट्ठा सब्बत्थ सुविञ्ञेय्यमेव।

दसवत्थुकथावण्णना निट्ठिता।

सत्तसतिकक्खन्धकवण्णनानयो निट्ठितो।

इति समन्तपासादिकाय विनयट्ठकथाय विमतिविनोदनियं

चूळवग्गवण्णनानयो निट्ठितो।

॥ नमो तस्स भगवतो अरहतो सम्मासम्बुद्धस्स॥

परिवारवण्णना

महावग्गो

पञ्ञत्तिवारवण्णना

१. विसुद्धपरिवारस्स सीलक्खन्धादिधम्मक्खन्धसरीरस्स भगवतो विनयपरियत्तिसासने खन्धकानं अनन्तरं परिवारोति यो विनयो सङ्गहं समारुळ्हो, तस्स दानि अनुत्तानत्थवण्णनं करिस्सामीति योजना।

समन्तचक्खुनाति सब्बञ्ञुतञ्ञाणेन। **अतिविसुद्धेन मंसचक्खुना**ति रत्तिन्दिवं समन्ता योजनप्पमाणे अतिसुखुमानिपि रूपानि पस्सनतो अतिविय परिसुद्धेन पसादचक्खुना। ''अत्थि तत्थ पञ्ञत्ती''तिआदीसु अत्थि नु खो तत्थ पञ्ञत्तीतिआदिना अत्थो गहेतब्बोति आह **''तत्थ पञ्ञत्ति…पे॰… केनाभतन्ति पुच्छा''**ति।

२. **पुच्छाविस्सज्जने**ति पुच्छाय विस्सज्जने। **विनीतकथा**ति विनीतवत्थुकथा, अयमेव वा पाठो।

द्वङ्गिकेन एकेन समुट्ठानेनाति अङ्गद्वयसमुदायभूतेन एकेन। अङ्गद्वयविमुत्तस्स समुट्ठानस्स अभावेपि तेसु एकेनङ्गेन विना अयं आपत्ति न होतीति दस्सनत्थमेव ''एकेन समुट्ठानेना''ति वुत्तं। इदानि तेसु द्वीसु अङ्गेसु पधानङ्गं दस्सेतुमाह **''एत्थ हि चित्तं अङ्गं होती''**तिआदि। यस्मा पन मग्गेनमग्गप्पटिपत्तिसङ्खाताय कायविञ्ञत्तिया सेवनचित्तेनेव सम्भवे सति अयं तं अङ्गद्वयं उपादाय भगवता पञ्ञत्ता आपत्तिसम्मुति होति, नासति। तस्मा तं चित्तं कायविञ्ञत्तिसङ्खातस्स कायस्स अङ्गं कारणं होति, न आपत्तिया। तस्स पन तंसमुट्ठितकायो एव अङ्गं अब्यवहितकारणं, चित्तं पन कारणकारणन्ति अधिप्पायो। एवं उपरिपि सब्बत्थ चित्तङ्गयुत्तसमुट्ठानेसु अधिप्पायो वेदितब्बो। ''एकेन समुट्ठानेन समुट्ठाती''तिआदिपरिवारवचनेनेव आपत्तिया अकुसलादिपरमत्थसभावता पाळिअट्ठकथासु परियायतोव वुत्ता, सम्मुतिसभावा एव आपत्तीति सिज्झति समुट्ठानसमुट्ठितानं भेदसिद्धितोति गहेतब्बं। **इममत्थं सन्धाया**ति आपन्नाय पाराजिकापत्तिया केहिचिपि समथेहि अनापत्तिभावापादनस्स असक्कुणेय्यत्तसङ्खातमत्थं सन्धाय।

३. **पोराणकेहि महाथेरेही**ति सङ्गीतित्तयतो पच्छा पोत्थकसङ्गीतिकारकेहि छळभिञ्ञापअसम्भिदादिगुणसमुज्जलेहि महाथेरेहि। चतुत्थसङ्गीतिसदिसा हि **पोत्थकारोहसङ्गीति**।

१८८. **महाविभङ्गे**ति भिक्खुविभङ्गे। **सोळस वारा दस्सिता**ति येहि वारेहि आदिभूतेहि उपलक्खितत्ता अयं सकलोपि परिवारो सोळसपरिवारोति वोहरीयति, ते सन्धाय वदति।

पञ्ञत्तिवारवण्णना निट्ठिता।

समुट्ठानसीसवण्णना

२५७. पाळियं **निब्बानञ्चेव पञ्ञत्ती**ति एत्थ यस्मा सङ्खतधम्मे उपादाय पञ्ञत्ता सम्मुतिसच्चभूता पुग्गलादिपञ्ञत्ति परमत्थतो अविज्जमानत्ता उप्पत्तिविनासयुत्तवत्थुधम्मनियतेन अनिच्चदुक्खलक्खणद्वयेन युत्ताति वत्तुं अयुत्ता, कारकवेदकादिरूपेन पन परिकप्पितेन अत्तसभावेन विरहितत्ता ''अनत्ता''ति वत्तुं युत्ता। तस्मा अयं पञ्ञत्तिपि असङ्खतत्तसामञ्ञतो वत्थुभूतेन निब्बानेन सह **''अनत्ता इति निच्छया''**ति वुत्ता। अविज्जमानापि हि सम्मुति केनचि पच्चयेन अकतत्ता असङ्खता एवाति।

करुणासीतलत्तं, पञ्ञापभासितत्तञ्च भगवतो दस्सेतुं **''बुद्धचन्दे, बुद्धादिच्चे''**ति एतं उभयं वुत्तं। हायति एतेनाति हानि, दुक्खस्स हानि **दुक्खहानि,** सब्बदुक्खापनूदनकारणन्ति अत्थो। **पिटके तीणि देसयी**ति यस्मा अञ्ञेपि महावीरा सम्मासम्बुद्धा सद्धम्मं देसयन्ति, तस्मा अङ्गीरसो पिटकानि तीणि देसयीति योजना। **महागुण**न्ति महानिसंसं। **एवं नीयति सद्धम्मो**ति यदि विनयपरियत्ति अपरिहीना तिट्ठति, एवं सति पटिपत्तिपटिवेधसद्धम्मोपि नीयति पवत्तीयति, न परिहायतीति अत्थो।

विनयपरियत्ति पन कथं तिट्ठतीति आह **''उभतो चा''**तिआदि। परिवारेन गन्थिता तिट्ठतीति योजेतब्बं। **तस्सेव परिवारस्सा**ति तस्मिं एव परिवारे। **समुट्ठानं नियतो कत**न्ति एकच्चं समुट्ठानेन नियतं कतं। तस्मिं परिवारे किञ्चि सिक्खापदं नियतसमुट्ठानं अञ्ञेहि असाधारणं, तं पकासितन्ति अत्थो।

सम्भेदं निदानञ्चञ्ञन्ति सम्भेदो सिक्खापदानं अञ्ञमञ्ञसमुट्ठानेन संकिण्णता, निदानञ्च पञ्ञत्तिट्ठानं, अञ्ञं पुग्गलादिवत्थादि च। **सुत्ते दिस्सन्ति उपरी**ति हेट्ठा वुत्ते, उपरि वक्खमाने च परिवारसुत्ते एव दिस्सन्ति। यस्मा च एवं, तस्मा सकलसासनाधारस्स विनयस्स ठितिहेतुभूतं परिवारं सिक्खेति, एवमेत्थ योजना दट्ठब्बा।

सम्भिन्नसमुट्ठानानीति अञ्ञेहि साधारणसमुट्ठानानि। **आदिम्हि ताव पुरिमनये**ति सब्बपठमे पञ्ञत्तिवारे आगतनयं सन्धाय वदति, तत्थ पन पञ्ञत्तिवारे ''पठमं पाराजिकं कत्थ पञ्ञत्तन्ति, वेसालियं पञ्ञत्त''न्तिआदिना (परि० १) निदानम्पि दिस्सति एव। **परतो**ति आगतभावं पन सन्धाय परतो आगते सुत्ते दिस्सतीति वेदितब्बन्ति वुत्तं। **तस्सा**ति उभतोविभङ्गपरियापन्नस्स सिक्खापदस्स।

२५८. **अनियता पठमिका**ति आपत्तिं अपेक्खित्वाव इत्थिलिङ्गं कतं, पठमानियतं सिक्खापदन्ति अत्थो। पाळियं **नानुबन्धे पवत्तिनि**न्ति वुट्ठापितं पवत्तिनिं अननुबन्धनसिक्खापदं।

२६०. एळकलोमसिक्खापदवत्थुस्मिं ''भिक्खुनियो एळकलोमानि धोवन्तियो रजन्तियो विजटेन्तियो रिञ्चन्ति उद्देसं परिपुच्छ''न्ति (पारा० ५७६) आगतत्ता इमं रिञ्चन्ति-पदं गहेत्वा सिक्खापदं उपलक्खितन्ति दस्सेन्तो **''विभङ्गे 'रिञ्चन्ति उद्देस'न्ति आगतं एळकलोमधोवापनसिक्खापद''**न्ति आह।

वस्सिकसाटिकसिक्खापदन्ति असमये वस्सिकसाटिकपरियेसनसिक्खापदं (पारा० ६२६ आदयो)। **रतनसिक्खापद**न्ति रतनं वा रतनसम्मतं वा पटिसामनसिक्खापदं (पाचि० ५०२ आदयो)।

२६५. पाळियं **बुद्धञाणेना**ति पटिविद्धसब्बञ्ञुतञ्ञाणेन।

२६७. **''न देसेन्ति तथागता''**ति एतेन छत्तपाणिस्स धम्मदेसनापटिक्खेपं दस्सेति।

२६९. **अकत**न्ति अञ्ञेहि अमिस्सीकतं, नियतसमुट्ठानन्ति अत्थो। **अकत**न्ति वा पुब्बे अनागतं, अभिनवन्ति अत्थो।

२७०. समुट्ठानञ्हि सङ्खेपन्ति एत्थ सङ्खिपन्ति सङ्गय्हन्ति सदिससमुट्ठानानि एत्थाति सङ्खेपो, समुट्ठानसीसं। नेति विनेति कायवचीदुच्चरितन्ति नेत्ति, विनयपाळि, सा एव धम्मोति नेत्तिधम्मोति आह **''विनयपाळिधम्मस्सा''**ति।

समुट्ठानसीसवण्णना निट्ठिता।

अन्तरपेय्यालं

कतिपुच्छावारवण्णना

२७१. कति आपत्तियोति पाराजिकादीसु पञ्चसु आपत्तीसु मेथुनादिन्नादानादिअन्तोगधभेदं अपेक्खित्वा जातिवसेन एकत्तं आरोपेत्वा पुच्छा कता। **कति आपत्तिक्खन्धा**ति अन्तोगधभेदं अपेक्खित्वा पच्चेकं रासट्ठेनाति एत्तकमेवेत्थ भेदो। **विनीतानियेव विनीतवत्थूनी**ति आपत्तितो विरमणानि एव अविप्पटिसारपामोज्जादिधम्मानं कारणत्ता वत्थूनीति विनीतवत्थूनि, तानि एत्थ अत्थतो विरतिआदिअनवज्जधम्मा एव। **वेरं मणती**ति वेरहेतुत्ता ''वेर''न्ति लद्धनामं रागादिअकुसलपक्खं विनासेति।

धम्मस्सवनग्गं भिन्दित्वा गच्छतीति बहूसु एकतो निसीदित्वा धम्मं सुणन्तेसु तं धम्मस्सवनसमागमं कोपेत्वा उट्ठाय गच्छति। **अनादरोवा**ति तुस्सितब्बट्ठाने तुट्ठिं, संविजितब्बट्ठाने संवेगञ्च अपवेदेन्तो एव। **कायपागब्भिय**न्ति उन्नतिवसेन पवत्तनकायानाचारं।

२७४. मेत्ताय सम्भूतं **मेत्तं,** कायकम्मं। **उभयेहिपी**ति नवकेहि, थेरेहि च। **पियं करोती**ति तं पुग्गलं पेमट्ठानं करोति, केसन्ति आह **''सब्रह्मचारीन''**न्ति।

पुग्गलं पटिविभजित्वा भुञ्जतीति पकतेन सम्बन्धो। तमेव पुग्गलपटिविभागं दस्सेतुं **''असुकस्सा''**तिआदि वुत्तं।

भुजिस्सभावकरणतोति तण्हादासब्यतो मोचेत्वा समथविपस्सनासु सेरिविहारिताकरणतोति अत्थो। **निय्याती**ति पवत्तति। सम्मादुक्खक्खयाय संवत्ततीति अत्थो।

कतिपुच्छावारवण्णना निट्ठिता।

छआपत्तिसमुट्ठानवारवण्णना

२७६. पठमेन आपत्तिसमुट्ठानेनाति केवलं कायेन। पाराजिकापत्तिया एकन्तसचित्तकसमुट्ठानत्ता **''न हीति वत्तब्ब''**न्ति वुत्तं। सङ्घादिसेसादीनं दुक्कटपरियोसानानं पञ्चन्नं अचित्तकानम्पि सम्भवतो **''सिया''**ति वुत्तं, आपज्जनं सिया भवेय्याति अत्थो। हीनुक्कट्ठेहि जातिआदीहि ओमसने एव दुब्भासितस्स पञ्ञत्तत्ता सा एकन्तवाचाचित्तसमुट्ठाना एवाति।

दुतियसमुट्ठाननये वाचाय एव समापज्जितब्बपाटिदेसनीयस्स अभावा **''न ही''**ति वुत्तं।

ततिये पन वोसासमानरूपं भिक्खुनिं कायवाचाहि अनपसादनपच्चया पाटिदेसनीयसम्भवतो **''सिया''**ति वुत्तं।

ओमसने पाचित्तियस्स अदिन्नादानसमुट्ठानत्तेपि तप्पच्चया पञ्ञत्तस्स दुब्भासितस्स पञ्चमेनेव समुप्पत्तीति दस्सेतुं चतुत्थवारे **''दुब्भासितं आपज्जेय्याति न हीति वत्तब्ब''**न्ति वत्वा पञ्चमवारे **''सियाति वत्तब्ब''**न्ति वुत्तं। कायविकारेनेव ओमसन्तस्स पनेत्थ दुब्भासितभावेपि कायकीळाभावाभावतो दुक्कटमेवाति दट्ठब्बं।

छद्वारे पन विज्जमानोपि कायो दुब्भासितस्स अङ्गं न होति, पञ्चमसमुट्ठाने एव छट्ठम्पि पविसतीति दस्सेतुं **''न ही''**ति पटिक्खित्तं, न पन तत्थ सब्बथा दुब्भासितेन अनापत्तीति दस्सेतुं। न हि दवकम्यताय कायवाचाहि ओमसन्तस्स दुब्भासितापत्ति न सम्भवति। यञ्हि पञ्चमेनेव समापज्जति, तं छट्ठेनपि समापज्जति एव धम्मदेसनापत्ति वियाति गहेतब्बं। सेसं समुट्ठानवारे सुविञ्ञेय्यमेव।

छआपत्तिसमुट्ठानवारवण्णना निट्ठिता।

कतापत्तिवारवण्णना

२७७. दुतिये पन कतिवारे पठमसमुट्ठानेन आपज्जितब्बानं आपत्तीनं लहुदस्सनसुखत्थं कुटिकारादीनि एव समुद्धटानि, न अञ्ञेसं अभावा, सञ्चरित्तादीनम्पि विज्जमानत्ता। एवं दुतियसमुट्ठानादीसुपि। **''कप्पियसञ्ञी''**ति इमिना अचित्तकत्तं दस्सेति। **''कुटिं करोती''**ति इमिना वचीपयोगाभावं। उभयेनापि केवलं कायेनेव दुक्कटादीनं सम्भवं दस्सेति। एवं उपरिपि यथानुरूपं कातब्बं।

''एकेन समुट्ठानेन समुट्ठहन्ती''ति इदं इध विसेसेत्वा दस्सितानं कायतोव समुट्ठितानं वसेन वुत्तं, अविसेसतो पन ता आपत्तियो इतरसमुट्ठानेहिपि यथारहं समुट्ठहन्ति एव। एवं उपरिपि।

''तिणवत्थारकेन चा''ति इदं सङ्घादिसेसवज्जितानं चतुन्नं आपत्तीनं वसेन वुत्तं।

२७९. **संविदहित्वा कुटिं करोती**ति वाचाय संविदहति, सयञ्च कायेन करोतीति अत्थो।

कतापत्तिवारवण्णना निट्ठिता।

आपत्तिसमुट्ठानगाथावण्णना

२८३. ततियो पन गाथावारो दुतियवारेन वुत्तमेवत्थं सङ्गहेत्वा दस्सेतुं वुत्तो। तत्थ कायोव कायिकोति वत्तब्बे वचनविपल्लासेन **''कायिका''**ति वुत्तं। तेनाह **''तेन समुट्ठिता''**ति, कायो समुट्ठानं अक्खातोति अत्थो।

विवेकदस्सिनाति सब्बसङ्खतविवित्तत्ता, ततो विवित्तहेतुत्ता च नीवरणविवेकञ्च निब्बानञ्च दस्सनसीलेन। **विभङ्गकोविदा**ति उभतोविभङ्गकुसलाति आलपनं। इध पनेवं अञ्ञो पुच्छन्तो नाम नत्थि, **उपालित्थेरो** सयमेव अत्थं पाकटं कातुं पुच्छाविसज्जनञ्च अकासीति इमिना नयेन सब्बत्थ अत्थो वेदितब्बो।

आपत्तिसमुट्ठानगाथावण्णना निट्ठिता।

विपत्तिपच्चयवारवण्णना

२८४. चतुत्थे पन विपत्तिपच्चयवारे **सीलविपत्तिपच्चया**ति सीलविपत्तिपअच्छादनपच्चया।

२८६. **दिट्ठिविपत्तिपच्चया**ति दिट्ठिविपत्तिया अप्पटिनिस्सज्जनपच्चया।

२८७. **आजीवविपत्तिपच्चया**ति एत्थ आगम्म जीवन्ति एतेनाति आजीवो, चतुपच्चयो, सोव मिच्छापत्तिया विपन्नत्ता विपत्तीति **आजीवविपत्ति,** तस्सा आजीवविपत्तिया हेतु, तदुप्पादनतपरिभोगनिमित्तन्ति अत्थो।

विपत्तिपच्चयवारवण्णना निट्ठिता।

अधिकरणपच्चयवारवण्णना

२९१. पञ्चमे अधिकरणपच्चयवारे **किच्चाधिकरणपच्चया**ति अपलोकनवचनञत्तिकम्मवाचासङ्खातकम्मवाचापच्चया। **पञ्चा**ति एत्थ अधम्मिककतिकादिं अपलोकेत्वा करोन्तानं अनिमित्तन्ति अत्थो। पञ्चमे अधिकरणपच्चयवारे किच्चाधिकरणपच्चया अपलोकनावसाने दुक्कटं, अधिप्पायादिना ञत्तिकम्मादिं करोन्तानं थुल्लच्चयादि च सङ्गय्हतीति दट्ठब्बं। **अवसेसा आपत्तियो**ति सोतापत्तिफलसमापत्तिआदयो। **''नत्थञ्ञा आपत्तियो''**ति इदं विपत्तिआदिभागिनियो सावज्जापत्तियो सन्धाय वुत्तं।

अधिकरणपच्चयवारवण्णना निट्ठिता।

समथभेदं

अधिकरणपरियायवारवण्णना

२९३. छट्ठे परियायवारे **अलोभो पुब्बङ्गमो**तिआदि सासनट्ठितिया अविपरीततो धम्मवादिस्स विवादं सन्धाय वुत्तं। **अट्ठारस भेदकरवत्थूनि ठानानी**ति धम्मादीसु अधम्मोतिआदिना गहेत्वा दीपनानि इधेव भेदकरवत्थूनि, तानि एव कायकलहादिविवादस्स कारणत्ता **ठानानि,** ओकासत्ता **वत्थूनि,** आधारत्ता **भूमियो**ति च वुत्तानि। **अब्याकतहेतू**ति असेक्खानं विवादं सन्धाय वुत्तं। **द्वादस मूलानी**ति कोधो उपनाहो, मक्खो पलासो, इस्सा मच्छरियं, माया साठेय्यं, पापिच्छता महिच्छता, सन्दिट्ठिपरामासिता आधानग्गाहीदुप्पटिनिस्सज्जितानीति इमेसं छन्नं युगळानं वसेन छ धम्मा चेव लोभादयो छ हेतू चाति द्वादस धम्मा विवादाधिकरणस्स मूलानि।

२९४. **चुद्दस मूलानी**ति तानेव द्वादस कायवाचाहि सद्धिं चुद्दस अनुवादाधिकरणस्स मूलानि।

२९५. पथवीखणनादीसु पण्णत्तिवज्जेसु कुसलाब्याकतचित्तमूलिका आपत्ति होतीति दस्सेतुं **''अलोभो पुब्बङ्गमो''**तिआदि वुत्तं। **सत्त आपत्तिक्खन्धा ठानानी**तिआदि सत्तन्नं आपत्तिक्खन्धानं पटिच्छादनपच्चया आपत्तिसम्भवतो वुत्तं। ''आपत्ताधिकरणपच्चया चतस्सो आपत्तियो आपज्जती''ति (परि० २९०) हि वुत्तं। **''छ हेतू''**ति इदं कुसलानं आपत्तिहेतुवोहारस्स अयुत्तताय वुत्तं, न पन कुसलहेतूनं अभावतो। ''अलोभो पुब्बङ्गमो''ति हि आदि वुत्तं। आपत्तिहेतवो एव हि पुब्बङ्गमनामेन वुत्ता।

२९६. **चत्तारि कम्मानि ठानानी**तिआदीसु अपलोकनवाचा, ञत्तिआदिवाचायो च कम्मानीति वुत्तं। ता एव हि एकसीमायं सामग्गिमुपगतानं कम्मप्पत्तानं अनुमतिया सावनकिरियानिप्फत्तिसङ्खातस्स सङ्घगणकिच्चसभावस्स किच्चाधिकरणस्स अधिट्ठानाभावेन ''ठानवत्थुभूमियो''ति वुच्चन्ति। **एकं मूलं सङ्घो**ति येभुय्यवसेन वुत्तं। गणञत्तिअपलोकनानञ्हि गणोपि मूलन्ति। **ञत्तितो वा**ति ञत्तिञत्तिदुतियञत्तिचतुत्थकम्मवाचानं ञत्तिरूपत्ता, ञत्तिपुब्बकत्ता च वुत्तं। कम्मञत्तिकम्मवाचाञत्तिवसेन हि दुविधासु ञत्तीसु अनुस्सावनापि कम्ममूलकन्त्वेव सङ्गय्हन्ति। ञत्तिविभागो चायं उपरि आवि

भविस्सति।

''इमे सत्त समथा…पे०… परियायेना''ति इदं पुच्छावचनं। **''सिया''**ति इदं विसज्जनं। **''कथञ्च सिया''**ति इदं पुन पुच्छा। **विवादाधिकरणस्स द्वे समथा**तिआदि पुन विसज्जनं। तत्थ **''वत्थुवसेना''**ति इदं ''सत्त समथा दस समथा होन्ती''ति इमस्स कारणवचनं। **''परियायेना''**ति इदं ''दस समथा सत्त समथा होन्ती''ति इमस्स कारणवचनं। चतुब्बिधाधिकरणसङ्खातवत्थुवसेन च देसनाक्कमसङ्खातपरियायवसेन चाति अत्थो।

अधिकरणपरियायवारवण्णना निट्ठिता।

साधारणवारादिवण्णना

२९७. सत्तमे साधारणवारे **साधारणा**ति विवादाधिकरणस्स वूपसमनकिच्चसाधारणा। एवं सब्बत्थ।

२९८. अट्ठमे तब्भागियवारे **तब्भागिया**ति विवादाधिकरणस्स वूपसमनतो तप्पक्खिका।

साधारणवारादिवण्णना निट्ठिता।

समथासमथस्ससाधारणवारवण्णना

२९९. नवमे समथासमथसाधारणवारे ''सब्बे समथा एकतोव अधिकरणं समेन्ति उदाहु नाना''ति पुच्छन्तेन **''समथा समथस्स साधारणा, समथा समथस्स असाधारणा''**ति वुत्तं। विवादादिअधिकरणक्कमेन तब्बूपसमहेतुभूते समथे उद्धरन्तो **''येभुय्यसिका''**तिआदिमाह। सम्मुखाविनयं विना कस्सचि समथस्स असम्भवा सेसा छपि समथा सम्मुखाविनयस्स साधारणा वुत्ता, तेसं पन छन्नं अञ्ञमञ्ञापेक्खाभावतो ते अञ्ञमञ्ञं असाधारणा वुत्ता। तब्भागियवारेपि एसेव नयो।

समथासमथस्ससाधारणवारवण्णना निट्ठिता।

समथसम्मुखाविनयवारादिवण्णना

३०१-३. एकादसमवारेपि **सम्मुखाविनयो**तिआदि पुच्छा। **येभुय्यसिका सतिविनयो**तिआदि विसज्जनं। एवं विनयवारे कुसल-वारे ततो परेसुपि पुच्छाविसज्जनपरिच्छेदो वेदितब्बो।

तत्थ **सम्मुखाविनयो सिया कुसलो**तिआदीसु तस्मिं तस्मिं विनयकम्मे, विवादादिम्हि च नियुत्तपुग्गलानं समुप्पज्जनककुसलादीनं वसेन सम्मुखाविनयादीनं, विवादादीनञ्च कुसलादिभावो तेन तेन उपचारेन वुत्तो। यस्मा पनेतस्स सम्मुखाविनयो नाम सङ्घसम्मुखतादयो होन्ति, तेसञ्च अनवज्जसभावत्ता अकुसले विज्जमानेपि अकुसलत्तूपचारो न युत्तो आपत्ताधिकरणस्स अकुसलत्तूपचारो विय, तस्मा नत्थि सम्मुखाविनयो अकुसलोति अत्थो।

३०४. ततो परेसु **यत्थ येभुय्यसिका लब्भति, तत्थ सम्मुखाविनयो लब्भती**तिआदि सम्मुखाविनयस्स इतरेहि समथेहि नियमेन संसट्ठतं, इतरेसं पन छन्नं अञ्ञमञ्ञं संसग्गाभावञ्च दस्सेतुं वुत्तं।

समथसम्मुखाविनयवारादिवण्णना निट्ठिता।

संसट्ठवारादिवण्णना

३०६. **अधिकरणन्ति वा समथाति वा इमे धम्मा संसट्ठा**तिआदि समथानं अधिकरणेसु एव यथारहं पवत्तिं, अधिकरणानि विना तेसं विसुं अट्ठानञ्च दस्सेतुं वुत्तं। **विनिब्भुजित्वा नानाकरणं पञ्ञापेतु**न्ति अधिकरणतो समथेहि वियोजेत्वा असंसट्ठे कत्वा नानाकरणं अञ्ञमञ्ञं असंसट्ठताय ठितभावसङ्खातं नानत्तं पञ्ञापेतुं अधिकरणवूपसमक्खणे एव तेसं असंसग्गं पञ्ञापेतुं किं सक्काति पुच्छति।

अधिकरणन्तिआदि गारय्हवाददस्सनं। **सो मा हेव**न्ति यो एवं वदति, सो ''मा एवं वदा''ति वचनीयो अस्स, न च लब्भति समथानं अञ्ञत्र अधिकरणा वूपसमलक्खणन्ति पहानावत्थानसङ्खातं नानाकरणं पटिक्खिपति। लक्खणतो पन अधिकरणेहि समथानं नानाकरणं अत्थेवाति दट्ठब्बं। **समथा अधिकरणेहि सम्मन्ती**ति अपलोकनादीहि चतूहि किच्चाधिकरणेहि सब्बेपि समथा निट्ठानं गच्छन्ति, नाञ्ञेहीति इममत्थं सन्धाय वुत्तं। तेनेव वक्खति ''सम्मुखाविनयो विवादाधिकरणेन न सम्मति। अनुवाद…पे०… आपत्ताधिकरणेन न सम्मति, किच्चाधिकरणेन सम्मती''तिआदि (परि० ३११)।

३०७-३१३. **विवादाधिकरणं कतिहि समथेहि सम्मती**तिआदिको सम्मतिवारो। तदनन्तरो सम्मतिनसम्मतिवारो च अधिकरणेहि समथानं संसट्ठतं, विसंसट्ठतञ्च दस्सेतुं वुत्तो। **समथा समथेहि सम्मन्ती**तिआदिको समथाधिकरणवारो समथानं अञ्ञमञ्ञं, अधिकरणेहि च अधिकरणानञ्च अञ्ञमञ्ञं, समथेहि च वूपसमावूपसमं दस्सेतुं वुत्तो।

३१४. समुट्ठापेतिवारो पन अधिकरणेहि अधिकरणानं उप्पत्तिप्पकारदस्सनत्थं वुत्तो। **न कतमं अधिकरण**न्ति अत्तनो सम्भवमत्तेन एकम्पि अधिकरणं न समुट्ठापेतीति अत्थो। कथञ्चरहि समुट्ठापेतीति आह **''अपि चा''**तिआदि। तत्थ **जायन्ती**ति अनन्तरमेव अनुप्पज्जित्वा परम्परपच्चया जायन्तीति अधिप्पायो। **''धम्मो अधम्मो''**तिआदिना उभिन्नं पुग्गलानं विवादपच्चया अञ्ञमञ्ञखेमभङ्गा होन्ति, तप्पच्चया तेसं पक्खं परियेसनेन कलहं वड्ढन्तानं विवादो कञ्चि महापरिसं सङ्घपरिणायकं लज्जिं आगम्म वूपसमं गच्छति। तथा अवूपसमन्ते पन विवादो कमेन वड्ढित्वा सकलेपि सङ्घे विवादं समुट्ठापेति, ततो अनुवादादीनीति एवं परम्परक्कमेन वूपसमकारणाभावे चत्तारि अधिकरणानि जायन्ति। तं सन्धायाह **''सङ्घो विवदति विवादाधिकरण''**न्ति। सङ्घस्स विवदतो यो विवादो, तं विवादाधिकरणं होतीति अत्थो। एस नयो सेसेसुपि।

संसट्ठवारादिवण्णना निट्ठिता।

भजतिवारवण्णना

३१८. तदनन्तरवारे पन **विवादाधिकरणं चतुन्नं अधिकरणान**न्तिआदि अधिकरणानं वुत्तनयेन अञ्ञमञ्ञपच्चयत्तेपि संसग्गभावदस्सनत्थं वुत्तं। **विवादाधिकरणं चतुन्नं अधिकरणानं विवादाधिकरणं भजती**तिआदीसु विवादाधिकरणं चतूसु अधिकरणेसु विवादाधिकरणभावमेव भजति, नाञ्ञाधिकरणभावं, चतूसु अधिकरणेसु विवादाधिकरणत्तमेव निस्सितं विवादाधिकरणमेव परियापन्नं विवादाधिकरणभावेनेव सङ्गहितन्ति एवमत्थो गहेतब्बो।

३१९. **विवादाधिकरणं सत्तन्नं समथानं कति समथे भजती**तिआदि पन चतुन्नं अधिकरणानं वूपसमने सति नियतसमथे दस्सेतुं वुत्तं। तत्थ **कति समथे भजती**ति अत्तनो उपसमत्थाय कित्तके समथे उपगच्छति, कित्तके समथे आगम्म वूपसमं गच्छतीति अत्थो। **कति समथपरियापन्न**न्ति अत्तानं वूपसमेतुं कतिसु समथेसु तेहि समानवसेन पविट्ठं। **कतिहि समथेहि सङ्गहित**न्ति वूपसमं करोन्तेहि कतिहि समथेहि वूपसमकरणत्थं सङ्गहितं।

भजतिवारवण्णना निट्ठिता।

खन्धकपुच्छावारो

पुच्छाविस्सज्जनावण्णना

